Barcode : 99999990253104
Title - ( )
Author -
Language - sanskrit
Pages - 352
Publication Year - 1952
Barcode EAN.UCC-13



॥ श्रीगणेशाय नमः ॥

गुरुमण्डल ग्रन्थमालायाः दशमम्पुष्पम्

निरुक्तम्

(नैघण्टुकं काण्डम्)

—❀(०)❀—

श्रीमन्महर्षियास्काचार्य्य प्रणीतम्

जम्बूमार्गाश्रमवासि—भगवद् दुर्गाचार्य विरचितया

ऋज्यर्थाख्य टीकया सहितम्

द्वितीयो भागः

क्लाइव रो,

कलकत्ता

वैक्रमाब्दः	प्रथमं संस्करणम्	खृैस्ताब्दः
२००६	५०००	१९५२

Gurumandal Series No X.

NIRUKTAM

(Nighantukam Kandam)

BY

Maharshi Yaskacharya

WITH A

COMMENTARY BY

Bhagwat Durgacharya

Volume II

FIRST EDITION 5000

5, Clive Row,
Calcutta.

Vikram Era.	Christian Era.
2009	1952

अवध किशोर सिंह द्वारा गोपाल प्रिण्टिंग वर्क्स
१६८।१, कार्नवालिस स्ट्रीट, कलकत्ता से मुद्रित।

॥ श्रीः ॥

अथ निरुक्त द्वितीय भागस्य प्रथमादि तृतीयाध्यायानां विषयसूची

-*:(०):*-

प्रकरणम्	विषयः	पृष्ठाङ्क
अथ प्रथमाध्यायः	(व्याख्यानोपदेशाः)	१
प्रथमः पादः	(नामाख्यातयोः)	१
द्वितीयः पादः	(निपातानाम्)	३८
तृतीयः पादः	(„)	५३
चतुर्थः पादः	(प्रकृति विचारः)	७६
पञ्चमः पादः	(ग्रन्थ प्रयोजनानि)	९५
षष्ठः पादः	(„)	११२
अथ द्वितीयाध्यायः	(नैघण्टुक व्याख्या)	१३९
प्रथमः पादः	(निर्वचनोपदेशाः)	१३९
द्वितीयः पादः	(नै०, १, १)	१६५
तृतीयः पादः	(नै०, १, २—३)	१८४
चतुर्थः पादः	(नै० १, ४)	१९२
पञ्चमः पादः	(नै० १, ५—६)	२०२
षष्ठः पादः	(नै० १, ७—१०)	२०९

प्रकरणम्	विषयः	पृष्ठाङ्क
	(नै० १, ११—१७)	२२०
सप्तमः पादः	(नैघण्टुक व्याख्या)	२३६
अथ तृतीयाध्यायः	(नै० २, १—२)	२३६
प्रथमः पादः	(नै० २, ३—२२)	२५८
द्वितीयः पादः	(नै० ३, १—१३)	२८३
तृतीयः पादः	(नै० ३, १४—३०)	३०८
चतुर्थः पादः		

॥ समाप्तैषा सूची ॥

* ॐ श्रीगणेशाय नमः *

निरुक्तम् (निघण्टुभाष्यम्)

अथ वृत्ति-भूमिका ।

आदितः पाणिनीयन्तु शिक्षा ज्योतिस्ततश्छन्दः ।
पञ्चाध्यायी-निघण्टोश्च निरुक्तमुपरि स्थितम् ॥
प्रणम्य तत् प्रवक्ष्यामि स्थायामिततेजसे ।
स मे दिशतु सुप्रीतो वाग्धियोः शिष्टसम्मतिम् ॥

अथ किमर्थं वेदो वेदाङ्गानि च प्रवृत्तानि ? सर्वकामप्राप्त्या-दिर्मोक्षान्तः पुरुषार्थो वक्तव्य इति वेदः प्रवृत्तः । तत्परिज्ञानाय वेदाङ्गानि प्रवृत्तानि । तानि पुनरस्मृनि प्रतिनियतार्थविषयवृत्त्या-वेदमास्कन्दन्ति । तद्यथा—

शिक्षा तावत् "आत्मा बुद्ध्या समेत्यार्थान्"—इत्येवमादिना क्रमेण स्वरव्यञ्जनाभिव्यक्तिलक्षणम्, पूर्वाह्णमध्यन्दिनापराह्णे पु यथाध्येयम्, अधीतस्य च स्वरसौष्ठवयुक्तस्य यज्ञकर्मणि प्रयोगः,—इत्येवमादि अर्थजातं निरुवाच । तथा ह्यधीतः प्रयुज्यमानश्चा-पूर्वाङ्गभावाय नान्यथेत्येवमर्थवत्ता शिक्षायाः । एवं ह्याह—"मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् । (शि० ५०)—इति । वेदाध्ययनानुपङ्क्तश्चेतिहासपुराणशास्त्राणां लौकि-

कानां ग्रन्थविस्तररचनानाम्। अतएवाध्ययनपरिज्ञानं शिक्षाऽधिगताध्ययनविधेः ॥

वेदस्याक्षरकोशपादव्यवस्थालक्षणपरिज्ञाने छन्दोविचितिरा-द्रियते। इयताक्षरकोशेनेयद्भिः पादैर्गायत्री, इयद्भिस्त्रिष्टप्, इति। नहि अविज्ञातच्छन्दसा प्रयुज्यमानो मन्त्रः कर्मण्यार्द्धकः स्यात्। एवं ह्याह—"यो हवा अविदितार्षेयच्छन्दोदैवत ब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यति प्रवा मीयते पार्पीयान् भवति यातयामान्यस्य छन्दांसि भवन्ति"—इति। अतोऽनुषङ्गतो वक्त्रादिलक्षणपरिज्ञानं लोकेऽत्र लौकिक-मिति ह्याह ॥

सम्यगधीतस्य परिज्ञातछन्दसोऽमुष्मिन् कर्मणि विनियोग इति कल्प आद्रियते। यद्यथा। इषेत्वेतिच्छिनत्ति ऊर्जेत्वेत्य-नुमार्ष्टीति। न हि कल्पानभिज्ञः प्रयोगान् विजानीयादिति ॥

श्रुतिचोदितकर्माङ्गभूतकालपरिज्ञानाय ज्योतिषम्। अनुषङ्ग-तश्चातो प्राणिनां शुभाशुभकर्मफलविपाककालपरिज्ञानम् ॥

व्याकरणाद्विभक्त्यादिपरिज्ञानम्। एवं ह्याह—"प्रयाजाः सविभक्तिकाः कर्त्तव्याः"। तथाचेदं दर्शयति—"संख्यादयो न विवर्द्धन्ते"—इति। न च व्याकरणानभिज्ञो विभक्तीर्जानीया-दूहितुं वा मन्त्रान्। तत एव चानुषङ्गतो लोके लौकिकलक्षण-परिज्ञानमेवं छन्दस्येवं भाषायामिति प्रविभागो नान्तरीयकोऽनन्त-रेण व्यवस्थितः ॥

अत उक्ताध्ययनविधेरुक्तछन्दःप्रविभागस्योक्तविनियोगस्योप-

लक्षितकर्माङ्गभूतकालस्योपदर्शितलक्षणस्यैतैरङ्गैर्वेदस्यार्थपरिज्ञान-विषये निरुक्तं नामेदमङ्गमारभ्यते। प्रधानञ्चेदमितरेभ्योऽङ्गेभ्यः सर्वशास्त्रेभ्यश्चार्थपरिज्ञानाभिनिवेशात्। अर्थो हि प्रधानम्। तद्गुणः शब्दः। स चेतरेषु व्याकरणादिषु चिन्त्यते। कल्पे खल्वपि विनियोगश्चिन्त्यते। स च पुनरर्थाभिधानवशेन मन्त्राणाम्। यो यमर्थमभिधानेन संस्कर्तुं समर्थो मन्त्रः, स तत्र विनियुज्यते। तदुक्तं—"अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात् (३, २, १)"—इति। न च निरुक्ताद्ऋतेऽन्यदङ्गमन्यद्वा वाह्यं शास्त्रमस्ति, तात्पर्य्येण यदशेषान् शब्दान् निर्ब्रूयात्। यदपि च क्वचित् क्वचिदन्यशास्त्रे शब्दनिर्वचनम्, अतएव तदित्युपलक्ष्यम्। यथा शब्दलक्षणपरिज्ञानं सर्वशास्त्रेषु व्याकरणात्, एवं शब्दार्थ-निर्वचनपरिज्ञानं निरुक्तात्। वस्तुमात्रमेव हि इतरेषु शास्त्रेषु स्वाभिमतबुद्धिविषयमेव किञ्चिच्चिन्त्यते ब्राह्मणमपि च विध्यर्थ-वादरूपमशेषमन्त्रार्थशेषभूतमेव। मन्त्रब्राह्मणार्थपरिज्ञानवद्धश्चा-ध्यात्माधिदैवाधिभूतपरिज्ञानद्वारेण धर्मार्थकाकाममोक्षाख्योऽखि-लपुरुषार्थः। न चानिरुक्तो मन्त्रार्थो व्याख्यातव्य इति। तस्मा-दर्थपरिज्ञानाभिनिवेशाद्विदमेव प्रधानमित्युपपन्नम्। अथास्यैव-मखिलपुरुषार्थोपकारवृत्तिसमर्थस्य संग्रहः।

तद्यथा,—नामाख्यातोपसर्गनिपातलक्षणम् (१), भावविकार-लक्षणम् (२), नामान्याख्यातजानि सर्वाणि च यथोपन्यस्य पक्ष-प्रतिपक्षतो विचार्यावधारणम् (३), सर्वाण्याख्यातजानि कानि-चिदेवानेकधातुजान्यपीति मन्त्राणामर्थवत्त्वानर्थवत्त्वे विचार्य

शास्त्रारम्भप्रयोजनद्वारेणार्थवत्तावधारणम् (४), पदविभागपरिज्ञानप्रतिज्ञानबोधावलम्बिप्रदर्शनाय आदिमध्यान्तानेकदैवतलिङ्गसङ्कीर्णेषु मन्त्रेषु याज्ञिकपरिज्ञानद्वारेण देवतापरिज्ञानप्रतिज्ञा (५), अर्थज्ञप्रशंसा (६), अनर्थज्ञावधारणम् (७), वेदवेदाङ्गव्यूहः (८), सप्रयोजननिघण्टुसमाम्नायविरचनम् (९), प्रकरणत्रयविभागेन नैघण्टुकप्रधानदेवताभिधानप्रविभागलक्षणम् (१०), निर्वचनलक्षणद्वारेण शब्दवृत्तिविषयोपदेशः (११), अर्थप्राधान्यात् लोपोपधाविकारवर्णलोपविपर्ययोपदेशेन सामर्थ्योपप्रदर्शनायादिमध्यान्तलोपोपधाविकारवर्णलोपविपर्ययाद्यन्तवर्णव्यापत्तिवर्णोपजनोदाहरणचिन्ता (१२), अन्तस्थान्तर्धातुनिमित्तेन सम्प्रसार्य्यासम्प्रसार्य्योभयप्रकृतिधातुनिर्वचनोपदेशः (१३), भाषिकप्रायोवृत्तिभ्यो नैगमशब्दार्थप्रसिद्धिः (१४), नैगमप्रायोवृत्तिभ्यो भाषिकशब्दार्थप्रसिद्धिः (१५), देशव्यवस्थया शब्दरूपव्यपदेशः (१६), तद्धितसमासनामनिर्वचनलक्षणम् (१७), शिष्यलक्षणम् (१८), विशेषेण व्याख्यया तत्त्वपर्यायभेदसङ्ख्यासन्दिग्धोदाहरणान्निर्वचनव्यवस्थया नामाख्यातोपसर्गनिपातानां विभागेन नैघण्टुकप्रकरणानुक्रमणम् (१९), अनेकार्थानवगतसंस्कारानुक्रमणम् (२०), परोक्षकृतप्रत्यक्षकृताध्यात्मिकमन्त्रलक्षणम् (२१), स्तुत्याशीःशपथाभिशापाभिख्यापरिदेवनानिन्दाप्रशंसादिभिर्मन्त्राभिव्यक्तिहेतूपदेशः (२२), निदानपरिज्ञानव्याख्यापनायानादिष्टदेवतोपपरीक्षणायाध्यात्मोपदेशप्रकृतिभूमत्वम् (२३), इतरेतरजन्मत्वम् (२४), स्थानत्रयभेदशः-तिसृणामेकैकस्यामाहाभाग्यकृतोऽनेकनामधेयप्रतिलम्भः (२५),

पृथगभिधानन्तूत्पत्तिसम्बन्धाद्वा (२६), देवतानामाकारचिन्तनम् (२७), भक्तिसाहचर्य्यसंस्तवकर्मसूक्तभाक्त्वहविर्भाक्त्वव्यञ्जनभाक्त्वानि (२८)—(३३), पृथिव्यन्तरिक्षद्युस्थानदेवतानामभिधेयाभिधानव्युत्पत्तिप्राधान्यश्रुत्युदाहरणम् :(३४), तन्निर्वचनविचारोपपत्त्यवधारणानुक्रमेण व्याख्याय दैवतप्रकरणनिर्णयः (३५), विद्यापारप्राप्त्युपायोदेशः (३६), मन्त्रार्थनिर्वचनद्वारेण देवताभिधाननिर्वचनफलं देवताताद्ध्याम् (३७)—इत्येष समासतो निरुक्तशास्त्रचिन्ताविषयः ॥

तस्यैषा गवाद्या देवपत्न्यन्ता पञ्चाध्यायी सूत्रसंग्रहः। सा च पुनरियं साक्षात्कृतधर्मेभ्यो महर्षिभ्य उपदेशेन मन्त्रार्थमुपश्रुत्य श्रुतर्षिभिरवरशक्तिदौर्बल्यमवेक्ष्य तदनुजिघृक्षया वाच्यार्थसामर्थ्यादभिधेयानुन्नीय मन्त्रार्थावबोधाय छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाता। सैषा छन्दोऽवयवभूता छन्दोधर्मिण्येव यथा-यथापन्नस्तागौर्गौर्धर्मा इति ॥

---

* श्रीसीतारामाभ्यां नमः *

पूर्वषट्कः ।

—:o:—

अथ निरुक्तम् प्रथमाध्यायस्य

प्रथमपादः ।

॥ ॐ॥ समाम्नायः सामाम्नातः स व्याख्यातव्यस्तमिमं समाम्नायं निघण्टव इत्याचक्षते निघण्टवः कस्मान्निगमा इमे भवन्ति छन्दोभ्यः समाहृत्य समाहृत्य समाम्नातास्ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौपमन्यवोऽपि वा हननादेव स्युः समाहता भवन्ति । यद्वा समाहृता भवन्ति तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति तन्नैतन्नामाख्या-तयोर्लक्षणं प्रदिशन्ति भावप्रधानमाख्यातं सत्वप्रधानानि नामानि तद्यत्रोभे भावप्रधाने भवतः पूर्वापरीभूतं भाव-माख्यातेनाचष्टे व्रजति-पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तं मूर्त्त

सत्वभूतं सत्वनामभिर्त्र ज्या पक्तिरित्यद इति सत्त्वानामुपदेशः ॥ १ ॥

अयञ्च तस्या द्वादशाध्यायी भाष्यविस्तरः। तस्य इदमादिवाक्यम्—"समाम्नायः समाम्नातः"—इति। गवादिर्देवपत्न्यन्तः शब्दसमुदायः समाम्नाय उच्यते। समाङ्पूर्वस्य म्नातेरभ्यासार्थस्य कर्मणि कारके समाम्नायः। समभ्यस्यते मर्य्यादयाऽयमिति समाम्नायः। स च ऋषिभिर्मन्त्रार्थपरिज्ञानायोदाहरणभूतः पञ्चाध्यायी शास्त्रसग्रहभावेन एकस्मिन्नाम्नाये ग्रन्थीकृत इत्यर्थः॥

तस्य किमिति? "स व्याख्यातव्यः"। स च यो [यः]। समाम्नातः छन्दस्येवावस्थितो गवादिभिरन्यैर्वा निरुक्तैर्यैः समाम्नातः। अयञ्च एतस्मिन्निरुक्ते स एष उभयलक्षणोऽपि व्याख्यातव्यः॥ आह, कथमेतद्गम्यते असमाम्नातव्याख्यानमप्यत्राभिप्रेतमिति? समाम्नानार्हाणां वा किमर्थमसमाम्नानमिति उच्यते—निर्वचनलक्षणोपदेशात्। निर्वचनप्रसक्तानाञ्चमृगकर्णदक्षिणालक्ष्मीनिघण्टुभद्राश्वःशब्दप्रभृतीनामेवमाद्यानां निर्वचनोपदेशात् ज्ञायतेऽसमानव्याख्यानमप्यत्राभिमतमिति। यत्पुनरेतदुक्तं समाम्नानार्हाणां वा किमर्थमसमाम्नानमिति। अत्र ब्रूमः,—न हि समाम्नानार्हाणामन्तोऽस्ति, तेषां सर्वेषां समाम्नाने शास्त्रान्त एव न स्यात्, अतश्चाध्ययनश्रवणज्ञानशक्तिहानदोषः प्रसज्येत। शक्यश्च तावल्लक्षणोद्देशोदाहरणभूतनिघण्टुशब्दसमवायेनाधीतवेदेन मेधाविना तपस्विना लक्षणविनियोगार्थच्छन्दोदैवतनिदानविदाभियुक्ते-

नागमवता मन्त्रार्थोऽभ्यूहितुमित्येतावानेन निघण्टुषु शब्दसमुदायः समाम्नातः। तस्मादुपपन्नमसमाम्नातव्याख्यानमप्यत्राभिमतमिति। असमाम्नानञ्च सर्वेषां शास्त्रातिगौरवभयादिति। "व्याख्यातव्यः" विभज्य इमान्यत्र नामानि, इमान्याख्यातानि, उपसर्गा इमे निपाता इमे, इदं सामान्यलक्षणम्, इद्द विशेषलक्षणम्, इमान्येकार्थानि, इमान्यनेकार्थानि, इमान्यवगतसंस्काराणि, इदमभिधानम्, इदमभिधेयम्, इदमभिधानस्य निर्वचनमित्येवंविधया मर्य्यादया परिपाट्या यथासमाम्नात आख्यातव्यो निर्वक्तव्य इत्यर्थः॥

"तमिमं समाम्नायं निघण्टव इत्याचक्षते"। तं च योऽसमाम्नातश्छन्दस्येवावस्थितोऽगवादिरन्यैर्वा निरुक्तैः समाम्नातः, तमिमं च निघण्टव इत्याचक्षते। अन्येऽप्याचार्या इति वाक्यशेषः। निरूढाहीयमेतस्मिश्छन्दःसमुदाये सञ्ज्ञेत्यभिप्रायः॥

"निघण्टवः कस्मात्"—इति। निघण्टुशब्दव्युत्पिपादयिषया प्रश्नः॥

निर्विवक्षयेदमाह—"निगमा इमे भवन्ति"। येष्वभिधानिर्वचनप्रारम्भकेष्वाचार्यः अयं यास्को निरुक्तकारः कस्माच्छब्दमुत्तरत्र न कुर्यात्, तेष्वपि व्याख्याकाले कस्मादिति शब्दः समुत्पाद्यः। तथाहि व्याख्यासाफल्यं भवति। निगमा इमे भवन्ति। निश्चयेनाधिकं वा निगूढ़ार्था एते परिज्ञाताः सन्तो मन्त्रार्थान् गमयन्ति ततोनिगमसञ्ज्ञा निघण्टव एव इमे भवन्ति॥

आह,—कः पुनरेतेषु विशेषो येनैत एव ज्ञापयन्तीति। उच्यते,—यस्मादेते गवादयः "छन्दोभ्यः समाहृत्य समाहृत्य

समाम्नाताः"। छदांसि मन्त्राः तेभ्य उपलक्षितसामर्थ्याः समाहृत्य ग्रन्थीकृता इत्यर्थः। आह,—कस्मात् पुनरेतावन्त एव ग्रन्थीकृता इति। उच्यते,—इतो यस्मादेतैरेव छन्दस्यवस्थितैरभिनिविष्टधियामपि मेधाविनां तपस्विनां लक्षणविनियोगार्षच्छन्दोदैवतनिदानविदामपि सतां मन्त्रार्थपरिज्ञानायोद्यमभङ्गः क्रियते, दुःपरिज्ञानत्वात् तेषाम्, एतेषु परिज्ञातेषु अप्रतिबन्धेन शक्यते मन्त्रार्थः परिज्ञातुमिति अत उच्यते त एव ज्ञापका भवन्तीति। अतश्चैत एवोन्नीतसामर्थ्याः समाहृत्य समाम्नाता इति॥

समाम्नानमात्रमेव दर्शयति। प्रकरणगताश्च नित्या एवैत इति गम्यते। "ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौपमन्यवः। उदाहृताः समाम्नाताः निर्वचनप्रसङ्गतो निरुच्यन्ते। य एते समाम्नाता गवादयः त एते मन्त्रार्थनिगमयितृत्वादुभयेऽपि निगन्तवः सन्तो निगमनाद्धेतोर्निघण्टव उच्यन्त इत्यौपमन्यवः। इत्येवमर्थनिगमयितृत्वान्निगन्तव एते सम्पन्नाः सन्तोऽतिपरोक्षवृत्तिना शब्देन गकारस्थाने घकारं कृत्वा तकारस्थाने च टकारं कृत्वा वर्णव्यापत्त्यादिलक्षणम्। अथाप्यादिविपर्यय इत्येवमादि तदेतत्परोक्षातिपरोक्षवृत्तिषु यथासम्भवं द्रष्टव्यम्। त्रिविधा हि शब्दव्यवस्था,—प्रत्यक्षवृत्तयः, परोक्षवृत्तयः, अतिपरोक्षवृत्तयश्च। तत्रोक्तक्रियाः प्रत्यक्षवृत्तयः, अन्तर्लीनक्रियाः परोक्षवृत्तयः, अतिपरोक्षवृत्तिषु शब्देषु निर्वचनाभ्युपायः। तस्मात्परोक्षवृत्तितामापाद्य प्रत्यक्षवृत्तिना शब्देन निर्वक्तव्याः। तद्यथा,—निघण्टव इत्यतिपरोक्षवृत्तिः, निगन्तव इति परोक्षवृत्तिः,

निगमयितार इति प्रत्यक्षवृत्तिः। यस्मान्निगमयितार एते निगन्तव इति निघण्टव इत्युच्यते। उक्तञ्च,—"वर्णागमो वर्णविपर्य्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्" ॥ वक्ष्यति चायमपि,—वर्णविपर्ययवर्णव्यापत्तिलक्षणम्। त एते निगन्तवः सन्तो निघण्टव उच्यन्ते। इत्येवमतिपरोक्षवृत्तयो निर्वक्तव्याः। प्रायेण चोणादिषु परोक्षवृत्तयः शब्दाश्चिन्त्यन्ते। तत्र तेषां लक्षणमुपेक्षितव्यम्। येषामपि लक्षणं नास्ति, तेषामपि तत्र कल्प्यम्। अपरिसमाप्ता ह्युणादय इति लक्षणविदः प्रतिजानते सर्वथापि लक्षणासम्भवे पृषोदरादिपाठसिद्धिरेव द्रष्टव्या। तत्र हि यथाध्ययनमेव शब्दाः साधीयांसो भवन्त्यभिव्याहारानभिघाताय इति हि लक्षणविदो मन्यन्ते। इत्यौपमन्यवः आचार्यो मन्यत इति वाक्यशेषः। उपरतमन्युरुपमन्युस्तस्यापत्यमौपमन्यवः। कीर्त्तिप्रथनार्थमौपमन्यवग्रहणम् ॥

"अपि वाऽऽहननादेव स्युः समाहता भवन्ति"। अपि चैवं यथोक्तम्। अपि चैवमन्यथा निघण्टवः स्युः। कथमिति? आहननादेव। न निगमनादित्यभिप्रायः। विद्यमानमपि निगमनमविवक्षितमेतस्मिन् पक्षे। अनेकक्रियायोगेऽपि हि सति काञ्चिदेव क्रियामङ्गीकृत्य नामधेयप्रतिलम्भो भवति। तदुत्तरत्र वक्ष्यामः। आह, किमेतेष्वाहतमिति? उच्यते,—समाहता भवन्ति। समः स्थाने नीत्येष नियुक्तः। दर्शयिष्यति चायमुपसर्गव्यत्ययं निरित्येष समित्येतस्य स्थाने इति। आङ् विद्यमानएवाभ्याहतो मर्यादार्थप्रकाशनाय हन्तेः पाठार्थे वर्त्तमानस्यानेकार्थ-

त्वाद्धातूनां वर्णव्यापत्त्या आघशब्दवत् हकारस्थाने थकारः। अथ कोऽर्थः एतस्मिन् पञ्चाध्यायीसंग्रहे मर्यादया पठिता ह्येते भवन्ति ? तस्मात्समाहृताः समाहन्तव एते सन्त उपसर्गव्यत्ययोपसर्गाध्याहारवर्णव्यापत्तिभिर्निघण्टव इत्युच्यन्ते। प्रसिद्धश्च पाठार्थे हन्तेः प्रयोगः, एवं हि वक्तारो भवन्ति—'ब्राह्मणे इदमाहृतम्' 'सत्रे इदमाहृतम्'—इति। अर्थप्राधान्यादर्थनिर्वचनवशेन शब्दविपरिणामोऽयं प्रदर्शितः॥

"यद्वा, समाहृता भवन्ति"। पूर्ववदेवोपसर्गव्यत्यय उपसर्गाध्याहारोऽत्रापि। धातुस्तु हरतिरत्र। यत् यस्मादित्यर्थः। यस्माद्वा एते समाहृता भवन्ति छन्दोभ्यः, तस्मात् समाहरणक्रियायोगात् समाहर्त्तवः एते समाहृता. सन्तः पूर्ववदेवोपसर्गव्यत्ययाद्विक्रमेण निघण्टव इत्युच्यन्ते। एतस्मिन्नपि निगमनसमाहननक्रिये निघण्टुषु विद्यमाने अर्थविवक्षिते कृत्वा समाहरणक्रियायोगहेतुको नामधेयप्रतिलम्भ उक्तः। एवमेष निघण्टुशब्दो गमेर्वैकोपसर्गात् हन्तिहरतिभ्यां वा न्युसर्गाभ्यां निरुक्तः॥

आह,—किमयं पुनरतिमहान् यत्न एकस्मिन्नभिधाने अनेकधात्वर्थनिर्वचनकृत इति ? उच्यते,—इह तावत् सर्वाण्याख्यातजानि नामानीति सिद्धान्तः, सत्याख्यातजत्वेऽभिधेयस्था या क्रिया लक्ष्यते, तदभिधानसमर्थे परोक्षवृत्तौ वा तदभिधायिनि-रूढिशब्दे धातुरुपकृतः, स च पुनः स्ववर्णक्रियासामान्येन. तत्रैवं सति रूढिशब्दे यावन्तो धातवः स्वलिङ्गं रूढ़िगतं वर्णयन्ति तावन्तः सङ्गृह्य स रूढिशब्दो निर्वाच्यः। किं कारणम् ?

विशेषलक्षणव्यवस्थाभावात्। न हि तत्र विशेषलक्षणव्यवस्था काचिदस्ति योऽयमेकोऽवतिष्ठेत, अन्ये व्यावर्त्तेरन् अपि चोक्तं वार्त्तिककारेण। "यावतामेव धातूनां लिङ्गं रूढ़िगतं भवेत्। अर्थश्चाप्यभिधेयस्यस्तावद्धिर्गुणविग्रहः"—इति। रूढ़िशब्दगताच्च धातूनां रूढ़िशब्दवाच्येऽर्थे क्रियायोगे सति एतद्भावे तु क्रियाया रूढ़िशब्दे वर्त्तमानमपि धातुलिङ्गमकिञ्चित्करम्। स एव क्रियाभावः तदाश्रयनिर्वचनव्यावर्त्तको भवति। ता एताः तिस्रः क्रिया निगमनसमाहननसमाहरणाख्याः निघण्टुषु विद्यन्ते, तदभिधायिन्यपि च रूढ़िशब्दनिरुच्यमाने गमिर्हन्तिर्हरतिश्चाहम्पूर्विकया सन्निपत्य वदन्ति'—'ममानुरूपं मयैतं निर्व्यूहि' 'मयैतं निर्व्यूहि' इति। गमिस्तत्र गकारमात्मीयं व्यापन्नं मन्यते घकारं तथा हन्तिहर्त्ती हकारं व्यापन्नं घकारं मन्यते। तस्मादयमनेकैर्धात्वर्थैर्निघण्टुशब्दो निरुक्त एवज्ञातीयाभिधाननिर्वचनप्रदर्शनाय॥

"नद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति"। इहैतावदेवोक्तं समाम्नायो निघण्टव इति, समाम्नायशब्दपर्य्यायप्रसक्तस्य च निघण्टुशब्दस्य व्युत्पत्तिरुक्ता, न तु निघण्टुशब्दस्यार्थतत्त्वमवधारितं, तदवधार्य्यत इति पर्य्युपयुक्तस्तच्छब्दः। किं पुनस्तदिति? यान्येतानि चत्वारि पदजातानि, या एताश्चतस्रः पदजातयः। क? लोके वेदे च। कतमानि तानि? नामाख्याते चोपसर्गनिपाताश्च। किन्तेषामिति? इमानि चत्वार्य्यपि पदजातानि सन्त्येतस्मिन् शास्त्रे। किमिति निघण्टुसञ्ज्ञानि भवन्ति? नित्यमेवानु-

विधीयमानानि भवन्तीत्याह। न कदाचिदपि न भवन्ति, नित्यं भवन्त्येवेत्यभिप्रायः॥ चत्वारीति चतुर्ग्रहणमवधारणार्थम्, नैकं पदजातं, यथार्थः पदमैन्द्राणामिति, नापि द्वे, यथा सुवन्तं तिङन्तश्च, नापि त्रीणि, निपातोपसर्गावेकतः कृत्वा, नापि पञ्च, षड्वा, यथा गतिकर्मप्रवचनीयभेदेनेति॥ पदजातानीति पदगणा इत्यर्थः। जातशब्दो हि गणे प्रसिद्धः। तद्यथा। गोजातमश्वजातमिति। तद्वदिहापि। तत्र, नामपदगणः, स्त्रीपुन्नपुंसकलिङ्गप्रविभागेन, तथाऽऽख्यातपदगणः, कर्तृवचनभावचनकर्मवचनप्रविभागेन, तथोपसर्गगणः, आङादिः, तथा निपातगणः, इवादिः। एवमभिप्रेत्योक्तं चत्वारि पदजातानीति। अत्र नामाख्यातयोः पूर्वमभिधानं प्राधान्यात्, अप्राधान्याद्उपसर्गनिपातानां पश्चात्। उभे अपि नामाख्याते निपातोपसर्गनिरपेक्षे अपि सती स्वमर्थं ब्रूतः, न तूपसर्गनिपातानां नामाख्यातनिरपेक्षाणामर्थोऽस्ति। वक्ष्यति हि,—"न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः"—इति। वाच्ये, न चैते अर्थेनार्थवती। द्योत्ये, नोपसर्गनिपाता इति वाप्राधान्यम्। नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्तीति। तस्माद्उपपन्नं भवति प्राधान्यान्नामाख्यातयोः पूर्वमभिधानम्, अप्राधान्याच्च पश्चाद्उपसर्गनिपातानामिति। 'नामाख्याते इतीतरेतराकाङ्क्षत्वमुभयोर्नामाख्यातयोः समासेनाभिधानम्। कथमितरेतराकाङ्क्षत्वमिति? यज्ञदत्त इति हि नामशब्दस्तावदेव साकाङ्क्षो भवति, यावत् पचति पठति इत्याद्याख्यातशब्दैर्न निराकाङ्क्षी-

क्रियत इति, तथा पचतीत्याख्यातशब्दस्तावदेव साकाङ्क्षो भवति, यावन्न यज्ञदत्तशब्दः पचति यज्ञदत्त ओदनमिति, इतरेतराकाङ्क्षित्वमुभयोर्नाख्यातयोः, समानकार्य्यत्वं चैतयोर्लक्ष्यते। वाच्येनार्थेनार्थवत्त्वमित्यर्थः समस्येते नामाख्याते इति। नाम्नः पूर्वनिपातोऽल्पाच्तरत्वात्। नामपदवाच्यर्थाश्रयक्रियोपलक्ष्यत्वाच्चाख्यातस्य पश्चान्निपातः उपसर्गनिपाता इति। उभयेषामुपसर्गनिपातानां नामाख्यातयोरर्थविशेषद्योतकत्वात् समानकार्य्यत्वमित्यतः समस्यन्ते। आख्यातसहयोगित्वादुपसर्गाणामाख्यातानन्तरं पाठः, परिशेषाणां निपातानां पश्चात् अपरिमिताश्च निपाता इति॥

"तत्रैतन्नामाख्यातयोर्लक्षणं प्रदिशन्ति"। तत्र तस्मिन्, लोकवेदप्रसिद्धे पदचतुष्टये निघण्टुशब्दसमानसञ्ज्ञोपलक्षिते, ये [तावन्नामाख्याते तयोस्तावदेतल्लक्षणं प्रदिशन्ति। कतमत्? यदेतद्वक्ष्यमाणमित्यभिप्रायः। प्रदिशन्ति - प्रविभज्येदं नाम्नां लक्षणमिदमाख्यातस्येत्येवं दिशन्ति उपदिशन्त्याचार्या इति वाक्यशेषः। आह, लक्षणोपदेशः कस्मात्? अनुक्रमणेनैव सिद्धत्वात्। अनुक्रमणेनैव हि वक्ष्यति "इमानि पृथिवीनामधेयान्येकविंशतिः (२, २, १०)" "हिरण्यनामान्युत्तराणि पञ्चदश (२, ३, १)" कान्तिकर्माण उत्तरे धातवोऽष्टादश (३, २, १०)", गतिकर्मण उत्तरे धातवो द्वाविंशं शतम् (३, २, १०)"—इति। तत एव विज्ञास्याम इमानि नामानीमान्याख्यातानीति। तस्माद्ययमनर्थको लक्षणोपदेशः? नानर्थकः। कस्मात्? अथापि हि लक्षणं

समाम्नातान्यसमाम्नातानि च व्याप्य वर्त्तते। यत्पुनरेतदुक्तमनुक्रमणादेव विज्ञास्याम इति। अत्र ब्रूमः,—निर्देशोऽसौ न हि लक्षणम्, निर्देशश्च परिच्छिन्नविषयः। स तर्हि किमर्थ इति? शास्त्रे रूपस्वभावोपप्रदर्शनार्थः। तस्मादसमाम्नातार्थोऽयमादितो लक्षणोपदेशो युक्त इत्युपपन्नम्॥

आह,—तात्पर्य्येणैवेदमन्तरेण समाम्नातवदसमाम्नातानि कस्मान्नोपदिश्यन्ते, अपि च तथा सूपदिष्टानि भवन्तीति? उच्यते,—तथाह्युपदेशगौरव भवति, ग्रहणशक्तिहानञ्च। अपि-चोक्तम्। "ऋषयो ह्युपदेशस्य नान्तं यान्ति पृथक्तशः। लक्षणेन तु सिद्धानामन्तं यान्ति चिपश्चितः॥"—इति। तस्मादुपदेशगौरवभयाद् ग्रहणशक्तिहानदोषाच्च समानलक्षणोपदेशः क्रियते इति।

आह,—किं पुनस्तल्लक्षणमिति? उच्यते,—"भावप्रधानमाख्यातं, सत्त्वप्रधानानि नामानि"। नामपदवाच्यार्थाश्रय-क्रियाव्यङ्ग्यो भावः। पाकरागत्यागाख्यः। स यत्र प्रधानं, गुणभूता क्रिया, तदिदं भावप्रधानम्। किं पुनस्तदिति। आख्यातम्। आख्यायतेऽनेन गुणभावेन वर्त्तमाना अनेककारक-प्रविभक्ता स्फुरमाणेव प्रधानद्रव्यभावाभिव्यक्त्युन्मुखीभूता क्रिया। तस्याश्च प्राधान्येन प्रवर्त्तमानो भावः स्वात्मलाभप्रधान इत्याख्यातः।

आह,—कथं पुनर्गुणभूता क्रियेति? उच्यते,—तदर्थत्वात्। तदर्था हि सा। भावार्था भावसिद्ध्यर्थमात्मलाभमनुभूय

कारकेषु तण्डुलादौ पाकाख्यं भावमभिनिष्पाद्यावसितप्रयोजनैकदेश एव तिरोभवति। यस्य च यदर्थं आत्मलाभस्तत्तद्गुणभूतं भवति। भावसिद्ध्यर्थश्च क्रियाया आत्मलाभस्तस्माद् गुणभूतेति गम्यते। भावसिद्ध्यैव चानुमीयते क्रिया परोक्षापि सती॥

आह,—कथं पुनः परोक्षा क्रियेति? उच्यते,—न हि सेन्द्रियाणामन्यतमेन स्वरूपस्था सती कदाचिदपि सन्निकृष्यते। किं तर्हि? तदवसाने योऽभिनिष्पद्यते भावः, तेन लिङ्ग्यते। नूनमभिनिर्वृत्ता क्रिया यथा भावोऽयमभिनिष्पादित इति नाभिनिर्वृत्ता चेद्भविष्यद् यथैव सा क्रियानिर्वृत्तेर्नाभवद्यं भावः, एवं साम्प्रतमपि नाभविष्यत्, अस्ति चायम्। तस्मादभिनिर्वृत्ता क्रियेत्येवमनुमीयते। तदेतदाख्यातं क्रियावाचकमपि सद्भावार्थत्वात् क्रियाया भावं प्रधानमुच्यत इति एवमेके मन्यन्ते। एके पुनर्भावप्रधानमाख्यातमिति प्रकृत्यर्थप्रधानमिति मन्यन्ते। प्रकृत्यर्थविशेषणं हि प्रत्ययार्थादय इति। भावः, कर्म, क्रिया, धात्वर्थः, इत्यनर्थान्तरम्। स यत्र प्रधानं गुणभूतानि साधनानि तद्धि भावप्रधानम्। किं पुनस्तत्? आख्यातम्। आख्यायन्ते स्त्रीपुन्नपुंसकानि क्रियागुणभावेन वर्त्तमानान्यनेन क्रिया च तेषामुपरि प्राधान्येन वर्त्तमानेत्याख्यातम्॥

आह,—कथं पुनरत्र क्रियायाः प्राधान्यमिति? उच्यते,—सा ह्यत्र शब्दवाच्या। अर्थगृहीतानि तत्साधनानीति। अतः प्राधान्यमत्र क्रियायाः। इतश्च प्राधान्यम्। कुतः? विशेष-

प्रत्ययाधानात्। पचतीति प्रथमपुरुषैकवचनान्ते आख्यात-शब्दो वर्त्तमानकालकर्तृविषयो यत्किञ्चिदविवक्षितविशेषमेव पक्त्रादिसाधनमात्मन आश्रयभावेनोपलक्षयन्नेककियाशक्ति-मत्यपि पक्त्रादौ साधने पचिक्रियायामेव विशेषप्रत्ययमादधाति, नान्यासु क्रियासु, नापि विशिष्टे पक्त्रादौ साधने। यश्च यस्मिन्नर्थे विशेषेण वर्त्तते शब्दः, स एव तस्य प्रधानम्। विशेषेण च क्रियायामाख्यातशब्दो वर्त्तते, गुणभावेन कारके। तस्माद्विशेष-प्रत्ययाधानाद्भावप्रधानमाख्यातमित्युपपन्नम्। अपि च क्रिया-व्यापारविज्ञानपरतया पृष्टः—'किं करोति देवदत्तः'? क्रियाख्यान-परतयैव प्रत्याचष्टे—'पचतीति'। न त्वोदनमिति पूर्वमुक्त्वा ततः पचतीति ब्रवीति॥

अथ कथमुच्यते भावप्रधानमाख्यातमिति? शृणु,—अमूर्त्ता हि क्रिया निरुपाख्या, सा हि कारकैरभिव्यज्यमाना कारकशरीरे च सती शक्यते निर्देष्टुम्। इतरथा हि अशरीरा सती सा न गृह्येत, अग्रहणे च सति कथमिव निर्दिश्येत। तत्रैवं सति कारकसमूहेनाभिव्यज्यमाना क्रिया यस्मिन् साधने विशिष्टमात्मीयं कार्य्यमारभते पाकाख्यं तदभिधानशब्दोपपदैव साक्षाद् ग्रहणा-सम्भवान्निर्दिश्यते। न ह्यनाश्रिता कदाचिदपि गृहीतपूर्वाकृतिरिति साक्षाद् ग्रहणासम्भवः। तस्मादोदनकर्मकार्य्या देवदत्तकर्तृकौ-दनशब्दोपपदैव निर्दिश्यते,—ओदनं पचति देवदत्त इति। तत्रा-विवक्षितस्वार्थ ओदन शब्दः। अपि च क्रियाव्यापारपिपृच्छिष-यैव पृष्टः—किं करोतीति, क्रियाव्यापारमात्रमेव प्रत्याचष्टे—

पचतीति। ततः किमिति, पर्य्यनुयुक्ते शब्दान्तरेणापाकरोति देवदत्त ओदनमिति। तस्माच्छब्दान्तरवाच्यत्वात् साधनस्य पचतीत्यत्र क्रियैव प्रधानमित्युपपन्नम्। यत् पुनरेतदुक्तमोदनमिति पूर्वमुक्त्वेति, तत्र ब्रूमः,—स हि पर्य्यनुयुयुक्षां साधनगतां भाविनीमाशङ्कमानः पर्य्यनुयोगमात्मनो बुद्ध्यवस्थं कृत्वा तदपाकरणार्थमोदनमिति पूर्वं ब्रवीत्येवं तत्रापि द्रव्यविशेषपरिज्ञानार्थो द्वितीयः पर्य्यनुयोगोऽनुक्तो द्रष्टव्यः। तस्मात् पचतीति शब्दवाच्यत्वादत्र क्रियायाः शब्दान्तरवाच्यत्वात् द्रव्यस्य क्रियैव प्रधानमिति। इतश्च न द्रव्यप्रधानमाख्यातम्। एकस्मिन् वाक्ये द्वयोराख्यातयोरसमवायात्। पचतिपठतीत्युभयोः प्राधान्यादितरेतरेण समवायो नास्ति। न हीतरः शब्द इतरत्र गुणी भवति। द्रव्यशब्दे च समवायात्, समवैति द्रव्यशब्देनाख्यातशब्दः। पचति देवदत्त इत्युक्ते पचिक्रियागुणभूतो लक्ष्यते देवदत्तः। तस्मादुपपन्न भावप्रधानमाख्यातमिति। अपिचोक्तम्। "क्रियावाचकमाख्यातं लिङ्लुतो न विशिष्यते। त्रीनत्र पुरुषान् विद्यात् कालतस्तु विशिष्यते"—इति। तत् पुनरेतच्चतुःप्रभेदमाख्यातं भवति। कर्त्तरि, भावे, कर्मणि, कर्मकर्त्तरि चेति। पचतीति कर्त्तरि। भृयते, पच्यते इति भावकर्मणोः। पच्यते स्वयमेवेति कर्मकर्त्तरि। चतुर्ष्वप्यवयवार्थानि द्रव्याण्यप्रधानानीति क्रिया एव प्रधानम्। तामभिदधत् तयैव लक्ष्यमाण आख्यातसञ्ज्ञो भवतीत्युक्तम्। आख्यातजत्वान्नाम्नां प्रतिज्ञाक्रमं भित्त्वा पूर्वमाख्यातलक्षणमुक्तम्, पश्चान्नामलक्षणमुच्यते। किं पुनस्तत्?

सत्वप्रधानानि नामानि। लिङ्गसङ्ख्ययोरत्र सद्भाव इति सत्त्वम्। तथा लक्षणोपपत्तेः। तद्येषु प्रधानं गुणभूता क्रिया नामान्येव तानि। नमन्त्याख्यातशब्दे गुणभावेन, नमन्ति वा स्वमर्थमाख्यातशब्दवाच्ये गुणभावेनेति नामानि। यथैव ह्याख्याते विद्यमानमपि द्रव्यमविवक्षितमेवमिहापि विद्यमानापि क्रिया अविवक्षिता। द्रव्यपरत्वात्सत्वशब्दस्य तद्विक्रियाजनितमुत्तरकालं क्रियाशेषभूतमभिधाय धात्वर्थोऽसौ व्यावर्त्तते॥

आह,—कथं पुनर्नाम्नि क्रिया विद्यत इति, विद्यमानापि वा विवक्षितेति? उच्यते। प्रकृतिः, प्रत्ययः, विभक्तिरिति त्रेधा विभज्यमानमेतावद्देवैतन्नाम। तत्र प्रकृतिर्धातुरित्येकोऽर्थः। धातुश्च पुनः क्रियावचनः स च नाम्नि विद्यत इति तदभिधेयभूतया क्रियया भवितव्यम्। यथावश्यं यत्रार्थस्तत्र तदभिधायकः शब्दः, यत्र शब्दस्तत्र तद्वाच्योऽर्थ इति। सम्बुद्धौ हि शब्दार्थौ वाच्यवाचकत्वेन नित्यमिति। एवं तावत् क्रिया विद्यते यत् पुनरेतदुक्तं—विद्यमानापि क्रिया कथमविवक्षितेति? अत्र ब्रूमः, —नाम्नि यो धातुः सकृत् प्रयोजयति तेन प्रातिपदिकेनाभिभूतक्रियाभिधानशक्तिः प्रातिपदिकान्तर्लीनवृत्तिरेव स्वमर्थमुद्भावयितुमशक्नुवन् प्रातिपदिकार्थमेवानुवर्त्तमानो द्रव्यप्रधान एव भवतीत्येवं न विवक्षिता क्रिया। सा तु विद्यमानापि विगृह्यमाणे नाम्नि प्रातिपदिकनिबन्धनादुन्मुच्यमाना द्रव्यगतमर्थं प्रकाशयति, न प्राग्विग्रहादिति द्रव्यपरता सत्वशब्दस्य गम्यते। ; तथाचोक्तम्। "शब्देनोच्चारितेनेह येन द्रव्यं प्रतीयते। तदक्षरविधौ युक्तं

नामेत्याहुर्मनीषिणः ॥"— इति। पुनश्चोक्तम्। "अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः। तन्नाम कवयः प्राहुर्भेदे वचनलिङ्ग्योः॥ निर्देशः कर्म करणं प्रदानमपकर्षणम्। स्वाम्यर्थोऽप्यधिकरणं विभक्त्यर्थाः प्रकीर्त्तिताः॥"—इति। स्त्रीपुन्नपुंसकभेदं निपातोपसर्गाणामपि वा क्वचिन्नामत्वमपेक्ष्य बहुवचनेनोक्तं नामानीति। अपरे पुनर्भावकालकारकसङ्ख्याश्चत्वार एतेऽर्था आख्यातस्य। तेषां भावप्रधानता भवति। अतो भावप्रधानमाख्यातमित्युक्तम्। नाम्नोऽपि सत्ता द्रव्यं सङ्ख्या लिङ्गमित्येतेऽर्थाः। तेषां द्रव्यं प्रधानमित्यतः सत्वप्रधानानि नामानीत्युक्तम्॥

एवमेके मन्यन्ते,—"तद्यत्रोभे भावप्रधाने भवतः"। एवं तावदनयोर्नामाख्यातयोः परस्पराविनाभूतयोः स्वपदार्थोक्तावेकस्य भावप्राधान्यमेकस्य सत्त्वप्राधान्यम्। अथ पुनर्यत्रैते उभे भवतः। क्व च पुनरेते उभे भवतः? वाक्ये। तत्र कस्य प्रधानमर्थः, कस्य गुणभूत इति? शृणु,—भावप्रधाने भवतः, तस्य चिकीर्षितत्वात्। वाक्ये ह्याख्यातं प्रधानं, तदर्थत्वात् गुणभूतं नाम। तदर्थस्य भावनिष्पत्तावङ्गभूतत्वात्। एवं तावदाख्यातं वाक्ये प्रधानम्॥

अथ पुनः कथमभिनिर्वर्त्त्यमानो भाव आख्यातेनोच्यते? किं वा तदाख्यातमिति? यतो लोकप्रसिद्ध्यैवोदाहरति। तत् प्रसिद्धत्वाच्छब्दार्थसम्बन्धस्य। "पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजतिपचतीत्युपक्रमप्रभृत्यपवर्गपर्य्यन्तम्"। अपूर्वमनपरं सन्तमेकत्वात् पूर्वापरीभूतं पूर्वापरमिव पौर्वापर्य्येणावस्थितमेक-

मनेकासु क्रियासु आश्रितमुपानदधिनहनपूर्वोत्तरपदविहरणपथि-भोजनशयनासनोदकपानाद्यास्वाश्रितं तदभिनिर्वृत्तिवशेनाभिनिर्वर्त्तमानं कस्मैचित् पृच्छते किं करोति? अन्य आचष्टे व्रजतीति। अविभक्तकर्तृकं द्वितीयमिति उदाहरणद्वयं भावद्वयोपप्रदर्शनार्थम्। उपक्रमप्रभृतीति। उपक्रम आरम्भस्तस्मादारभ्यापवर्गपर्य्यन्तं यावदन्त्या क्रियेत्यर्थः॥

आह,—अन्त्यासन्निधौ भावनिर्वृत्तिदर्शनादन्त्ययैव निर्वर्त्त्यत इति? शृणु, पूर्वासामभावे अन्त्यैव न स्यात्, पूर्वापेक्षं हि तस्या अन्त्यात्वम्। अपि च। प्राप्तिफलो हि व्रजतिर्न चैकया क्रियाऽभिमतदेशान्तरे प्राप्तिरस्ति। तस्मादुपक्रमाद्याभिः क्रियाभिरीपद्भिनिष्पाद्यमानो भावोऽन्त्यायामभिसन्तिष्ठते। ततः सन्निकर्षे गृह्यते न त्वसावन्त्ययैव निर्वृत्त इत्यन्ते गृहीतः। अपि च, प्रसिद्धमेतदुपक्रमादारभ्य यच्च व्रजितं, यच्च व्रज्यते, व्रजिष्यमाणं, तत्सर्वमेकीकृत्य वक्तागो भवन्ति व्रजति देवदत्त इति न प्रसिद्धिरुपरोद्धं न्याय्या। यथावस्थितानां हि शब्दानामन्वाख्यानमात्रमेव शास्त्रेण क्रियते, नोत्पाद्यन्ते शब्दाः, नाप्यर्थेषु विधीयन्ते। तस्मात् प्रसिद्धशास्त्रसमयोऽपि लौकिकप्रसिद्ध्यैव पूर्वापरीभूतं भावमाख्यातेनाचष्टे, व्रजतिपचतीत्युपक्रमप्रभृत्यपवर्गपर्य्यन्तम्। तस्मादुपपन्नमनेकक्रियाभिर्निर्वर्त्त्यमानो भाव आख्यातेनोच्यत इति। आह च "क्रियासु वह्नीष्वभिसंश्रितो यः पूर्वापरीभूत इवैक एव। क्रियाभिनिर्वृत्तिवशेन सिद्ध आख्यातशब्देन तमर्थमाहुः॥"—इति॥

"मूर्त्तं सत्वभूतं सत्वनामभिः"। कदाचित् तु तमेव भावं तथैवोपक्रमप्रभृत्यभिनिर्वर्त्तमानममपवर्गपर्य्यन्तं मूर्त्तं सत्वभूतं सत्वरूपिणं लिङ्गसङ्ख्यायुक्तैः सत्वनामभिराचष्टे ॥

कथम् ? "व्रज्या पक्तिरिति"। तत्रोक्तो विशेषः। कृदभिहितो भावो द्रव्यवद्भवति सोऽयं प्रयुक्तस्य लक्षणस्य प्रयोगमपेक्ष्य क्वचिदपवादः। आह च। "क्रियाभिनिर्वृत्तिवशोपजातः कृदन्तशब्दाभिहितो यदा स्यात्। सङ्ख्याविभक्तयव्ययलिङ्गयुक्तो भावस्तदा द्रव्यमिवोपलक्ष्ये ॥"—इति ॥

आह,—कस्मात् पुनरेक एव भावस्तिङन्तेन कृदन्तेन चान्यथोच्यत इति ? उच्यते,—शब्दस्वाभाव्यादृते नान्यदत्र प्रयोजकमस्ति। अपिचोक्तमस्माभिरवस्थितानामेव शब्दानामभिधानाभिधेयसम्बन्धेनाभिसम्बन्धानामेव नित्यमन्वाख्यानमात्रमेव क्रियते। नोत्पाद्यन्तेऽर्थेषु वा विधीयन्ते शब्दा इति। व्रज्यापक्तिरित्युदाहरणद्वयमुक्तप्रयोजनम् ॥

"अद इति सत्वानामुपदेशः" इति। भावोऽधिकृतः। स च पुनः सत्वभूतो नेतरः, यतस्तत्सम्बन्धेनैव नाम्नो यदवशिष्यते तदुच्यते। किं पुनस्तत् सामान्यविशेषवाचित्वम् ? तत्राद इति सत्वानामुपदेशः। सामान्यत इति वाक्यशेषः। सर्वेषामपि सत्वानामध्ययने प्राप्ते लिङ्गाविशिष्टत्वादिदमेवैकमुदाहृतमुपप्रदर्शनार्थम् ॥ १ ॥

आह,—विशेषोपदेशः कथमिति ? उच्यते खण्डसूत्रम्,—

गौरश्वः पुरुषो हस्तीति भवतीति भावस्यास्ते शेते व्रजति तिष्ठतीतीन्द्रियनित्यं वचनमौदुम्बरायणस्तत्र चतुष्ट्वं नोपपद्यते युगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः शास्त्रकृतो योगश्च व्याप्तिमत्वात्तु शब्दस्याणीयस्त्वाच्च शब्देन सञ्ज्ञाकरणं व्यवहारार्थं लोके तेषां मनुष्यवद्वचता-भिधानं पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे ॥ २ ॥

"गौरश्वःपुरुषो हस्तीति"। सत्त्वानां विशेषोपदेश इति वाक्यशेषः ॥ सोपाधिकनिरुपाधिकोपप्रदर्शनार्थमनेकोदाहरणम्। सामान्यवृत्त्या विशेषवृत्त्या चोभयथा शब्दः प्रवर्त्तत इत्युभयमुप दर्शितम् ॥

"भवतीति भावस्य"। सामान्येनोपदेशः। अत्र हि सर्वेषां सत्तावाचिनामध्ययने प्राप्ते भवतिरेवैक उदाहरणार्थः परिगृहीतः। विद्यमानत्वमेवानुभवन्तः सर्वे भवतिशब्दवाच्या अन्याभिर्विशेष-क्रियाभिरभिसम्बन्ध्यन्ते। तस्माद्भवतीति सर्वक्रियाप्रसववीज-भूतमस्तित्वमात्रमेव निरुपपदेन भवतिशब्देनोच्यत इत्युपपन्नं भवति। सामान्यवाचित्वं विशेषनिर्देशः ॥

कथमिति? उच्यते,—"आस्ते शेते व्रजति तिष्ठतीति"। सकर्मकाकर्मकोपदर्शनार्थमुभयेषामुदाहरणम् ॥

"इन्द्रियनित्यं वचनमौदुम्बरायणस्तत्र चतुष्ट्वं नोपपद्यते"। आह,—इह तावदुक्तं पदचतुष्टयम्। भाववचनता, द्रव्यवचनता,

गुणभावः, प्रधानभावः. पूर्वापरीभावः, सामान्यवाचित्वं, विशेषचाचित्वमिति। नोपपद्यते। कस्मात्? वचनानित्यत्वात्। कः पुनरेवमाहाऽनित्यं वचनमिति? उच्यते,—इन्द्रियनित्यं वचनमिति। इन्द्र आत्मा, स येन ईयते लिङ्ग्यते अनुमीयते चास्त्यसावात्मा कर्त्ता, यस्येदं करणम्, नाकर्त्तृकं करणमस्तीति, तदिन्द्रियम्। तस्मिन्नित्यमिन्द्रियनित्यम्। किं पुनस्तत्? वचनम्। उच्यते अनेनेति वचनं वाक्यमित्यर्थः। कतमत्? यदेतन्नामाख्यातोपसर्गनिपातात्मकम्। औदुम्बरायणः आचार्य्यो मन्यत इति वाक्यशेषः। उदुम्बरस्यापत्यमौदुम्बरिः, तस्यापत्यमौदुम्बरायणः॥

आह, ततः किमिति? उच्यते,—तत्र तस्मिन् वाक्ये एवमिन्द्रियनित्ये सति यदेतत् पदचतुष्ट्वमुक्तमेतन्नोपपद्यते कस्मात्? शृणु,—यावदेव वक्तुर्वागिन्द्रिये वचनम्, तावदेव तदस्तीति शक्यते वक्तुं, प्रच्युतं च नास्ति। अपि च। वाक्यमपि वाक्यं समस्तमुद्भूतं तदिन्द्रियेणावतिष्ठते। यदवयवभूतानि पदान्यवस्थितानि परिसङ्ख्यातुम्। न च विनष्टाविनष्टयोः पदयोः सह परिसंख्यानमस्ति। तस्माद्वचनानित्यत्वात् पदचतुष्ट्वानुपपत्तिरित्युपपन्नम्॥

किं चान्यत्,—"अयुगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः"। वाशब्दः समुच्चयार्थो "वा विकल्पोपमानद्वन्द्वसमुच्चयार्थेष्विति" हि निपातविदः पठन्ति। वक्ष्यति चायमपि। "वेति विचारणार्थे"—इत्युपक्रम्य "अथापि समुच्चयार्थे भवति"—

इति (१, २, ३)। एवं चैतेषामयुगपदुत्पन्नानां शब्दानां वाक्यावयवभूतानां योऽयमितरेतरोपदेशः। इतरेतरगुणप्रधानभावो नाम्न आख्यातं प्रति गुणभावेनोपदेशः। आख्यातस्य च नाम प्रति प्रधानभावेनोपदेशः। अयं च नोपपद्यते इत्यनुवर्त्तते। किं कारणं? न हि विनष्टं नाम गुणभावमियादाख्याते, नापि नष्टमाख्यातं प्रधानभावमियान्नाम्नि। न हि विनष्टाविनष्ट्योरितरेतरगुणप्रधानभावोऽस्ति किं वान्यतः॥

"शास्त्रकृतोयोगश्च"। यश्चायं शास्त्रकृतो योगः शास्त्रदृष्टः शब्दस्य शब्दान्तरेण योगः। तद्यथा। उपसर्गस्य धातुना, धातोः प्रत्ययेन, प्रत्ययस्य लोपागमवर्णविकारैः। अयं वचनानित्यत्वान्नोपपद्यते। किं कारणं? अयुगपदुत्पत्तौ हि सत्यां धातुरुच्चारितो विनष्टः स वायमुपसर्गेण योक्ष्यते, प्रत्ययेन वा। न हि विनष्टाविनष्ट्योर्योगोऽस्ति। तस्माच्च एव नामाख्यातयोरितरेतरगुणः प्रधानभाव उपसर्गनिपातानां नामाख्याताभ्यां योगे, यच्च पदचतुष्टयमुक्तं, सर्वमेतदसम्यगिति। युगपदुत्पन्नानामयुगपदुत्पन्नानामित्येवमारभ्यमाणयोर्वाक्ययोरन्यो व्याख्यामार्गो भवति। नोपपद्यते। युगपदुत्पन्नानामयुगपदुत्पन्नानामित्युभावपि व्याहारौ प्राप्नुतः। समानसंहितत्वात्। इन्द्रयनित्यत्वात् पदचतुष्ट्वानुपपत्तिरित्युच्चारयता शङ्काद्वारेणैतदवतार्य्यते,—युगपदुत्पन्नानामिति। अथ मतम्,—"अविचालिन एवैते कूटस्था अविनाशिनः शब्दास्ते तु कल्पान्ते"। तस्माद्व्याप्तिरूपाद्विशीर्णेष्वभिधेयेष्वभिधातृषु कारणभावमापद्यमानेष्वाश्रयाभावादेवावस्थातुम-

शक्नुवत अभिधेयाभिधातृसहिता एव कारणात्मभावमधिकमनुभूयाभिसंस्तवकाले कल्पादावन्यकल्पविशिष्टकर्मनिर्जितकार्य्यकारणसर्वभूतसाधारणात्मभूते हिरण्यगर्भे विवर्त्तमाने तद्बुद्धिमाश्रयं प्राप्यते, नैव सह युगपदेवाभिव्यज्यन्ते विशेषात्मलाभाय शब्दा इति। अत्र ब्रूमः,—एवमप्येतेषां युगपदुत्पन्नानां युगपदुत्पत्तावपि सत्यां यद्यपि पदचतुष्टयं प्राप्नोत्येव सहावस्थितानां, तथापीतरेतरोपदेश इतरेतरगुणप्रधानभावश्च न प्राप्नोति। न हि युगपदुत्पन्नयोर्गोविषाणयोरितरेतरगुणप्रधानभावोऽस्ति। किं चान्यत्,—कूटस्थेषु चाविचालिषु नित्येषु शब्देषु य एव शास्त्रकृतो योगः, स एष नोपपद्यते। किं कारणम्? अयुक्तो हि युज्यते, नित्यं युक्ता हि धातव उपसर्गैः प्रत्ययैश्च, प्रत्ययाश्च लोपागमवर्णविकारैरिति। तस्मान्नित्यपक्षेऽपि वचनस्य तदेतदुपवर्णितम्। गुणप्रधानभावाद्विपदचतुष्टयमधिकृत्य सर्वमेतदसम्यगिति॥

"व्याप्तिमत्त्वात्तु शब्दस्य"। उच्यते,—सर्वमेतदुपपद्यते, कस्मात्? व्याप्तिमत्त्वाच्छब्दस्य। व्यापनं व्याप्तिः, सा यस्मिन्नस्ति, सोऽयं व्याप्तिमान् शब्दः, तद्भावो व्याप्तिमत्त्वम्। तस्माद् व्याप्तिमत्त्वाच्छब्दस्य सर्वमेतदुपपद्यत इति वाक्यशेषः। आह,—कथं पुनर्व्याप्तिमान् शब्द इति? शृणु,—शरीरे ह्यभिधानाभिधेयरूपा बुद्धिर्हृदयान्तर्गताकाशप्रतिष्ठितयोरभिधानरूपाभिधेयरूपयोर्बुद्ध्योर्मध्येऽभिधानरूपया शास्त्राभिमतप्रयोजनविजिज्ञापयिषया बुद्ध्या पुरुषेण तदभिव्यक्तिसमर्थेन स्वगुणभूतेन प्रयत्नेनोदीर्य्य-

माणः शब्दः उरःकण्ठादिवर्णस्थानेषु निष्पद्यमानस्तया पुरुषार्था-
भिधानसमर्थवर्णादिभावमापद्यमानः पुरुषप्रयत्नेन वहिर्विनिश्चिनो-
ऽविनाशिनि व्यक्तिभावमापन्नः श्रोत्रद्वारेणानुप्रविश्य प्रत्याय्यास्य
बुद्धि सर्वार्थरूपां सर्वाभिधानरूपां व्याप्नोतीत्येवं व्याप्तिमान् शब्दः।
आह,—ततः किं यदि व्याप्तिमाञ्छब्दः ? उच्यते,—यदि नित्यो
यदा नित्यः पदचतुष्ट्वादि सर्वमुपपद्यत एव। किं कारणम् ?
न ह्यसंव्याप्य पुरुषस्य बुद्ध्यस्थमर्थप्रत्ययमादधीत, न चानवस्थितो
व्याप्नुयात्। ततश्च किम् ? स शब्दः स्वमर्थमभिदधत् स्वक्रि-
याप्रवेशोपजनितेनाभिधानेनाख्यातमित्येवमादिना स्वमात्मानम-
भिसम्बध्य तिरोभवितुमुपक्रमते, विनाशञ्चोपेति। तस्य स्वदेशो-
पजनितैराख्यातादिभिः स्वप्रदेशविशेषानुस्मृतिपूर्वकं परिसंख्यान-
मुपपद्यत एव। तस्मात्सम्यगेवोक्तम्। यत् पुनरेतदुक्तं न हि
विनष्टाविनष्टयोः परिसङ्ख्यानमस्तीति। अत्र ब्रूमः,—पुरुष-
प्रयत्नोपजनिताद्वक्त्रोद्घातात् परस्यार्थप्रत्ययमाधाय शब्दव्यक्तय
एव ध्वंसन्ते, न तु शब्दाकृतयः। तास्तु तयाभिधानशक्त्या
बुद्धिद्वारेणावस्थिताः स्वानर्थान् प्रकाशयन्त्यः स्थिता एव
भवन्ति। तासु साक्षात्पदपरिसङ्ख्यानं वर्त्तमानमितरासु विना-
शिनीषु व्यक्तिषु लक्षणयोपचर्य्यते। तस्माद् व्याप्तिमत्त्वाच्छब्दस्य
पदचतुष्ट्वादि सर्वमुपपद्यत एव। व्याप्तिमत्त्वादित्यनेनैवेतरेत-
रोपदेशः प्रत्युक्तः। शास्त्रकृतो योगश्च। नामाख्यातपदरूप-
बुद्धित्वे सत्त्वेक्रियाविषये गुणप्रधानभावेनातिष्ठेत्। तयोर्गुण-
प्रधानभावे सति तच्छब्दे लक्षणयोपचर्य्यते। तथाच धातुरूपा

बुद्धिस्तदर्थया संयुज्यते। बुद्धिरेव हि धात्वादिरूपेण विपरिणममाना शास्त्रेण संस्क्रियते। तस्यां संस्क्रियमाणायां शब्दे संस्कारोपचारः क्रियते। तद्भिधायकत्वाच्छब्दस्य। तत्र यदुक्तं वचनानित्यत्वादितरेतरोपदेशः, शास्त्रकृतस्य योगो नोपपद्यत इत्येतदयुक्तमिति। नित्यत्वपक्षेऽपि युगपदुत्पन्नानां गुणप्रधानभावो गोविषाणवन्नास्तीति यदुक्तम्, अनैकान्तिकोऽसौ दृष्टान्तः। द्रष्टो हि युगपदुत्पन्नयोः एककाले राजपुत्रामात्यपुत्रयोर्गुणप्रधानभावः। तत्र यदुक्तं युगपदुत्पन्नानामितरेतरोपदेशो न प्राप्नोतीत्येतदयुक्तं, व्याप्तिमत्वाच्छब्दस्य सर्वमुपपद्यत इति, तदेव सम्यगिति॥

अपरो व्याख्यामार्गः।—इन्द्रियनित्यत्वात्पदचतुष्ट्वानुपपत्तिस्तदाश्रयस्य च सर्वस्येत्येवमाक्षिप्ते परिहारपक्षेणेदमवतार्य्यते। युगपदुत्पन्नानां वा शब्दानामितरेतरोपदेश इति। अत्र समञ्जस एव वाशब्दः। कथम्? अयुगपदुत्पन्नानां वा युगपदुत्पन्नानां वा नित्यानां वा अनित्यानां वेत्यर्थः। इतरेतरोपदेशः, इतरस्येत्याख्यातस्य क्रियावचने शब्देऽभिधानत्वेनोपदेशः, इतरस्य च नामशब्दस्य सत्ववचने शब्देऽभिधानत्वेनोपदेशः। शास्त्रकृतो योगश्च। लक्षणशास्त्रेण चैते क्रियासत्वे आख्यातनामशब्दाभ्या युज्येते। तस्मादुपपद्यते पदचतुष्ट्वमिति॥

आह,—आगमनमात्रमेतत्। हेतुरुच्यतां, कथं विनष्टाविनष्ट्योः सह परिसङ्ख्यानम्, अवस्थितयोर्वा गुणप्रधानभाव इति? उच्यते,—व्याप्तिमच्चात् तु शब्दस्य। हेत्वर्थः समान एव पूर्वेण॥

आह,—यदि व्याप्तिमत्त्वाच्छब्दस्य व्यवहारार्थं पदचतुष्ट्वमुपादीयते, एवमपि नोपादेयम्। किं कारणम्? अभिनया अपि व्याप्तिमन्तः, पाणिविहाराक्षिनिकोचादयः, तैरेव कार्य्यसिद्धिरस्त्विति। अपि चैवं पदचतुष्टयदोषैर्न सम्भक्ष्यामहे, न चायमतिमहान् वेदसमुद्रः पठितव्यो भविष्यति क्लेशेनेति। उच्यते,—स्यादेतदेवं यद्ययमपरो विशेषहेतुर्न स्यात्। कतमः?

"अणीयस्त्वाच्च शब्देन सञ्ज्ञाकरणं व्यवहारार्थं लोके"। सत्यम्। अभिनया अपि व्याप्तिमन्तः, न त्वणीयांसः, ते महता यत्नेन व्याप्नुवन्ति, न च निःसन्दिग्धं कुर्वन्ति। तत्प्रतीतशब्दार्थसम्बन्धस्यैव नेतरस्य शब्दस्त्वपरिमितमर्थमल्पीयसा यत्नेनोच्चारितो व्याप्नोति। तस्मादणीयस्त्वादिति विशेषहेतूपपत्त्या शब्देनैव सञ्ज्ञाकरणं व्यवहारार्थं लोके इत्युपपन्नम्। यत् पुनरेतदुक्तमध्ययनदोषैर्न सम्भक्ष्यामहे, न चायमतिमहान् वेदसमुद्रोऽध्येतव्यो भविष्यतीति। अत्र ब्रूमः,—अभ्युदयो ह्यत्र वेदानुरूप एव भवति, अभ्युदयार्थं नः शास्त्रारम्भे यत्नः॥

"तेषाममनुष्यवद्देवताभिधानम्"। आह,—एवं तावन्मनुष्याणां मनुष्येषु शब्देन चतुर्द्धा भक्तेनावबोधकरणम्। अथ मनुष्याणां वेदेषु हविः सम्प्रदानाशीः प्रार्थनादिव्यवहारः केनेति? उच्यते,—तेषामेव शब्दानामियमेव व्यवस्था देवेष्वपि देवानपिप्रति। कतमा? मनुष्यवद्देवताभिधानमिति। मनुष्येण तुल्यं मनुष्यवत्, देवताभिधानमभिहितुरभिधानम्। यथैव हि मनुष्याः प्रयोजनेषु नामाख्यातोपसर्गनिपातैर्यथार्थमभिदधाति।

एवमेव देवा अपि। देवेष्वपि शब्दस्याभिधानेनापि शक्तिरपरिहीनेत्यभिप्रायः। तेऽपि हि मनुष्यवद्देवा अङ्गादियुक्ताः पौरुषविधिकैरङ्गैः कर्मभिश्च संस्तूयन्त इति हि वक्ष्यति तस्मादुपपद्यते मनुष्यवद्देवताभिधानमिति ॥

आह,—यदि नामाख्यातोपसर्गनिपातानामपरिहीना शक्तिर्देवानप्यभिधातुमथ किमर्थं वेदे मन्त्रः समाम्नातः। इत्युच्यते,—"पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे"। पुरुषेषु मनुष्येषु विद्यायाः विज्ञानस्यानित्यत्वात् पुरुषविद्यानित्यत्वाद्धेतोः कर्मसम्पत्तिः फलेन सम्पादनं अविगुणकर्मसम्पत्तिः, फलसम्पन्नमेव कर्म भविष्यतीत्येवमर्थं वेदे मन्त्रः समाम्नात इति वाक्यशेषः। इतरथा हि पुरुषेषु विज्ञानस्यानित्यत्वाद्यथार्थं नाभिदधते देवान्नामाख्यातोपसर्गनिपातैरशिक्षितत्वान्मन्दशिक्षितत्वाद्विस्मरणशीलत्वाद्वा देवानामपराध्ये यथावत् प्रयुञ्जानाः नामाख्यातोपसर्गनिपातान्। ततश्च सर्वार्थप्रत्यक्षदृशो देवाः स्वल्पमप्ययथावदभिधानं न मर्षयन्ति। विगुणमेतदिति विद्याऽनित्यत्वात्तदभावेनेयुः कर्मणि। ततश्च देवताहीनं कर्मफलं सम्पद्यते। न च केवलं फलासम्पत्तिः। किं तर्हि? दुरिष्टहेतुको दोषोऽपि स्यात्। तस्मादेत एव नामाख्यातोपसर्गनिपाताः प्रयोगानुपरिपाटीविनियमार्थं मन्त्रत्वेन वेदे समाम्नाताः। नहि नामाख्यातोपसर्गनिपातान् परित्यज्य मन्त्राः सन्ति। एतदेव चतुर्विधं पदजातं प्रयोगानुपरिपाट्या कयाचिदवस्थितं मन्त्रा इत्युच्यन्ते।

आह,—कथमनित्यत्वं विद्यायाः पुरुषेष्विति? उच्यते,—

इह तु न वाक्यविरचनानुक्रमेण अर्थवस्त्वनुप्रेष्यते, मनुष्य एवमेतद् ब्रूयात्—'त्वं गन्तुं देवदत्तमिति'। स तेनैव वाक्यविरचनानुक्रमेण बद्धमपि सन्तमर्थं न शक्नोति प्रतिपादयितुम्। एवमनित्यत्वं विद्यायाः पुरुषेषु। तददोषं वा मनुष्यान् प्रति; सर्वेषामेव मनुष्याणामनित्यत्वाद्विद्यायाः। अयमपि हि येन वाक्यानुक्रमेण वक्ति मनुष्यः कञ्चिदर्थं, न तेनैव श्वा शक्नोति वक्तुम्। तन्न यदुक्तं—किमर्थं मन्त्रो वेदे समाम्नात इति। इदं न युक्तम्। पुरुषविद्यानित्यत्वात्कर्मफलसम्पत्त्यर्थं मन्त्रो वेदे समाम्नात इति। नह्यविचारितमेव विज्ञायते। अत इदमाह। पदचतुष्टयमाक्षिप्य पक्षप्रतिपक्षशो विचार्य्य अवधारितम्। विषयाश्चाक्षेपप्रसङ्गेनैवास्य परिक्षिप्ताः। देवमनुष्यव्यवहारार्थमेतदिति। तदेतत्सर्वमपि चोदकवशेन प्रसक्तानुप्रसक्तमुक्तम्। भावस्तु प्रकृतो यतस्तच्छेषमधुना वर्णयिष्यामः। स च पुनरुभयात्मा भावः। कार्य्यात्मा कारणात्मा च। तयोर्यः कार्य्यात्मा तमधिकृत्योक्तम्,—"क्रियानिर्वर्त्त्योऽर्थः स भावः, क्रियैव वा भावः"—इति। इदानीं कारणात्मा भावो निरूप्यते। कथं क्रियाद्रव्ययोः स्वात्मस्थो विशेषः कार्य्यात्मप्रध्वस्तयोः पुरुषोपभोगसन्तानोपक्षये कार्य्यात्मभावातीतः, येनात्मभावेन सदनमात्राभिसम्बन्धिना प्रलयकालेऽवतिष्ठते, सोऽत्यन्ताविनाशधर्ममात्र आत्मा भाव इत्युच्यते।

आह,—कथमयमिह प्रसक्तः? शृणु,—तद्विकारा एव हि द्रव्यगुणकर्मभावेनावस्थिताः सन्तो नामाख्यातोपसर्गनिपातैरभि-

धीयन्ते। स्थितिकाले असावपि च प्रहीणसर्वविशेषभवनमात्र-क्रियाभिसम्बन्धी सन् व्यावृत्तसर्वोपपदाभ्यां नामाख्यातशब्दाभ्यामुच्यते भवतीति भाव इति च शब्दगतत्वादपोढसर्वविशेषाभ्येतामवस्थामेतौ शब्दावास्कन्दतः। यत एतयोरेव साधारण्यार्थमयमिह प्रसञ्जितः पदचतुष्ट्वाधिकरणे।

आह,—प्रधानमेतत् स्यात्। किं कारणम्? तद्भावे न ह्येतज्जगद्वतिष्ठते प्रलयकाल इत्येके मन्यन्ते। तच्च नैव। किं कारणम्? भावविकार एव हि सोऽय पदशब्दवाच्यत्वात् प्रधानभाव इति ह्युच्यते। पुरुषस्तर्हि? तत्राप्ययमेव हेतुः, अनुपक्षीणशक्तित्वात्। एतेनैव ईश्वरपरमाण्वादिभावाः प्रत्युक्ताः। ईश्वरभावः परमाणुभाव इति सोपपदत्वात्। शून्यं तर्हि? तदपि न। यस्माच्छून्यशब्देऽपि भावशब्दासङ्गदर्शनम्, न ह्यसत्यर्थे शब्दः प्रयुज्यते। शब्दो हि शब्दस्यार्थेन सम्बन्धः। किञ्चित्तदस्ति यच्छून्यमिति। लोके हि प्रसिद्धं गृहं शून्यं, ग्रामः शून्यः, शून्ये शब्दमहत्त्वे इति। तस्मान्न शून्यशब्देनाभाव एवोच्यते। किं तर्हि? अपेक्षाकृतं शून्यत्वमिति। भावशब्द एवात्रोपपदत्वेन युक्त इति चेत्, न, प्रयोगाप्रसिद्धेः। न हि अभावे भाव इति प्रसिद्धः प्रयोगः। न च प्रयुज्यमानोऽपि भावशब्दो भावशब्द एवोपपदत्वेन प्रधानादिशब्दवत् कञ्चिद्विशेषप्रत्ययमादधाति। तस्मात् सर्वोपपदहीनस्य भवतेरात्मभावेनेदं जगन्नित्यम्, इतरैस्तु भावविकारैः परमाण्वादिभिर्भावविकारात्मभिरनित्यम्। कस्मात्? विकारात्मकत्वादेव। विकारो

ह्यनित्यः, तमेवं भवनमात्राभिसम्बन्धेन प्रहीणसर्वभावविकारम् एतत्सद्भावविदोऽवधृतवेदान्तरहस्यसम्पदः परावरविदो मेधाविन आत्मवेदविदो न कृत्स्नकारितया युक्ताधिकारबन्धना एतत्परिज्ञानादेवोपक्षीणकर्मोपभोगसन्तानाः सन्त आत्मकामाः प्रतिपद्यन्ते। नेतरे प्रधानादिविदः। वेदानुशासनैकदेशानीश्वरपुरुषप्रधानादीननित्यान् भावविकारान् स्वमतिकल्पनाहेतुव्यवहितान् मत्वा स्थिरीकृत्यानेन प्रतिपद्यन्ते भवनमात्राभिसम्बन्धेन तदेतस्मादात्मन उद्विजन्त आत्मप्रकाशकान्तर्याम्ययं चित्सन्तानमिव मन्यमानाः। केचिच्च शक्तिहानादसम्बाधनादेव। स एष इह वेदाङ्गैर्वेदार्थनिर्वचनाभिनिवेशशब्दानां सामान्यविशेषवृत्त्युपदेशप्रसङ्गे प्रवर्त्तमाने भवतेः कृदन्तीभूतस्य भवनमात्रमेव वक्तुं सामर्थ्यम्, नेतरान् भावविकारान् विद्यमानानपीति। एतेन प्रसङ्गेनात्र संसूचितो वेदरहस्यो ब्राह्मणैः ॥ २ ॥

तत्र विस्तरेणायं विधीयते,—

षड् भावविकारा भवन्तीति वार्ष्यायणिर्जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति जायत इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधत्यस्तीत्युत्पन्नस्य सत्त्वस्यावधारणं विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारं वर्द्धत इति स्वाङ्गाभ्युच्चयं सांयौगिकानां वार्थानां वर्द्धते विजयेनेति वा वर्द्धते शरीरेणेति वाऽपक्षीयत

इत्येतेनैव व्याख्यातः प्रतिलोमं विनश्यतीत्यपरभावस्या-दिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति ॥३॥

"षड् भावविकारा भवन्तीति"। अपि च लक्षणविदो विगृह्णन्ति भावशब्दं भवतेः, स्वपदार्थे भवनं भाव इति। "सन्मात्रं भावलिङ्गं स्यात्"—इति पठन्ति। तस्य विकाराः भावविकाराः, भवन्तीति सामान्यादात्मनः प्रस्कन्दा इव सन्तत्त्वेन वैशेषिकेण भावविकारात्मलाभाय भवन्ति। इतिपरः प्रयुज्यमानः शब्द-पदार्थकः ॥

क एवमाह "षड् भावविकाराः"—इति ? उच्यते,—"वार्ष्यायणिः"—इति। तिकादिपाठात् फिञ्। आचार्य्य इति वाक्यशेषः ॥ निर्देशात उपलब्धानां षडित्यवधारणं सुखार्थम्। अतोऽन्ये भावविकारा एतेषामेव भावविकारा भवन्तीति ॥

आह,—कतमन्तदिति? उच्यते,—"जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति" ॥

आह,—एतेषां जन्यादीनां भावविकारशब्दानां कः कस्यां विकारावस्थायामवस्थितं भावमाचष्टे, कं वा विद्यमानमपि नाचष्टे, कं वा न प्रतिषेधतीति ? उच्यते,—"जायत इति पूर्व-भावस्यादिमाचष्टे, नापरभावमाचष्टे, न प्रतिषेधति"। जनिः पूर्वो भावः, तस्य पूर्वभावस्य षण्णां भावविकाराणां यदि वान्यो यः पूर्वो भावविकारः, तस्य जायत इत्यनेन शब्देनादिमाचष्टे ॥

आह,—किमादिमेव ? नेत्युच्यते। उक्तमुपक्रमप्रभृत्यप-

वर्गपर्य्यन्तमिति। स एवं पूर्वापरीभूतो भावस्तावदेव जायत इत्युच्यते। यावन्निष्ठाशब्दवाच्यः संवृत्तो जात इति। नापरभावमाचष्टे, न प्रतिषेधति। नेति प्रतिषेधे, न परो भावः अपरभावः॥

आह,—कस्मादपरः? पौर्वापर्य्यं हि देशकालकृतम् उच्यते, —जनिशब्दवाच्यो भावविकारः पूर्वः, तस्मादपरकालोऽस्तिशब्दवाच्य.। तत्रैवं सति जनिशब्दवाच्ये भावविकारे अस्तेरप्यर्थोऽस्ति विद्यमानता। किं कारणम्? न ह्यविद्यमानो जायते। अपि च कारणात्मनि भावे सर्व एते भावविकाराः सन्ति। सर्वार्थप्रसवशक्तित्वात्तस्य। यथा पृथिव्यां घटादयो भावविकाराः। ते तु द्वारद्वारिभावेन विशेषात्मलाभं प्राप्नुवन्ति। तद्यथा। जनिद्वारेणास्तिः। अस्तिद्वारेण विपरिणमतिः। किं कारणम्? न ह्यजातोऽस्तीत्युच्यते। नाप्यविद्यमानो विपरिणमत इति। तत्रैवं सति जायत इत्येष शब्दो जन्मैव केवलं ब्रवीत्यविवक्षितेतरभावविशेषम्। किं कारणम्? एकार्थवृत्तित्वाच्छब्दस्य। अस्तिशब्दवाच्यस्य भावविकारस्यासम्पूर्णत्वात्। अनवधृतरूपं हि तस्यामवस्थायां तद्भवत्यनुमानगम्यं किमपि जायत इति। तस्माज्जायत इत्येष शब्दो जायमानावस्थायामस्तित्वं विद्यमानमपि नाचष्टे॥

आह,—यदि नाचष्टेऽर्थादापन्नं भवति प्रतिषेधतीति। उच्यते,—"न प्रतिषेधति"—इति। अस्तित्वस्य न प्रतिषेधं करोतीत्यर्थः। किं कारणम्? उच्यते,—अस्तित्वात्मवानपि

स्यासौ जायेतैतस्मिन् प्रतिषिद्धेऽनात्मक एव स्यात्। कमालम्ब्य जायते? तस्मान्न प्रतिषेधत्यस्तित्वम्। उपस्थितत्वाच्च। उपस्थित एव च प्रत्यासन्नस्तस्यावधारणकाल इत्यतश्च न प्रतिषेधति॥

एवमेव प्रपञ्च उत्तरेष्वपि भावविकारेषु। समासतस्तु यत्र यद्वक्तव्यं तत्र तद् ब्रूमः॥

"अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम्"। अस्तीति जातस्य सत्त्वस्यावधारणमात्रं ब्रवीति, न विपरिणाममाचष्टे अपूर्णत्वात्, न प्रतिषेधत्युपस्थितत्वात्॥

"विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारम्"। विपरिणमत इत्येष शब्दो प्रच्यवमानस्य तत्त्वाद्प्रभ्रंश्यमानस्य तत्त्वात्तद्भावाद्विकारम्। योऽस्य भावोऽस्तित्वं पुरुषत्वं वा, तस्माद्विकारं विक्रियामात्रं ब्रवीति, वृद्धेरर्थमाचष्टे, न प्रतिषेधति॥

"वर्द्धत इति स्वाङ्गाभ्युच्चयम्, सांयौगिकानां वार्थानाम्"। वर्द्धत इत्येष शब्दः. स्वेषामङ्गानां शिरोग्रीवाबाहूदरादीनां, सांयौगिकानां वा हिरण्यधान्याद्दीनाम्, अभ्युच्चयमाह, अभ्युच्चितता ब्रवीति॥

आह,—कथ प्रयोगः? उच्यते,—"वर्द्धते विजयेनेति वा वर्द्धते शरीरेणेति वा"। वर्द्धते विजयेनेति सांयौगिकेषु उदाहरणम्। वर्द्धते शरीरेणेति स्वाङ्गाभ्युच्चये। अत्र वर्द्धत इति ब्रुवन्नपक्षीयतिमाचष्टे, न प्रतिषेधति॥

"अपक्षीयत इत्येतेनैव व्याख्यातः प्रतिलोमम्"। यथैव हि

स्वाङ्गैः सांयौगिकैर्वा द्रव्यैरुपचीयते, तथैवापक्षीयते। तत्रापि नाचष्टे न प्रतिषेधति॥

"विनश्यतीत्यपरभावस्यादिमाचष्टे, न पूर्वभावमाचष्टे, न प्रतिषेधति"। विनाश एवापरभावस्तस्यादिमाचष्टे। किमादिमेव? न इत्युच्यते। उपक्रमप्रभृत्यपवर्गपर्य्यन्तमित्युक्तं, यावद्विनष्ट इति। स च विनाश ब्रुवन् अपूर्वभावमाचष्टेऽपक्षीयतेरर्थं विज्ञातमपि तस्मिन् विनाशे कथं युगपदपक्षीयतेरर्थोविनाशेऽस्तीति? उच्यते,—न ह्यनपक्षीयमाणो विनश्येत्॥ ३॥

अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीति ह स्माह ते यथा वचनमभ्यूहितव्या न निर्वृद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनो नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्त्युच्चावचाः पदार्था भवन्तीति गार्ग्यस्तद्य एषु पदार्थः प्राहुरिमे तन्नामाख्यातयोरर्थविक्करणम्॥ ४॥

आह,—एतेभ्यो भावविकारेभ्यः किमन्येऽपि व्यतिरिक्ताः सन्ति भावविकारा न वा? इत्युच्यते,—"अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीति ह स्माह"। अतो भावविकारषट्काद्येऽन्यत्वेन भावविकाराः लक्ष्यन्ते, ते पृथक् पृथगत्यन्तभिन्नाः सन्ति। किन्तर्हि? एतेषामेव विकारा भवन्ति। तद्यथा—जनिशब्दवाच्यो भावविकारोऽनेकप्रभेदभिन्नोऽनेकपर्य्यायशब्द-

वचनो निष्पद्यतेऽभिव्यज्यते उत्तिष्ठतीत्येवमाद्युपेक्षितव्यम्। तथा अस्तिशब्दवाच्योऽनेकप्रभेदभिन्नोऽनेकपर्य्यायवचनश्च,अस्ति,विद्यते, भवतीत्येवमादि। तथा विपरिणमति शब्दवाच्यो विपरिणमते, जीर्य्यति, भावान्तरमापद्यते इत्येवमादि। तथा वर्द्धतिशब्दवाच्यो वर्द्धते, पुष्यति, उपचीयते, अर्थायत इत्येवमादि। तथा अपक्षीयति शब्दवाच्यो ध्वस्यति, भ्रश्यतीत्येवमादि। तथा विनश्यतिशब्दवाच्यो विनश्यति, म्रियते, विलीयत इत्येवमादि। "इति ह स्माह"। एवमाहावार्य्यो वार्ष्यायणिरित्यनुवर्त्तते॥

"ते यथावचनमभ्यूहितव्याः"। त एते जन्यादिशब्दवाच्याः विकाराः, यथावचनं यो यस्मिन्वचने यथावचनमवस्थिताः सन्तः प्रकरणोपपत्तिभ्यां मन्त्रार्थावधारणं प्रति अभ्यूहितव्याः वितर्क्याः प्रयुज्यमाना इति वाक्यशेषः। सर्व एव धातवो भाववचनास्तेषामिहाध्ययने प्राप्ते शास्त्रातिगौरवभयादेतल्लक्षणमुत्सृष्टम्। इह शास्त्रे व्याख्याशैलीयं द्रष्टव्या,—उद्देशो, निर्देशः, प्रतिनिर्देश, इति। तत्रोद्देशः, सूत्रस्थानीयः। तद्यथा,—षड्भावविकारा इति। निर्देशो वृत्तिस्थानीयः। तद्यथा,—जायतेऽस्ति विपरिणमत इति। प्रतिनिर्देशो वार्त्तिकस्थानीयः। तद्यथा,—जायत इति पूर्वभावस्यादिमावष्टे इति। एवं सर्वत्र यथासम्भवं योज्यम्॥

सानुषङ्गमुक्तं नामाख्यातयोर्लक्षणं, नाम्नस्तु किञ्चिदवशिष्यते, तदवसरप्राप्तमपि सदधुना नोच्यते, पदचतुष्टयलक्षणप्रतिज्ञाव्याघातभयात् उक्त्वा पदचतुष्टयलक्षणं चतुर्थेन पादेन तद्वक्ष्यामः॥

प्रतिज्ञाप्रसक्तमेवाधुनोपसर्गलक्षणमुच्यते॥

आह,—वक्ष्यति भवानुपसर्गलक्षणमिदमेव तावदुक्यताम्, —किमिमे उपसर्गनामाख्यातवत् पदचतुष्ट्वान्निष्कृष्यबद्धाः सतोऽर्थानाहुः ? न इत्युच्यते,—"न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः" । नेति प्रतिषेधे । निष्कृष्य नामाख्यातमध्यात् पदवाक्यरूपेण विरचिताः सन्तः । के पुनस्ते ? उपसर्गाः । आख्यातमुपगृह्यार्थविशेषमिमे तस्यैव सृजन्तीत्युपसर्गाः । "अर्थान्निराहुरिति शाकटायनः" । निश्चयेन सतोऽर्थानाहुः । साक्षान्न तेषामर्थाभिधानशक्तिरस्ति, पृथग्विरचितानामित्यभिप्रायः । यथा वर्णानां पदादपगतानामर्थाभिधानशक्तिर्नास्ति, एवमेतेषामपि नामाख्यातवियोगेऽर्थाभिधानशक्तिर्नास्ति । क एवमाह ? शाकटायनः । शकटस्यापत्यं नडादिपाठात् फक्, शाकटायनः ॥

आह,—कथं तेषामर्थवत्तेति ? उच्यते,—"नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति" । तुशब्दोऽवधारणार्थः । नामाख्यातयोरेव योऽर्थः कर्म, तत्रैव विशेषं कञ्चिदुपसंयुज्य द्योतयन्ति । स एष नामाख्यातयोरेवार्थविशेष उपसर्गसंयोगे सति व्यज्यते । यथा प्रदीपसंयोगे द्रव्यस्य गुणविशेषोऽभिव्यज्यमानो द्रव्याश्रय एव भवति, न प्रदीपाश्रयः ॥

आह,—कोऽन्यथा ब्रवीति येनैवमुच्यते 'शाकटायन एवमाहेति' ? शृणु,—"उच्चावचाः पदार्था भवन्तीति गार्ग्य." । उच्चाश्चावचाश्च उच्चावचाः, बहुप्रकारा इत्यर्थः । एषामुपसर्गपदानामर्थाः पदार्था भवन्ति वियुक्तानामपि नामाख्याताभ्यामिति गार्ग्यः । आचार्यो मन्यत इति वाक्यशेषः । एकैको-

ऽप्येषां प्रादीनां नामाख्यातवियोगेऽपि अनेकार्थ इत्यभिप्रायः। तद्यथा,—प्रेत्यादिकर्मोदीर्णो भृशार्थे इत्यभिधाने शक्तिरस्त्येवेत्येवमाद्युपलक्षितव्यं लक्षणशास्त्रे। यत् पुनरेतदुक्तं वर्णवदिति,, अनभ्युपगमादयुक्तं, न ह्यभ्युपगतमस्माभिरेतदनर्थका वर्णा इति। सामान्या हि वर्णेष्वभिधानशक्तिरस्त्येव। यथा मृदोऽवयवेषु सर्वमृण्मयभाण्डारम्भशक्तिः। सा तु पदत्वेन समुदितानामर्थविशेषेऽवतिष्ठते। यथा मृदोऽवयवानां घटे घटारम्भशक्तिरभिव्यज्यते, एवं तत्र यदुक्तं "वर्णवदनर्थका उपसर्गाः नामाख्यातवियोगात्"—इत्येतदयुक्तम्। अपि च। वर्णैरनर्थकैरारभ्यमाणं पदमप्यनर्थकमेवस्यात्? न ह्यशुक्लैस्तन्तुभिरारभ्यमाणः पटः शुक्लो भवति। ततश्च पदैरनर्थकैरारभ्यमाणं वाक्यमनर्थकमेव स्यात्? वाक्यैश्चानर्थकैरारब्धं शास्त्रमप्यनर्थकमेव स्यात्? ततश्चाभ्युदयनिःश्रेयसार्थो योऽयमभ्युद्यमस्त्यप्रत्ययेन विदुषामयमनर्थक एव स्यात्? अनिष्टञ्चैतत्। तस्मादर्थवन्तो वर्णा इत्युपपन्नम्। यत् पुनरेतदुक्तं 'प्रदीपवदनर्थका उपसर्गाः'—इति। तत्रोच्यते,—प्रदीपोऽपि स्वेनार्थेन प्रकाशाख्येनार्थवानेव सत्यपि चार्थवत्त्वे प्रकाश्यमर्थमाधारभूतं प्रत्याययन् स्वं प्रकाशनशक्तिमभिव्यनक्ति। एवमुपसर्गा अर्थवन्तोऽपि सन्तः स्वार्थाभिधानशक्तिमनेकप्रकारां विद्यमानामपि स्वार्थाभिधानशक्त्याधारभूते नामाख्याते प्रत्याय्य अभिव्यञ्जयेयुः। तत्र यदुक्तं 'प्रदीपवदनर्थका उपसर्गाः' इति, एतदयुक्तम्। नामाख्यातयोरेवासार्थ उपसर्गसंयोगे सति उपजायत इति, तत्र ब्रूमः, न हि लोके

यो यत्र समर्थो भवति, स तत्रान्यमपेक्षते। नामाख्याते चार्थविशेषं प्रत्युपसर्गसंयोगमपेक्षते। तस्मादुपपन्नमुपसर्गस्य क्रियाविशेषोऽर्थः। क्रियासामान्यमात्रमाख्यातस्येति ॥

तत्र यदुक्तम् 'अनर्थकाः पृथगवस्थिता उपसर्गाः'—इति, तदयुक्तम्। कुतः? "तद्य एषु पदार्थः प्राहुरिमे तम्"। तदेतदुपपन्नं भवति। य एषूपसर्गेषु स्वोऽनेकप्रकारोऽर्थ इति प्राहुरेव, तमिमे उपसर्गाः पदविशेषाः पृथगपि सन्तः ॥

कः पुनरसाविति? उच्यते,—"नामाख्यातयोरर्थविकरणम्"। अर्थविक्रियामित्यर्थः। तस्मादर्थवन्त एवेति ॥४॥

आ इत्यर्वागर्थे प्रपरेत्येतस्य प्रातिलोम्यमभीत्याभिमुख्यं प्रतीत्येतस्य प्रातिलोम्यमति सु इत्यभिपूजितार्थे निर्दुरित्येतयोः प्रातिलोम्यं न्यवेति विनिग्रहार्थीयौ उदित्येतयोः प्रातिलोम्यं समित्येकीभावं व्यपेत्येतस्य प्रातिलोम्यमन्विति सादृश्यापरभावमपीति संसर्गमुपेत्युपजनं परीति सर्वतोभावमधीत्युपरिभावमैश्वर्यं चैवमुच्चावचानर्थान् प्राहुस्त उपेक्षितव्याः ॥ ५ ॥

प्रथमाध्यायस्य प्रथमः पादः ॥ १, १ ॥

उच्यतां तर्हि क एषां कस्मिन्नर्थविशेषे वर्तते? उच्यते,—अयं तावत्—"आ इत्यर्वागर्थे"। तद्यथा,—आ पर्वतादिति।

अर्वागिति गम्यते। अनेकार्थत्वेऽपि सत्युपसर्गाणामेकैकोऽर्थ उदाहरणत्वेनोच्यतेऽर्थवत्त्वप्रकाशनार्थम्॥

"प्रपरेत्येतस्य प्रातिलोम्यम्"। प्रपरा-इत्येतावुपसर्गावेतस्यैवाऽर्थस्य प्रातिलोम्यमाहतुः। प्रगतः परागतः॥

"अभीत्याभिमुख्यम्"। आह। अभिगतः॥

"प्रतीनि" "एतस्य" एव अभेः "प्रातिलोम्यम्" आह। प्रतिगत इति॥

"अतिसु-इत्येतावभिपूजिनार्थे" वर्तेते। अतिधनः सुब्राह्मण इति॥

"निर्दुरित्येतयोः प्रातिलोम्यम्"। निर्धनो दुर्ब्राह्मण इति॥

"न्यवेति विनिग्रहार्थीयौ"। निगृह्णाति। अवगृह्णातीति॥

"उदिति" अयमेक एव "एतयोः" द्वयोः "प्रातिलोम्यम्" आह। उद्गृह्णातीति॥

"समित्येकीभावम्" अर्थमाह। संगृह्णातीति॥

"व्यपेत्येतस्य प्रातिलोम्यम्" आहतुः। विगृह्णातिर्विग्रहार्थीयः विगृह्णाति, अपगृह्णातीति॥

"अन्विति सादृश्यापरभावम्" आह। अनुरूपमस्येदमिति सादृश्यम्। अनुगच्छतीत्यपरभावः॥

"अपीति संसर्गम्" आह। सर्पिषोऽपि स्यात्। मधुनोऽपि स्यात्॥

"उपेत्युपजनम्"। उपजायते॥

"परीति सर्वतोभावम्" आह। परिधावतीति॥

"अर्धात्युपरिभावम्" आह। "ऐश्वर्य्यं वा"। अधितिष्ठति, अधिपतिरिति ॥

आह,—नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्तीत्युक्तम्। अत्र नाम्नः कर्मोपसंयोगद्योतका भवन्तीत्येवं न गृह्यते। "उपसर्गाः क्रियायोगे (पा० १, ४, ५९)"—इति प्रसिद्धो ह्युपसर्गाणां क्रियापदेन योगो न नाम्ना। उपसर्गा हि क्रियाङ्गत्वेनैव नामान्यास्कन्दन्तीति ॥५॥

इति जम्बूमार्गाश्रमवासिन आचार्य्यभगवद्दुर्गस्य कृतौ
निरुक्तव्याख्यायां षष्ठस्याध्यायस्य [प्रथमाध्यायस्य]
प्रथमः पादः ॥१॥

—·—

द्वितीयः पादः ॥

अथ निपाता उच्चावचेष्वर्थेषु निपतन्त्युपमार्थेऽपि कर्मोपसंग्रहार्थेऽपि पदपूरणास्तेषामेते चत्वार उपमार्थे भवन्तीवेति भाषायाश्चान्वध्यायश्चाग्निरिवेन्द्र इवेतिनेति प्रतिषेधार्थीयो भाषायामुभयमन्वध्यायन्नेन्द्रन्देव ममंसतेति प्रतिषेधार्थीयः पुरस्तादुपचारस्तस्य यत् प्रतिषधति दुर्मदासो न सुरायामित्युपमार्थीय उपरिष्टादुपचारस्तस्य येनोपमिमीते ॥ १ ॥

"अथ निपाताः"। उक्तमुपसर्गलक्षणं सामान्यम् (३४ पृ०), —"नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति"—इति, विशेषलक्षणमपि (३६-३७ पृ०),—"आ इत्यर्वागर्थे" इत्येवमादि। अल्पा इति कृत्वा च ते प्रत्येकं समाम्नाताः। अधुना सामान्यलक्षणानुपक्तं प्रतिज्ञाप्रसक्तमेव निपातलक्षणं वर्णयिष्यामः। तदधिकारोऽयमथशब्दः॥

"उच्चावचेष्वर्थेषु निपतन्ति"। उच्चावचेष्वनेकप्रकारेष्वर्थेषु निपतन्तीनि निपाताः॥

आह,—कतमे पुनस्ते? उच्यते,—"अप्युपमार्थेऽपि कर्मोपसंग्रहार्थेऽपि पदपूरणाः"। उपमैवार्थ उपमार्थः, तस्मिन्नुपमार्थे। उपमा नाम,—कस्मिंश्चिदेवार्थे यः प्रसिद्धो गुणः, तदन्यस्मिन्नप्रसिद्धस्तद्गुणेऽर्थे शब्दमात्रेण यदुपसंयोज्य तद्गुणप्रकाशनं क्रियते सोपमा। कर्मोपसंग्रह एवार्थः कर्मोपसंग्रहार्थः, तस्मिन् कर्मोपसंग्रहार्थे। अर्थोपसंग्रहार्थे इत्यर्थः। कर्मशब्दो हि प्रायेणार्थपर्यायवचन एतस्मिञ्छास्त्रे। "गतिकर्माण उत्तरे धातवः (३, २, ४)", गत्यर्था इति गम्यते। पदमेव पूरयितव्यं, येषामर्थः, ते पदपूरणाः। तदेतत् त्रिधात्वमर्थभेदकृतं निपातानां समासेन॥

आह,—किमविशेषेण सर्वे एतस्मिन्नर्थे निपतन्ति? नेत्युच्यते। "तेषामेते चत्वार उपमार्थे भवन्ति"। तेषां सर्वेषां मध्ये एते चत्वारः—इव, न, चित्, नू च प्रायोवृत्त्या उपमार्थे भवन्ति॥

अधुनैवमुक्त्वा भाषाच्छन्दःप्रविभागेनोदाहरणमेकैकं दर्शयति। समासविस्ताराभ्यां हि शास्त्राणि प्रतीयन्ते। तत्रार्यं

तावत्,—"इवेति भाषायां च" उपमार्थीयः। "अन्वध्यायञ्च"। छन्दसि चेत्यर्थः। कश्चित् छन्दस्येव भवति, न भाषायाम्, कश्चिद्भाषायामेव, न छन्दसि, कश्चिदुभयत्र, इत्यतो विभागेन प्रदर्श्यते॥

आह,—किमुदाहरणमिवेत्यस्योपमार्थीयस्य? का चोपमाशब्दस्य व्युत्पत्तिरिति? उच्यते,—उपगम्यातथागुणैर्मीयत इत्युपमा। "अग्निरिवेन्द्र इवेति"—इत्येतदत्रोदाहणम्। तपसः पुत्रो मन्युर्नाम, तस्येयमार्षम्॥

आह,—ननु सर्व एवायमृग्यजुःसामाथर्वात्मको ब्रह्मराशिरादित्यान्तरपुरुषस्यभगवतो हिरण्यगर्भप्राणस्यार्षमैतरेयके रहस्यब्राह्मणे "शतर्चिनो मध्यमाः"—इत्येवमाद्यनुपरिक्रम्य पुनः पर्य्यावृत्त्य "एतमेव सन्तं शतर्चिन इत्याचक्षत एतमेव सन्तं गृत्समद इत्याचक्षते"—इत्येवमादिना क्रमेण मन्त्रद्रुक् शब्दान् प्राणे निगमयति। अथापीदृशः,—शौनकेन सन्दृष्टा, यस्यामार्षाणि विद्यन्ते। सा च स्मृतिः। श्रुतिस्मृत्योर्विरोधे श्रुतिरेव गरीयसी'—इति न्यायविदः। खल्वपि पठन्ति—"विरोधे त्वनपेक्षं स्यात् (जै० सू० १, ३, ३)"—इति। तस्माद्विशेषाभिधानमनर्थकमेवेति? उच्यते,—न ह्येकस्मादात्मनः परिशेयमात्रशेषः सन् शौनकः कुर्य्यात्, पश्यतो ह्यु भावपि। तेन क्षेत्रज्ञावुभावपिमन्त्राभिव्यक्तौ व्यापृतौ। बुद्धिदेवतात्वेन हिरण्यगर्भः क्षेत्रज्ञोऽवस्थितः, सर्वभूतानां कर्मविपाकानुरूप्येण। यमर्थं शब्दं वा दर्शयति। तदितरोविशिष्टकर्मकारी क्षेत्रज्ञो बुद्धिस्थः पश्यति। तत्रैवं सति वसिष्ठादिर्मन्त्रद्रुक् क्षेत्रज्ञः। तेनैवोपदर्शितं मन्त्रं

पश्यतीत्युभयमुपपद्यते। एवं सत्युभावपि याथात्म्यतस्तावदनुसन्धेयौ मन्त्रप्रयोगकाले उभयोरर्थवत्त्वाय॥ यत् पुनरेतदुक्तं भवति, श्रुतिस्मृत्योर्विरोधे श्रुतिरनपेक्ष्येति। न हि विरोधोऽस्त्युभयोरपि सन्धीयमानयोः। अपि च श्रुतिपूर्वकमेवेदं स्मरणं, न स्वतन्त्रम्। ताण्डके हि रहस्यब्राह्मणं दर्शयति,—"यत् साम्नास्तोष्यन् स्यात्, तत्सामोपधावेत्। यस्यामृचि तामृचम्। यदार्षं तमृषिम्"—इति। तत्र यदुक्तं स्मृतिरियमिति, तदयुक्तम्। तस्माद्वक्तव्यमेव विशिष्यार्षमिति॥

त्रिष्टुब्येषा, मान्यवी, श्येनादिषु निष्केवल्ये शस्यते। "अग्निरव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि। हत्वाय शत्रून् भजस्व वेद ओजो मिमानो वि मृधो नुदस्व॥" (ऋ० सं० ८, ३, १६, २)। मन्युः पुनरिन्द्र एव, "मन्यु रिन्द्रो मन्यु रेवास देवो देवो मन्युर्होता वरुणो जातवेदाः (ऋ० सं० ८, ३, १८, २)। माहाभाग्यात् कर्मपृथक्त्वाच्च। अथवा देवतान्तरम्, पृथगभिधानश्रुत्यभिधानसम्बन्धात्॥

आह,—ननु मान्यवो मन्त्रो माहेन्द्रग्रहयजिसन्निधौ निष्केवल्ये शस्यमानो महेन्द्रमभिहितसंस्कारेणासमर्थ एव वक्तुम्। अथ किमर्थमयं निष्केवल्ये शस्यते इति? उच्यते,—अन्यदेव हि श्रुत्यभिव्यङ्ग्यमपूर्वमारादुपकाराङ्गभूतं माहेन्द्रग्रहयजिव्यङ्ग्यस्यापूर्वस्य। अपि वा श्रुतिसंयोगात् प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदधतामिति न्यायविदो याज्ञिका पठन्ति। वक्ष्यति चायमपि,—"इतीमा देवता अनुक्रान्ताः सूक्तभाजो हविर्भाज

ऋग्भाजश्च भूयिष्ठाः (७, ३, ६)"—इति। स एष मन्युस्तुतिभाक् एव। यथा—"अभि त्वा शूर (ऋ० सं० ५, ३, २१, २)"—इति इन्द्र एव तस्मिन्निष्केवल्ये, यथा "आपो हि ष्ठा (ऋ० सं० ७, ६, ५, १)"—इत्याप आग्निमारुते, सूर्य्योदय आश्विने एवम्॥

हे 'मन्यो'! 'सहुरे' सहनशील! एतस्मिन् शत्रूणामभिभवनकाले प्रत्युपस्थिते 'हुतः' आहूतः सन् अस्माभिः, 'सेनानी' सेनाप्रणेता 'नः' अस्माकम् 'एधि' भव। ततश्च 'अग्निरिव' 'त्विषितः' दीप्तस्त्वं तेजसा 'सहस्व' अभिभव तानस्मच्छत्रून्। 'हत्वाय' हत्वैव यदेतेषामस्मच्छत्रूणां 'वेदः' धनं तत् त्वमादाय तेषामस्मद्योधानाम् 'ओजः' बलं 'मिमानः' निर्माय यथावस्तु यथार्हं 'विभजस्व'। येऽपि च केचिद्धतावशिष्टाः 'मृधः' मृधकारिणः अस्मद्विद्विषः अस्मत्तः प्रत्याजिहीर्षन्त्येतद्धनम्, तेषामोजो मिमानः तूलयित्वा कियदवशिष्टबला ह्येते न शक्ताः प्रत्याहर्त्तुमित्येवं मिमानस्तावन्मात्रशेषबलान् कृत्वा त्वं 'विनुदस्व' एनान् दूरं प्रक्षिप अपुनरागमनाय॥

द्वितीयमुदाहरणमेतस्यैव,—"इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलिः। इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्र मु धारय॥" (ऋ० सं० ८, ८, ३१, २)। अनया चानुष्टुभा ध्रुव आङ्गिरसो राजानमभिसिषेच। 'इहैव' राष्ट्रे त्वम् 'एधि' भव। 'मा' चातस्त्वम् 'अप च्योष्ठाः'। 'पर्वत इव' 'अविचाचलिः' अविचलनशीलः। 'इन्द्र इव' च 'इह' 'ध्रुवः शाश्वतः 'तिष्ठ'। स्थित्वा च इदं 'राष्ट्रम्' 'इह' 'उ' एव विभूतियोगेन स्थितं 'धारय'—इत्याशीः॥

भाषायां प्रसिद्धमेवेति कृत्वा नोदाहरणं पठितम्। अथवा एते एव। 'अग्निरिवतीक्ष्णः' 'इन्द्र इव विक्रान्तः'॥

"नेति प्रतिषेधार्थीयो भाषायाम्"। प्रसिद्धः। "उभयमन्वध्यायम्"। "नेन्द्रं देवममंसतेति (ऋ० सं० ८, ३, २६, १)"। नेन्द्रं देवमात्मनो दीपयितारममन्यन्ताऽऽदित्यरश्मयः॥

आह,—किं पुनर्लक्षणमिति? उच्यते,—'प्रतिषेधार्थीयः पुरस्तादुपचारस्तस्य यत् प्रतिषेध ते"।

"दुर्मदासो न सुरायामित्युपमार्थीय उपरिष्टादुपचारस्तस्य येनोपमिमीते"—इति। येनार्थेनोपमेयमर्थमुपमिमीते। तद्यथा,—"दुर्मदासो न सुरायामिति"। हृत्सु, पीतासो युध्यन्ते दुर्मदासो न सुरायाम्। ऊधर्न नग्ना जरन्ते॥" (ऋ० सं० ५, ७, १६, १)। काण्वो मेधातिथिराङ्गिरसश्च प्रियमेध ऐन्द्रं सूक्तं ददृशाते। तत्रैषा गायत्री। येषामपि विनियोगः क्वचिदन्यत्र नास्ति, तेऽपि वाचःस्तोमे विनियुज्यन्ते। 'हृत्सु' 'पीतासः' पीताः सन्तो हृदयेष्ववस्थिताः सोमाः 'युध्यन्ते' सम्ग्रहारमिव कुर्वन्ति। अहं विशिष्ट इत्येवं स्पर्द्धमानाः। क इव? 'दुर्मदासो न' दुर्मदासः "आजसेरसुक् (पा० ७, १, ५०)" यथा कुत्सितमदाः केचित् पुरुषाः सुरायां पीतायां सत्यां युध्येरन्, एवम्। किञ्च, तमेव यजमान 'जरन्ते' स्तुवन्तीव आत्मलाभपरितुष्टाः। कथं जरन्ते? 'ऊधर्न' ऊधरिव रात्रिमिव 'नग्नाः' भूत्वा स्त्रियं सम्प्रयोक्ष्यामह इत्येवमभिप्राया इव। "नग्नाः" स्तोतारः। ते च 'ऊधर्न' पयसा पूर्णं गवादे रूध इव सोमपूर्णं त्वां 'जरन्ते' स्तुवन्ति।" इति सायणः॥ केचिद्विशिष्टाः पुरुषाः॥१॥

चिदित्येपोऽनेककर्माऽऽचार्य्यश्चिदिदं ब्रूयादिति पूजायामाचार्य्य आचारं ग्राहयत्याचिनोत्यर्थानाचिनोति बुद्धिमिति वा दधिचिदित्युपमार्थे कुल्मापांश्चिदाहरेत्यव-कुत्सिते कुल्मापाः कुलेषु सीदन्ति नु इत्येपोऽनेककर्मेदन्नु करिष्यतीति हेत्वपदेशे कथन्नु करिष्यतीत्यनुपृष्टे नन्वेतदि-कार्षीदिति चाथाप्युपमार्थे भवति ॥ २ ॥

चिदित्येपोऽनेकार्थोऽपि सन्नुपमार्थीयसंयोगादत्रोदाहृतः ॥

कथमयमनेकार्थ इति? उच्यते,—"आचार्य्यश्चिदिदं ब्रूयादिति पूजायाम्"। आचार्य्य एवं ब्रूयात्, कोऽन्य एवं वक्ष्यतीति। "दधिचिदित्युपमार्थे" दधिरूप ओदन इति। "कुल्मापांश्चिदा-हरेत्यवकुत्सिते"। भृशं कुत्सिते। कुल्मापानपि तावदाहरेति किं घान्यदाहरिष्यसि। "नु इत्येपोऽनेककर्मा"। कथम्? "इदन्नु करिष्यतीति"। कथं हि क्रियाया हेतुर्निमित्तमित्यर्थः। कथं नु करिष्यतीति पृष्ट्वा करिष्यतीत्युक्ते यत् पुनरनुपृच्छति कथं नु करिष्यति? तदनुज्ञानमेतस्मिन्ननुपृष्टे। "नन्वेतदकार्षीदिति च"। अनुपृष्ट एवायं भवतीति ॥

नन्वयमकार्षीदेतत्, कथमयं ब्रवीति कथं करिष्यतीति? "अथाप्युपमार्थे भवति" तद्यथा—॥ २ ॥

वृक्षस्य नु ते पुरुहूत वयाः वृक्षस्येव ते पुरुहूतशाखा वयाः शाखा वेतेर्वातायना भवन्ति शाखाः खशयाः

शक्नोतेर्वाऽथ यस्यागमादर्थपृथक्त्वमह विज्ञायते न त्वौद्-
शिकमिव विग्रहेण पृथक्त्वात्स कर्मोपसंग्रहश्चेति समुच्चयार्थ
उभाभ्यां संप्रयुज्यतेऽहं च त्वं च वृत्रहन्नित्येतस्मिन्नेवार्थे
देवेभ्यश्च पितृभ्य एत्याकारो वेति विचारणार्थे हन्ताहं
पृथिवीमिमां निदधानीह वेहवेत्यथापि समुच्चयार्थे भवति
चायुर्वा त्वामनुर्वा त्वेति ॥ ३ ॥

"अक्षो न चक्र्योः शूर वृहन् प्रते महा रिरिचे रोदस्योः।
वृक्षस्य नु ते पुरुहूत वया व्यू३ तयो रुरुहुरिन्द्र पूर्वीः॥"।
(ऋ० स० ४, ६, १७, ३)। भरद्वाजो बार्हस्पत्योऽस्या-
स्त्रिष्टुभः, पूर्वेणार्द्धर्चेन इन्द्रं स्तुत्वोत्तरेणोपालब्धवान्। हे 'शूर'
इन्द्र! 'पुरुहूत!' महानक्ष इव चक्रयोः 'प्ररिरिचे' प्रकर्षेणाति-
रिच्यते। तव 'महा' महत्त्वेन विभूतिः। कुतोऽतिरिच्यते?
'रोदस्योः' द्यावापृथिव्योः। तथापि चैवं विभूति युक्तस्य सतस्तव
त्वद्भक्तानामेवास्माकं सतां वृक्षस्येव 'वयाः' शाखाः 'पूर्वीरूतयः'
पूर्वास्मद्यजागमनमार्गाः 'विरुरुहुः' खिलीभूतास्तवात्रागमनात्।
अहो कष्टं मन्दभागधेयतास्माकम्। येषां नो धनं, न तदस्ति
येन त्वां यजेमहि। किमत्र त्वां वक्ष्याम इति॥ "वयाः शाखाः"
—इति पर्य्यायवचनः। "वेतेः" वया इति निगमप्रसक्तस्य
निर्वचनम्। "शाखाः खशायाः" इति पर्य्यायप्रसक्तस्य। व्याख्याता
उपमार्थीयाः॥

अथानन्तरं प्रतिज्ञाप्रसक्तानेव कर्मोपसंग्रहार्थान् वक्ष्यामः ॥

"अथ यस्यागमादर्थपृथक्त्वमह विज्ञायते. न त्वौद्देशिकमिव विग्रहेण पृथक्त्वात्स कर्मोपसंग्रहः" । यस्यागमाद्व्याहारादश्रूयमाणस्यैव निपातस्य सन्पविरूपैकशेषादर्थतो वा 'पृथक्त्वमह' पृथग्भाव एव 'विज्ञायते' । तद्यथा.—देवदत्तयज्ञदत्तौ. देवदत्तश्च यज्ञदत्तश्चेति ॥

आह.—इहापि खल्वत्र देवदत्तयज्ञदत्तौ श्रूयेते. न तु तयोरौद्देशिकमिव पृथक्त्वमिति । यथा गाः. अश्वान्. पुरुषान्. पशूनिति प्रत्येकमुद्दिश्यमानानाम् । इह तु विग्रहेण न शब्दागमादेतत् पृथक्त्वमुपजायते । नानाग्रहणं ह्ययोर्बृहतामर्थानां विग्रहः स एव पृथक्त्वाद्धेतोः पृथक्त्वेन निमित्तेनोपलक्ष्यमाणः. यस्माद् द्वावर्थौ बहून् वा गृहीत्वैकस्मिन् कर्मणि उपसमावेष्टयति । तद्यथा.—'देवदत्तयज्ञदत्तौ पचेते'—इत्येवम् । तस्मात् 'कर्मोपसंग्रहः'—इत्येतन्नामैव तद्भवति । अथवा बृहस्पतिश्चेत्युक्तेप्रजापतिरनुक्तोऽपि द्वितीयो गम्यते प्रजापतिश्चेति ॥

कतम. पुनरसाविति ? उच्यते.—"चेति" कदाचिदयमेव 'समुच्चयार्थः' उभाभ्याम् अप्यर्थाभ्यां विगृहीताभ्यामेव संयुक्तः 'प्रयुज्यते' । तथाच.—"अह॒ न॒ त्वं च वृत्रहन्त्सं युज्याव सनिभ्य आ । अगर्तावा विदद्विवोऽनु नो शूर मंसते भद्रा इन्द्रस्य रातयः ॥" (ऋ० सं० ६. ४, ४१. ५) । घोरपुत्रः प्रगाथोऽनया चेन्द्र्या पङ्क्त्या इन्द्रस्य सख्यार्थी सन्नब्रवीत् । हे 'वृत्रहन्' इन्द्र! 'अहं च' प्रगाथ 'त्वं च' 'संयुज्याव' । एकस्मिन्नर्थे सति प्राप्ति-

लक्षणे युज्यावहै 'आ सनिभ्यः' आप्राप्तेः। 'अरातीवा'—इत्येकं पदम् अथैवमावां संयुक्तौ दृष्ट्वा हे 'अद्रिवः'। 'अरातीवा चित्' अदानशीलोऽपि दानशीलतामुपेत्यानुमंस्यत एवावयोर्दानम्। 'भद्रा' भन्दनीया 'इन्द्रस्य' 'रातयः' दानानीत्येवं मन्यमानः। को हि नाम त्वत्संयुक्तानामस्माकं न दद्यादित्यभिप्रायः॥

अथाप्याकारः "एतस्मिन्नेवार्थे" समुच्चयार्थे। "देवेभ्यश्च पितृभ्य आ"—इति। अयमस्मिन्मन्त्रे आकारः। "यो अग्निः कव्यवाहनः पितॄन् यक्षदृतावृधः। प्रेदु हव्यानि देवेभ्यश्च पितृभ्य आ॥" (ऋ० सं० ७, ६, २२, १)। अनुष्टुप्, आप्री, पितृयज्ञे विनियुक्ता। 'योऽग्निः' कव्यस्य वोढा, यस्यायमधिकारः, कव्यानि वोढव्यानीति, स इहास्माकं पितृयज्ञे होतृत्वेन स्थितः 'पितॄन्' 'यक्षत्' पूजयत्वित्यर्थः। किल्लक्षणान् 'ऋतावृधः' सत्यवृधो वा यज्ञवृधो वा। किञ्च। 'प्रेदु हव्यानि' वोचति, वोचतु च। प्रब्रवीत्वेतानि हवींष्यस्मत्प्रदत्तानि। कस्मै? 'देवेभ्यश्च पितृभ्यश्च'—इति॥

"वेति" अयं "विचारणार्थे"। समुच्चयार्थीयप्रसङ्गेनोदाह्रियते। "हन्ताहं पृथिवी मिमां निदधानीह वेहवा। कुवित्सोमस्यापामिति॥" (ऋ० सं० ८,६, २७, ३)। ऐन्द्रो लवस्तस्येयमाप्यं, गायत्री। 'हन्त' इदानीमेव 'अहम्' 'इमां पृथिवीम्' 'इह वा' अन्तरिक्षलोके, 'इह वा' द्युलोके। अथवा 'इह' दक्षिणे स्कन्धे, 'इह वा' सव्ये 'निदधानि' अवस्थापयामि। अतः स्थानादुद्धृत्य। अथ किमर्थं ब्रूते? 'कुवित्सोमस्य' यद्यहं

सोमम् 'अपाम्' पीतवानिति। अस्य मे सोमपानस्यानुरूपमेव वीर्य्यमस्तीत्यभिप्रायः॥

"अथापि" "वेति" अयं "समुच्चयार्थे भवति"। "वायुर्वा त्वा मनुर्वा त्वेति"। "वायुर्वा त्वा मनुर्वा त्वा गन्धर्वाः सप्त-विंशतिः। ते अग्ने अश्वमयुञ्जंस्ते अस्मिञ्जवमादधुः (य० सं० ६, ७)"। अनुष्टुबेषा। वाजपेयेऽश्वयोजने विनियुक्ता। हे अश्व! वायुश्च त्वा मनुश्च त्वा, गन्धर्वा एते सप्तविंशतिर्युञ्जन्ति त्वामस्मिन् रथे। ते हि विदुर्यथा त्वं योक्तव्यः। एवञ्च पूर्व-मप्यश्वं युक्तवन्तो देवानामृषीणां च। त एव च तस्मिन् जव-मादधुः आहितवन्तो यस्मादतो ब्रवीमि ममापि चाग्ने! तमश्वं त एव युञ्जन्तु, जवं चास्मिन्नादधत्विति॥३॥

अह इति च ह इति च विनिग्रहार्थीयौ पूर्वेण संप्रयु-ज्येते अयमहेदं करोत्वयमिदमिदं ह करिष्यतीदं न करिष्य-तीत्यथाप्युकार एतस्मिन्नेवार्थ उत्तरेण मृषेमे वदन्ति सत्यमुते वदन्तीत्यथापि पदपूरण इदमु तदु हीत्येषोऽनेक-कर्मेदं हि करिष्यतीति हेत्वपदेशे कथं हि करिष्यतीत्य-नुपृष्टे कथं हि व्याकरिष्यतीत्यसूयायां किलेति विधा-प्रकर्ष एवं किलेत्यथापि न ननु इत्येताभ्यां सम्प्रयुज्यते-ऽनुपृष्टे न किलैवं ननु किलैवमेति प्रतिषेधे मा कार्षीर्मा

हापीरिति च खल्विति च खलु कृत्वा खलु कृतमथापि पदपूरण एवं खलु तद्वभूवेति शश्वदिति विचिकित्सार्थीयो भाषायां शश्वदेवमित्यनुपृष्ट एवं शश्वदित्यस्वयं पृष्टे नूनमिति विचिकित्सार्थीयो भाषायामुभयमन्वध्यायं विचिकित्सार्थीयश्च पदपूरणश्चागस्त्य इन्द्राय हविर्निरूप्यमरुद्भ्यः सम्प्रदित्साञ्चकार स इन्द्र एत्यपरिदेवयाञ्चक्रे ॥ ४ ॥

इति प्रथमाध्यायस्य द्वितीयः पादः ॥ १, २ ॥

"अह इति च, ह इति च" द्वावप्येतौ "विनिग्रहार्थीयौ"। तयोः पुनरेतयोरेतत् प्रयोगस्वाभाव्यम्। द्वयोरर्थयोरेककाले प्रकृतयोः "पूवण" पूर्ववाक्यगतेनार्थेन संयुक्तौ "प्रयुज्येते"। तद्यथा,—"अयमहेदं करोत्वयमिदम्" ॥ अयमह यज्ञदत्तो गाः पाययतु, अयं देवदत्तो भुङ्क्तामिति ॥

हकारस्योदाहरणम् "इदं ह करिष्यतीति"। यज्ञदत्त इदं ह करिष्यति। "इदं न करिष्यतीति"। ओदनं न पक्ष्यतीति ॥

"अथाप्युकार एतस्मिन्नेवार्थ उत्तरेण"। विनिग्रहार्थे भवति। स पुनरुत्तरेण द्वितीयवाक्यगतेनार्थेन संयुक्ते प्रयुज्यते। तद्यथा,—"मृषेमे" वृषलाः "वदन्ति"। "सत्यमु ते" ब्राह्मणाः "वदन्तीति"। विनिग्रहो नाम, विभागेनावस्थितयोर्यज्ञदत्तदेवदत्तयोरेकस्मिन् यज्ञदत्तेऽभिमतरसगोपायनस्य नियमेन ग्रहण यत् स विनिग्रहः। तदर्थो विनिग्रहार्थः, विनिग्रहार्थ एव विनिग्रहार्थीयः॥

"अथापि" उकारः "पदपूरणः" भवति। "इद्र मु त्यत् पुरुतम पुरस्ताज्ज्योतिस्तमसो वयुनावदस्थात्। नूनं दिवो दुहितरो विभातीर्गातुं कृणवन्नुषमो जनाय॥" (ऋ० सं० ३, ८, २, १)। वामदेवो गौतमोऽनया त्रिष्टुभोषसं तुष्टाव। प्रातरनुवाकाश्विनयोः शस्यते। 'इदं' तत् 'ज्योतिः' यत् जनाः कथयन्ति। उकारः पदपूरणः। एतत् 'पुरुतमं' बहुतमम्। कुतः? पुरुत्तमम्। 'तमसः' यदभिभूय शार्वरं तमः स्वमात्मानमभिव्यनक्ति। अत एव तद् बहुतमम्। 'पुरस्तात्' प्राच्यां दिशि ज्योतिः 'वयुनवत्' प्रज्ञानवदुत्तिष्ठति। 'नूनं' निश्चयेन एताः 'उषसः' दिवो दुहितरः। रूपसामान्यात् दुहितृत्वात्। 'विभातीः' विभासमानाः 'गातुं' गमनमपि कृतार्थं जनानां 'कृणवत्' कुर्वन्त्य आगच्छन्ति। यथेयमनुरज्यते प्राची दिक्, विध्वंस्यते च तमः। एकस्या एव पूजनार्थं बहुवचनम्॥

"तदु प्रयक्षतम मस्य कर्मदस्मस्य चारुतम मस्ति दंसः। उपह्वरे यदुपरा अपिन्वन् मध्वर्णसो नद्यश्चतस्रः।" (ऋ० सं० १, ५, २, १)। द्वितीयमुदाहरणमस्यैव। गौतमो नोधाश्चानया त्रिष्टुभेन्द्रमस्तौत्। प्रवर्ग्ये विनियुक्ता। 'तत्' प्रकर्षेण 'यक्षतमं' पूज्यतमम्। उ इति पदपूरण एव। 'अस्य' इन्द्रस्य 'दस्मस्य' दासयितुर्दर्शनीयस्य वा 'चारुतमं' शोभनतममन्यदपि तस्य 'अस्ति' 'दंसः' कर्म किमपि बहुप्रकारम्। तत् चावेंव पूज्यमेव। इदमेव तस्य चारुतमं च पूज्यतमञ्च। तत् किम्? 'उपह्वरे' यत् उपराः अपिन्वत्'। उपह्वानमर्हन्ति यस्मिन् देशेऽव-

स्थिताः सहायाः, स उपह्वरो देशः, जनैरनाकीर्णो यस्मिन्नेकाकी "यत्" "उपराः" मेघपूरिताः "मध्वर्णसः" मधूदकाः "चतस्रः" "नद्यः" नदीः "अपिन्वत" अपातयत् अक्षारयत्। वर्षद्वारेण यज्ञादि प्रावर्त्तयत्, —इत्यत'। एतदेवास्य चारुतमत्वम् पूज्यतमत्वञ्चेत्यभिप्रायः॥

"ह्रीत्येषोऽनेककर्मा"। तद्यथा,—"इदं हि करिष्यतीति हेत्वपदेशे। कथं हि करिष्यतीत्यनुपृष्टे। कथं हि व्याकरिष्यतीत्यसूयायाम्"। कथमयं व्याकरिष्यतीत्यकृतप्रयत्नोऽयमित्यभिप्रायः। अमर्षादसाक्षाच्छब्दपूर्वकोऽभिप्रायः परिवादोऽसूयेत्युच्यते। परगुणानभिज्ञेत्यर्थः॥

"किलेति विद्याप्रकर्षे" विज्ञानातिशय इत्यर्थः॥ अन्यत उपश्रुत्यातिशय इत्यर्थः। अन्यत उपश्रुत्यातिशयेनावधार्य्यान्यस्मा आचष्टे कश्चित्—"एवं किल" एतद्वासीद्युद्धमिति॥

"अथापि न ननु इत्येताभ्यां" संयुक्तः किलेत्ययं प्रयुज्यते। "अनुपृष्टे" अर्थे। अन्यत उपश्रुत्य कश्चिदर्थं नायमेवमिति ततस्तमेवार्थमन्यमनुपृच्छति। अथेतरमश्रद्धत्तपूर्वस्य। "न किलैवम्"—इति। "ननु किलैवम्"—इति॥

"मेति" अयं "प्रतिषेधे"। तद्यथा,—"मा कार्षीर्मा हार्षीरिति च"। अयञ्च प्रतिषेधार्थीय एव।

"खल्विति च"। तद्यथा,—"खलु कृत्वा"। अकृत्वेत्यर्थः। देशभाषाव्यवस्थयैवज्ञातीयानामुपेक्षितव्यः क्वचित् प्रयोगः॥

"अथापि" खल्वित्ययं "पदपूरणो" भवति। तद्यथा,—एवं खलु तद्बभूवेति। अन्वीक्ष्यः प्रयोगः क्वचित्पादवृत्तेषु॥

"शश्वदिति विचिकित्सार्थीयो भाषायाम्"। छन्दसि पुनरन्येष्वप्यर्थेषु भवति। यथासम्भवं द्रष्टव्यः। इयं चास्य शैली अर्थमपेक्ष्य। एवं शब्दस्य पुरस्तात् प्रयोगो वा भवति, उपरिष्टाद्वा। तद्यथा,—"शश्वदेवमित्यनुपृष्ट एवं शश्वदित्य-स्वयं पृष्टे" अर्थे इति वाक्यशेषः॥

"नूनमिति विचिकित्सार्थीयो भाषायाम्"। विचिकित्सा नाम विवेकपूर्वकोऽवधारणाभिप्रायः। तत्रायं भाषायां भवति। "उभयम् अन्वध्यायम्"। पुनरयमर्थद्वये भवति—"विचिकित्सा-र्थीयश्च पदपूरणश्च"॥

उदाहरणमत्र निर्विवक्षुर्निदानमेवाह,—"अगस्त्य इन्द्राय" —इत्यादि। निदानवतां मन्त्राणां निदानमेव पूर्वं वक्तव्यम्, तेन ह्यतितरामर्थमुच्यमानः प्रकाशते। ततः पदानि। ततोऽर्थः। ततः प्रत्येकं विग्रहेण निर्वचनम्। एष हि व्याख्याक्रमः। अगः कुम्भः, तत्र स्त्यानः संहतः इत्यगस्त्यः। सः "इन्द्राय हविर्निरूप्य मरुद्भ्यः सम्प्रदित्सां चकार"। सम्प्रदातुमैच्छदित्यर्थः। "स इन्द्र एत्य परिदेवयाञ्चक्रे"। परिदेवना नाम मन्युपूर्वको विलापः॥ ४॥

इति निरुक्तवृत्तौ षष्ठाध्यायस्य द्वितीयः पादः॥ ६, २॥

तृतीयः पाद :

न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम्। अन्यस्य चित्तमभि सञ्चरेण्यमुताधीतं विनश्यति॥ न नूनमस्त्यद्यतनं नो एव श्वस्तनमद्यास्मिन् द्यवि द्यु रित्यह्नो नामधेयं द्योतत इति सतः श्व उपाशंसनीयः कालो ह्यो ही नः कालः कस्तद्वेद यदद्भुतम् कस्तद्वेद यदभूतमिदमपीतरदद्भुतमभूतमिवान्यस्य चित्तमभिसञ्चरेण्यमभिसञ्चार्य्यन्यो नानेयश्चित्तं चेततेरुताधीतं विनश्यतीत्याध्यातमभिप्रेतम श्चापिपदपूरणः॥ १॥

"न नूनमस्ति (ऋ० सं० २, ४, १०, १)"—इति। विचार्य्यमेतन्ममैतत्तावत्,—अद्यतनं हविर्मम नास्तीति। नकारं दृष्ट्वाद्यतनशब्दोऽध्याहृतः आचार्य्येण। प्रतिषेधे हि सति प्रतिषेध्येनाप्यवश्यं भवितव्यमिति। एते च मन्त्रैकदेशा एव सन्तोऽध्याहाराः, पदातिरेकादध्ययनकालेनाधीयन्ते। ते त्वर्थनिर्वचनकाले प्रकाशयितव्याः। अथापि स्यात् श्वस्तनं भविष्यतीति। 'नो श्वः' इदं तावदस्मदर्थमेव निरुप्तं सदस्मन्नोव्याप नूनमथ श्वस्तने का प्रत्याशा। किङ्कारणं? 'कस्तद्वेद यदद्भुतम्'। को हि नाम तद्वेद जानाति यदद्भुतमनुत्पन्नं कस्य भविष्यतीति मम वा अन्यस्य वा इति। कस्मात् पुनर्न विज्ञायत इति? अतः, यस्मात्

'अन्यस्य चित्तमभि सञ्चरेण्यम्' सञ्चरणशीलमनवस्थितमित्यभिप्रायः। 'उत' अपि, अथेति छन्दसि समानार्थाः। एतदद्यतनं हविः 'आधीतम्' आध्यातमभिप्रेत सत् मया ममेदमित्येवं तथापि 'विनश्यति' एवान्यस्मै प्रदीयते। तत्रैवं सति श्वस्तनमस्माक भविष्यतीति कुत एतदिति समस्तार्थः॥

अथैकपदनिरुक्तम्,—"अस्मिन् द्यवि,—द्युरित्यह्नो नाम धेयम्,। द्योतत इति सत"। द्योततेर्द्युरिति। द्योतत इति कर्तृकारकम्। सदिति यत्र ब्रूयात्, तत्रोच्चारित एव कारकनियमो द्रष्टव्यः, अन्यत्र यथेष्टं योज्यम्। "श्व उपाशंसनीयः" उपगम्यः, सचेतसा आशास्तव्यो भवति, अनागतत्वात्। "ह्यो हीनः कालः" अतिक्रान्तो हि स भवति॥ श्वःसम्बन्धात् ह्यःशब्दोऽविमानोऽपि निरुक्तः,—"अद्भुतम् अभूतम्"। "इदमपीतरद्भुतम्"—शोणितवर्षादि, "अभूतमिव" कादाचित्कत्वात्। शब्दसारूप्यप्रसङ्गेनेदं निरुक्तम्। "अन्यो नानेयः" नानात्वेन व्यवस्थितस्यापत्यमसत्कुलजस्येत्यर्थः। अथवा न सतामानेयः। "चित्तञ्चेततेः" चेतत्यनेनार्थानिति चित्तम्। "उताधीतं विनश्यतीत्याध्यातमभिप्रेतम्"—इति पर्य्यायवचनम्॥

"अथापि" अयमस्मिन्मन्त्रे "पदपूरणः" भवति—॥ १ ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी। शिक्षा स्तोतृभ्यो माति धग् भगो नो बृहद्वदेम

विदथे सुवीराः ॥ सा ते प्रति दुग्धां वरं जरित्रे वरो वरयितव्यो भवति जरिता गरिता दक्षिणा मघोनी मघवती मघमिति धननामधेयं मंहतेर्दानकर्मणो दक्षिणा दक्षतेः समर्द्धयतिकर्मणो व्यृद्धं समर्द्धयतीत्यपि वा प्रदक्षिणागमनाद्दिशमभिप्रेत्य दिग्घस्तप्रकृतिर्दक्षिणो हस्तो दक्षतेरुत्साहकर्मणो दाशतेर्वा स्याद्दानकर्मणो हस्तो हन्तेः प्राशुर्हनने देहि, स्तोतृभ्यः कामान् मास्मानतिदंहीर्मास्मानतिहाय दा भगो नो अस्तु वृहद्वदेम स्वे वेदने भगो भजतेर्बृहदिति महतो नामधेयं परिवृव्ह भवति वीरवन्तः कल्याणवीरा वा वीरो वीरयत्यमित्रान् वेतेर्वा स्याद्गतिकर्मणो वीरयतेर्वा सीमिति परिग्रहार्थीयो वा पदपूरणो वा प्र सीमादित्यो असृजत् प्रासृजदिति वा प्रासृजत् सर्वत इति वा विसीमतः सुरुचो वेन आवरिति च व्यवृणोत् सर्वत आदित्यः सुरुच आदित्यरश्मयः सुरोचनादपि वा सीमेत्येतदनर्थमुपबन्धमाददीत पञ्चमीकर्माणं सीम्नः सीमतः सीमातो मर्य्यादातः सीमा मर्य्यादा विसीव्यति देशाविति त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तमर्द्धनामेत्येके ॥२॥

"नूनं सा ते (ऋ० सं० २, ६, ६, ६)"—इति गृत्समदस्येयमार्षम्। पृष्ठ्यस्य चतुर्थेऽहनि मरुत्वतीये शस्यते। 'नूनम्' इति पदपूरण एव। 'सा' 'दक्षिणा' 'ते' तव या पुत्रभावके कर्मणि। सा किं करोतु ? 'प्रति' दुग्धाम्। किम् ? 'वरम्'। कर्मणो दक्षिणागुणकात् फलप्राप्तिस्तथापि तु दक्षिणायामुपचर्य्यते। कस्मै ? 'जरित्रे' स्तुवते यजमानाय। किंलक्षणा ? 'मघोनी' मघवती हिरण्यधान्यादिधनेन संयुक्ता, तद्वतीत्यर्थः। किञ्च, 'शिक्षा' देहि कस्मै ? 'स्तोतृभ्यः' ऋत्विग्भ्योऽनुकामान्। किञ्च, 'माति धक्' मास्मानतिहायातीत्यन्येभ्यो देहीति मादा इत्यर्थः। अस्मभ्यं तावद्देहि, ततोऽन्येभ्योऽपि दास्यसि चेत्यभिप्रायः। किञ्च, 'भगो नः' धनं नोऽस्तु। येन किं कुर्य्याम् ? 'वृहद्वदेम' महदूर्जितं वदेम दीयतां भुज्यतामिति। कः ? 'विदथे' यज्ञे। अथवा स्वे गृहे। किञ्च, युष्मदनुग्रहाच्च सुवीराः' वीरवन्तो भवेम पुत्रवन्तः। यद्यपुत्राः, एवमय मत्वर्थीयः सुः' अथ पुनः पुत्रवन्तः, एवं ततः कल्याणवीरा इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"स वरयितव्यो भवति" ब्रियते ह्यसौ। "जरिता ·गरिता" इति स्तुत्यर्थस्य। "मघमिति मंहतेर्दानकर्मणः" दीयते हि तत्। "दक्षिणा दक्षतेः" समर्द्धयत्यर्थस्य, यज्ञे हि यत्किञ्चिद्विगतर्द्धिकं भवति, तदियं समर्द्धयति, विशिष्टं यज्ञस्य साधनमेतदिति। "अपि वा प्रदक्षिणागमनात्" दक्षिणा। दक्षिणां "दिशमभिप्रेत्य"—सा हि दक्षिणस्यां वेदिश्रोणौ, अग्नेर्गार्हपत्यं, जघनेन सदः, दक्षिणेनाग्नीध्रीयं गत्वा अन्तर्वेदिं स्थित्वा

अन्तरेण चत्वालोत्करौ तमाग्नीध्रं चोत्सृज्यमाना गच्छन्तीति "दिक्" पुनर्दक्षिणा। "हस्तप्रकृतिः" प्राङ्मुखस्य प्रजापतेर्दक्षिणो हस्तो बभूव, सा दक्षिणा दिगभवत्। अथ "दक्षिणो हस्तः" कस्माद्दक्षिण इति? "दक्षतेः" उत्साहार्थस्य,—स ह्युत्साहवान् भवति कर्मसु, न तथा सव्यः। "दाशतेर्वा स्यात्" दानार्थस्य, तेनैव हि प्रायेण दीयते। अथ "हस्तः" कस्मात्? "हन्तेः"—तेन हि हन्यते। न, अन्येनापि केनचिदङ्गेन हन्यते। एवं यो हन्तव्यो भवति तस्य "हनने" अयमेव तु "प्राशुः" शीघ्रः इत्यर्थः। "बृहदिति महतो नामधेयम्, परिवृढं भवति"—इति। "वीरो वीरयत्यमित्रान्" नानाप्रकारं मारयतीत्यर्थः। "वेतेर्वा स्याद्गतिकर्मणः" गत्यर्थे वर्त्तमानस्य, गच्छत्येवासावभिमुखं शत्रून्। "वीरयतेर्वा" विक्रमार्थस्य, विक्रान्तो ह्यसौ भवति।

"सीमिति" अयं "परिग्रहार्थीयो वा पदपूरणो वा"। "प्र सीमादित्यो असृजत् (ऋ० सं० २, ७, ६, ४)"। अस्यामेव तावदुभयमपि प्रदर्शयति। ततः परिग्रहार्थीयत्वे द्वितीयमुदाहरणं वक्ष्यति। गृत्समदस्य तत्पुत्रस्य वा कूर्मस्येयमार्षम्, "प्र सीमादित्यो असृजद् विधर्ता ऋतं सिन्धवो वरुणस्य यन्ति। न श्राम्यन्ति न वि मुञ्चन्त्येते वयो न पप्तूरघुया परिज्मन्।" त्रिष्टुप्, सौरी। सूर्यः पुनरस्यां वरुणनाम्ना स्तूयते। प्रासृजत्सूर्यो रश्मीन्। सीमिति पदपूरणं एव, कुतोऽपीत्यविवक्षितमेवैतत् पदपूरणपक्षे। अथ परिग्रहार्थीयं सर्वमेव परिगृह्णाति, —"प्रासृजत् सर्वत इति वा"। 'विधर्त्ता' विधारयिता, रसानां,

रश्मीनां वा, स्वरश्मिजालान्तर्गतस्य वा, धर्त्ता सर्वस्य जगतः। 'ऋतम्' उदकमादाय, पृथिवीलोकादन्तरिक्षलोकाच्च। 'सिन्धवः' स्यन्दनाः सूर्य्यरश्मयः,—ते हि आदित्यमण्डलात् प्राञ्चो वर्त्तमानाः स्यन्दन्ते वर्षकाले, सूर्य्येण प्रसृष्टा उदकमादाय सार्वलौकिकं 'वरुणस्य' सूर्य्यस्य स्थानं मण्डलं 'यन्ति'। तदेवमप्यनिशमुत्सर्गादानलक्षणं स्वकर्म कुर्वाणः 'न श्राम्यन्ति'। 'न' वा श्रान्ता अपि सन्तो विरागादप्येतत् कर्म 'विमुञ्चन्ति' एते। कथं पुनः पतन्तो न श्राम्यन्ति? किं शनकैः? न। 'वयो न' वय इव पक्षिण इव शीघ्रं 'पप्तुः' पतन्तः 'रघुया' लघुया लघ्व्या शीघ्रिकया गत्यापि 'परिज्मन्' परिजमन्तः परिगच्छन्तः सर्वमप्येतज्जगन्न श्राम्यन्ति न विमुञ्चन्त्येतत् कर्म॥ एतद्गुणयुक्तानामप्येतेषां सूर्य्य एव प्रतिसर्गे संयमे च ईश्वर इत्येवं सूर्य्यस्य स्तुतिरेषा॥

"विसीमतः सुरुचो वेन आवरिति च"। इदं द्वितीयमुदाहरणम्। ब्रह्मजज्ञानमिति। "ब्रह्म जज्ञान प्रथमं पुरस्ताद् विसीमतः सुरुचो वेन आवः। स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥" (य० वा० सं० १३, ३)। सामवेदसंहितायामपि छ० आ० ४, १३, ६। वामदेवपुत्रो नकुलोऽनया त्रिष्टुभा आदित्यं तुष्टाव। प्रवर्ग्यविनियुक्ता रुक्मोपधाने चाग्निचयने। 'ब्रह्म' आदित्याख्यं 'जज्ञानं' जायमानं 'प्रथमम्' अनुत्पन्नेषु आदितः 'पुरस्तात्' प्राच्यां दिशि, तदुद्भवोपलक्षितमेव प्राच्याः प्राचीत्वम्। 'वि आवः' व्यवृणोत्, विवृतानकरोत्। 'सुरुचः'

प्रशस्तरोचनान् रश्मीन् 'सीमतः' सर्वतः। किञ्च, 'सः' 'वेनः' मेधावी 'बुध्न्याः' बुध्नमन्तरिक्षं तदवयवभूताया दिशः, 'उपमाः' 'उपनिर्मात्र्यः, तासु ह्येतत्प्रतिष्ठितं सर्वमुपनिर्मीयते जगदित्येतत्,—तस्मात्ता एवोपनिर्मात्र्य उच्यन्ते। 'विष्ठाः' विस्थाः,—तासु ह्येतज्जगद्विभिन्नं तिष्ठतीति ता एव विष्ठाः। 'सतश्च' अभिव्यक्तस्य स्थूलस्य 'असतश्च' अनभिव्यक्तस्य सूक्ष्मस्य 'योनिं' 'विवः' व्यवृणोदित्यर्थः। आदित्योदये ह्येवङ्गुणयुक्ता दिशोऽभिव्यज्यन्त इत्यभिप्रायः। अथवा बुध्न्या आप आन्तरिक्षास्ता उपमा इत्येवमादि सर्वं योज्यम्॥

"अपि वा सीमेत्येतदनर्थकमुपबन्धमाददीत पञ्चमीकर्माणम्। सीम्नः सीमतः सीमातो मर्य्यादातः। सीमा मर्य्यादा विसीव्यति देशाविति"। विगतसन्तानौ देशौ करोतीति॥

"त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तम्" निपातत्वेनैतदपि सन्दिह्यते। वक्ष्यति हि "निपात इत्येके"—इति। अतः त्व इति ह्येवं निपातकाण्ड उदाहियते। संशय परिशोधनाय त्व इत्येतद्विनिग्रहार्थीयमिति व्याख्यातम्। किमु तत् सर्वनामविप्रतिपन्नस्वरत्वात् स्वरमप्यवधारयन् अस्यानुदात्तमित्याह, कथं पुनर्विप्रतिपन्नस्वरमेतदिति? उच्यते,—प्रातिपदिकस्यान्त उदात्त इत्यौत्सर्गिकं लक्षणम् (फि० सू० १, १)—अन्यत्र चापवादात्,—लक्षणविदोऽपि चास्यापवादं पठन्ति,—"त्वत्त्वनेमसमसिमेत्यनुच्चानि (फि० सू० ४, ६)"—इति।

"अर्द्धनामेत्येके"। अर्द्धस्यैतन्नामेत्येवमेके आचार्य्या मन्यन्ते।

वक्ष्यति चायमपि "त्वो नेम इत्यर्द्धस्य (निरु० ३, ४, १)"—इति। तदेतत् प्रकरणोपपदाभ्यामध्यवसेयम्,—कार्द्धनाम ? क सर्वनाम ? इति ॥२॥

यथात्र सर्वनाम तथेयमृगुदाहियते'—

ऋचान्त्वः पोषमास्ते पुपुष्वान् गायत्रन्त्वो गायति शाक्करीषु। ब्रह्मात्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उत्वः ॥ इत्यृत्विक्कर्मणां विनियोगमाचष्ट ऋचामेकः पोषमास्ते पुपुष्वान् होतर्गर्चनी गायत्रमेको गायति शाक्करीषूद्गाता गायत्रं गायतेः स्तुतिकर्मणः शक्वर्य्य ऋचः शक्नोतेस्तद्यदाभिर्वृत्रमशकद्धन्तुं तच्छक्करीणां शाक्करीत्वमिति विज्ञायते ब्रह्मैको जाते जाते विद्यां वदति ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति ब्रह्मा परिवृलूहः श्रुततो ब्रह्म परिवृलूहं सर्वतो यज्ञस्य मात्रां विमिमीत एकोऽध्वर्य्युरध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य नेताध्वरं कामयत इति वापि वाधीयाने युरुपबन्धोऽध्वर इति यज्ञनाम ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधो निपात इत्येके तत्कथमनुदात्तप्रकृति नाम स्याद्द्रष्टव्यमेतत्तु भवति। उत त्वं सख्येस्थिरपीतमाहुरिति

द्वितीयायामुतो त्वस्मै तन्वं विसस्र इति चतुर्थ्यामथापि अथमावहुवचने ॥ ३ ॥

"ऋचान्त्वः (ऋ० सं० ८, २, २४, ५)"—इति। बृहस्पतेरार्षम्। ऋत्विक्कर्मणां विनियोगमनयर्चाऽऽचष्टे। "ऋचां त्वः पोषमिति"। य एते चत्वारो महर्त्विजः, एतेषां 'त्वः' एक इत्यर्थः। किमेकः करोति? 'ऋचां' 'पोषं' पुष्टिं 'पुपुष्वान्' पुनः पुनः भृशं वा देवतायाथात्म्यानुचिन्तनसन्तानमर्मस्थानकरणानुप्रदानवतीर्यथाकालमृचोऽधीयानः 'आस्ते'—स हि तासां पोषः। कतमः? 'एकः' एतत्कर्म कुर्वन्नास्ते इति,—होता, एतत्तावद्वग्ध्ययनकर्म तस्मिन् होतरि विनियुक्तम्, उक्तं च—"यद्वृचैव होत्रं क्रियते"—इति (ऐ० ब्रा० ५, ५, ८)। 'गायत्रं' त्वः? गायत्रमेको 'गायति' 'शकरीषु' ऋक्षु। कतमः? उद्गाता, तस्मिन्नप्येतत्सामगानकर्म विनियुक्तम्, उक्तञ्च—"साम्नोद्गीथम्"—इति (ऐ० ब्रा० ५, ५, ८)। "ब्रह्मा त्व." ब्रह्मा नाम एक ऋत्विक् 'जाते' प्रायश्चित्ते 'विद्यां वदति'। विद्यात्रयहेतुत्वादात्मनो विद्यां विज्ञानं वदतीतरेभ्य ऋत्विग्भ्यः, इदमत्र कुरुतेति। तत्रापि ह्येतत् कर्म विनियुक्तम्। स पुनरेष सर्वविद्यः सर्वविज्ञानस्तथाविधो ह्यसावधिकारी त्रयीविद्यासंयुक्तो येनासौ सर्वमेव वेदितुमर्हति। न ह्यसर्ववित् तमधिकारं शक्नुयान्निर्वर्त्तयितुम्। उक्तञ्च —"अथ. केन ब्रह्मत्वं क्रियत इति? त्रय्या विद्यया"—इति (ऐ ब्रा० ५, ५, ८)। "यज्ञस्य मात्रां विमिमीत उ त्वः।

एक इति। मीयत इति मानं कर्म, तन्मात्रेत्युच्यते। या काचिदितिकर्त्तव्यता यज्ञस्य, तां विमिमीतेऽध्वर्युः, नानाप्रकारं करोतीत्यर्थः॥

अथैकपदं निरुक्तम्।—"गायत्रं गायतेः" स्तुत्यर्थस्य,—स्तूयते ह्यनेन। "शक्वर्य्य ऋचः शक्नोतेः"—इत्युक्त्वा शक्करी-शब्दे वृत्तिं दर्शयति—"तद्यदाभिर्वृत्रमशकद्धन्तुं" "तत्" एव "शक्करीणां शक्करीत्वम्"। तत् यद्यस्मादाभिरभिष्टुत इन्द्रो वृत्रम-शकद्धन्तुं तच्छक्करीत्वम्—"इति विज्ञायते"। ऋचां शक्करीत्व-मित्येवं ब्राह्मणेऽपि शक्नोतेरेव शक्वर्य्य इति विज्ञायते। लिङ्गतो-ऽपि हि दर्शितं भवति, आख्यातजानि नामानीति॥

"ब्रह्मा परिवृढः श्रुततः स हि त्रयीं विद्यां वेद। शब्दसारूप्य-प्रसक्तमुच्यते,—"ब्रह्म परिवृढं सर्वतः। ऋगादिपरं चोभयमपि तत्परिवृढं सर्वासु दिक्षु। "अध्वर्य्युः अध्वरयुः" एवमपि ऋगूह्यत इति। पुनरप्याह,—"अध्वरं युनक्त्यध्वरस्य नेता" प्रापयितेत्यर्थः,—स ह्यन्तं प्रापयत्यध्वरमेव। अथवा "अध्वरं कामयते" कर्त्तुम्"—इति" अध्वर्य्युः। एतस्मिन्निर्वचने युः, वसूयव इति यथा। अथवा "अधीयाने" तमध्वरं कस्मिंश्चिद् ब्राह्मणे अध्वर इतीयमेव सञ्ज्ञा भवति, मञ्चाक्रोशनवत्। एत-स्मिंश्च निर्वचने "युः" अयम् "उपबन्धः" नामकरणम्। अध्वर-मधीते यः सोऽध्वर्य्युः। विग्रहप्रसक्तस्याध्वरशब्दस्य तत्त्वमा चष्टे,—'अध्वरः—इति यज्ञनाम"। ध्वरः इत्यधुना निर्वक्तव्यः, —"ध्वरतिर्हिंसाकर्मा"। ध्वरति धूर्वतीति हिंसार्थेषु पठितौ

(पूर्वखण्डे २६१ पृ०), "तत्प्रतिषेधः" अध्वरः अहिंस्र इत्यर्थः ॥

आह,—नन्वत्र हन्यन्ते पशवः, छिद्यन्ते तृणवनस्पतयः, तत् कथमहिंस्रः ? उच्यते,—अभ्युदय एव हि सः। एवं हि श्रूयते —"न वा उ एतस्मिन् म्रियसे (य० वा० सं० २३, १६)"—इति। तथाच—"कुशत्वमिच्छन्ति तृणानि राजन्"—इति। तस्मादभ्युदययोगादहिंस्र इत्युपपद्यते ॥

"निपातः" अयम् "इत्येके" मन्यन्ते ॥

एवमेकीयपक्षे निपातत्वमस्योक्त्वा अधुना चोदकपक्षे स्थित्वा परपक्षमाक्षिपन्नाह,—"इत् कथमनुदात्तप्रकृति नाम स्यात्"—इति। तदेतच्छन्दरूपमनुदात्तस्वभावं सत् कथं नाम स्यात् ? ननु भवतैवोक्तम्—उत्सर्गेणैवान्तोदात्तानि प्रातिपदिकानि—इति (५६ पृ० १८ पं०)। उच्यते,—सत्यमुक्तम्। ननु तत्रैवेदं प्रत्युक्तम्—अन्यत्र चापवादात्—इति (५६ पृ० १६ पं०)। स एषोऽपवादांशः—त्वत्त्वनेमसमसिमेत्यनुच्चालीति (६० पृ० २० पं०)। उत्सर्गादपवादो बलीयान्। तस्माद्विप्रतिषेधस्वरमपि एतन्नामैव। 'किञ्च' "दृष्ट्व्ययं तु भवति"। तु शब्दो हेत्वर्थः —हेतुसमुच्चयार्थो वा। अनुदात्तप्रकृतित्वेऽपि स तु 'दृष्टानुविधयश्छन्दसि'—इति दृष्ट्व्ययत्वान्नामेति तद्भवति। एव हेत्वर्थः। अथवैवमन्यथाहेतुसमुच्चयार्थः, अपवादस्मरणात्—व्ययदर्शनाच्च अनुदात्तमपि सदेतन्नामैव भवति। निपाता अप्याद्युदात्ता भवन्ति (फि० सू० ४, ११)। तस्मात् कृतापवादत्वाद्—दृष्ट्व्ययत्वाच्च नामैवैतदित्युपपन्नम् ॥

आह,—क्व पुनरस्य व्ययो दृष्टः ? उच्यते,—"उत त्वं सख्ये स्थिरपीतमाहुरिति द्वितीयायाम्" एकवचने। एवम् 'उतो त्वस्मै तन्वं १ वि सस्र इति चतुर्थ्याम्" एकवचने व्ययो दृष्टः। उपरिष्टाच्छेपः। "अथापि प्रथमाबहुवचने"—व्ययो दृष्ट इत्यध्याहारः ॥ ३ ॥

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः। आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे। अक्षिमन्तः कर्णवन्तः सखायोऽक्षि चष्टेर्नक्तेरित्याग्रायणस्तस्मादेते व्यक्ततरे इव भवत इति ह विज्ञायते कर्णः कृन्ततेर्निकृत्तद्वारो भवत्यृच्छतेरित्याग्रायण ऋच्छन्तीव खे उदगन्तामिति ह विज्ञायते मनसां प्रजवेष्वसमा बभूवुरास्यदघ्ना अपर उपकक्षदघ्ना अपरे आस्यमस्यतेरास्यन्दत एनदघ्नमिति वा दघ्नं दघ्यतेः स्रवतिकर्मणो दस्यतेर्वा स्याद्विदस्ततरं भवति ह्रदा इवैके प्रस्नेया ह्रदा इवैके प्रस्नेदद्दशिरे स्नानार्हा ह्रदो ह्रदतेः शब्दकर्मणो ह्लादतेर्वा स्याच्छीतीभावकर्मणोऽथापि समुच्चयार्थे भवति॥४॥

अक्षण्वन्तः कर्णवन्तः (ऋ० सं० ८, २, ३४, २)"—इत्येतस्यामृचि। बृहस्पतेरार्षं विद्यासूक्तं नाम। 'अक्षण्वन्तः' अक्षि-

संयुक्ताः, एवमपि समानेन्द्रियाः समानपृष्ठोदरपाणिपादाः सन्तः अपि च, 'सखायः' समानख्यानाः सर्वे मनुष्याः। अथवा समानेषु शास्त्रेषु कृतश्रमाः। वैयाकरणा वैयाकरणानामेव समानख्यानाः, नैरुक्ता एव नैरुक्तानाम्। 'मनोजवेषु' मनोगम्येष्वर्थेषु 'असमा बभूवुः'। केचिदूहापोहनधारणवक्तृत्वसमर्थाः, केचिद्मेधसः। कथमसामान्यमिति ? यतो दृष्टान्तेन प्रतिपाद्यति।—"आदघ्नास उपकक्षास उ त्वे ह्रदा इव"। आदघ्ना एव आदघ्नासः। आस्यदघ्नह्रदपरिमाणाः, केचित् प्रज्ञया। उपकक्षासः कक्षसन्निकृष्टदेशतुल्योदका इव ह्रदाः। एके प्रज्ञयाह्रदाः 'स्नात्वा' अक्षोभ्याः अपरिमेयप्रज्ञानाः। 'ददृश्रे' ददृशिरे—दृश्यन्त इति समस्तार्थः॥

अथैकपदं निरुक्तम्। "अक्षि, चष्टेः" पश्यत्यर्थस्य,—दृश्यते ह्यनेन। "अनक्ते" व्यक्त्यर्थस्य—"इत्यात्रायणः" मन्यते। वाह्यमपि चैतस्मिन्निर्वचने भवति। "तस्मादेते व्यक्ततरे इव भवतः"—इति। यस्मादिदन्नामेति किमिति प्रकृतमपेक्ष्य। अथवा यस्मादेते तेजोऽवयवभूयिष्ठे, तस्मात्कारणादित्येवं यच्छब्दमन्वाकृष्य विद्यमानमविद्यमानं चोत्पद्य तस्माच्छब्दस्य सामर्थ्यमुत्पाद्यते। तथाहि स निराकाङ्क्षो भवति। सर्वत्र च साकाङ्क्षेषु शब्देष्वेवं व्याख्यानधर्मो द्रष्टव्यः। एते अक्षिणी इतरेभ्योऽङ्गेभ्यो व्यक्ततरे स्पष्टतरे प्रकाशतरे भवतः,—अन्धकारेऽपि ह्येते प्रकाशेनैव नक्तञ्चारादीनां न तथेतराण्यङ्गानि। एवं ब्राह्मणेऽपि अनक्तेरेवाक्षिणी "—इति ह विज्ञायते"। "कर्णः

कृन्तत्तेर्निकृत्तद्वारो भवति, ऋच्छतेरित्याग्रायणः" मन्यते। ब्राह्मणमपि चैतस्मिन्निर्वचने भवति,—"ऋच्छन्तीव खे उदगन्ता-मिति ह विज्ञायते"—इति। ऋच्छन्तीवैतौ कर्णौ खेऽभिव्यक्ताः सन्तः शब्दाः एतावपि च उदगन्तां प्रत्युद्गच्छत इव ग्रहणाय। विचार्य्यमाणे ज्ञायते खे कर्णाविति। "आस्यमस्यतेः" क्षेपार्थस्य, —क्षिप्यते ह्यं तदाभिमुख्येनान्नम्। स्यन्दतेर्वा स्यादाङ्पूर्वस्यैव स्रवणार्थस्य,—शुष्केऽपि ह्यं तदन्न आगते स्रवत्येव श्लेष्माणं, येन तदार्द्रीकृतं ग्रसितुं शक्यते। "दघं, दस्यतेः" स्रवत्यर्थस्य। स्रुततरमिव तद्भवत्युत्तरात् परिमाणात्। "दस्यतेर्वा स्यात्" क्षयार्थस्य। "विदस्ततरं" ह्य पक्षीणतरं, तद् "भवति" उत्तर-स्मात् परिमाणात्। "प्रस्नयाः" प्रकर्षेण स्नातुं येषु योग्यम्, अगाधत्वात्, ते प्रस्नेयाः स्नानार्हा इत्यर्थः। "ह्रदो ह्रादतेः" शब्दार्थस्य,—शब्दं ह्यसावभिहन्यमानः करोति। "ह्रादतेर्वा स्यात्" शीतीभावार्थस्य,—ग्रीष्मेऽपि ह्यसौ शीतल एव भवति॥

"अथापि" अयमपरो निपातः "समुच्चयार्थे भवति" एकतमः —त्वत् इति॥ ४॥

किमुदाहरणम्?—

पर्य्याया इव त्वदाश्विनमाश्विनश्च पर्य्यायाश्चेत्यथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पद-पूरणास्ते मिताक्षरेष्वनर्थकाः कर्मी मिद्विति। निष्टक्त्रा-

सश्चिदिन्नरो भूरितोका वृकादिव । विभ्यस्यन्तो ववाशिरे शिशिरञ्जीवनाय कम् । शिशिरञ्जीवनाय । शिशिरं शृणातेः शम्नातेर्वा । एमेनं सृजता सुते । आसृजतैनं सुते । तमिद्वर्द्धन्तु नो गिरः । तं वर्द्धयन्तु नो गिरः । स्तुतयो गिरो गृणातेः । अयम्मु ते समतसि । जयन्ते समत्तसीवोऽपि दृश्यते ॥ ५ ॥

"पर्य्याया इव त्वद्दाश्विनम् (ऋ० प्रति० १२, १०)"—इति । आह, किमुकं भवति ? उच्यते,—"आश्विनं च पर्य्यायाश्चेति" —एवं समुच्चयार्थे भवति । "अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति, पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्धिति" । व्याख्याताः क अपि संग्रहार्थीयाः, तत्प्रसङ्गेन हीत्येवमादयो अन्यार्था अप्युक्ताः । प्रतिज्ञाप्रसक्तानेवाधुना पदपूरणान् वक्ष्यामः । तेषां सामान्यमेव तावल्लक्षणमुच्यते । तत्राधिकारार्थोऽयमथशब्दोऽथ ये प्रवृते परिसमाप्ते अर्थे अन्यैरेव वाक्यगतैः पदैरमिताक्षरेषु गद्यग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणार्थास्त एव मिताक्षरेषु भवन्ति । उभयत्रापि तु ते अनर्थकाः अनर्थान्तरवाचकाः, प्राकृतादर्थात् न किञ्चिदर्थान्तरं द्योतयन्ति । पदमेव वाक्यमेव वा पूरयितव्यमित्ययमेव हि तेषामर्थो नान्यदर्थान्तरम् । उक्तं च,—

"क्रियावाचकमाख्यातमुपसर्गो विशेषवत् ।

सत्वाभिधायकं नाम, निपातः पादपूरणः ॥"—इति ।

कतमे पुनस्ते ? "कमीमिद्विति" एते चत्वारः । कम्, ईम्, इत्, उ,—इति ॥

आह,—ननु ये प्रवृत्तेऽर्थे इति पदे तदुपदिष्टं लक्षणमत एव विज्ञास्यामो येऽमिताक्षरेषु वाक्येषु पठितास्ते मिताक्षरेषु पद-पूरणा भविष्यन्तीति ॥

अथ किमर्थमेते विशेषतः कमीमिद्वो निर्दिश्यन्त इति ? उच्यते,—एते हि प्रायेण पदपूरणा एव । अन्ये पुनः इव न-चि-न्वादयो अर्थवन्तोऽप्यर्थासम्भवे सति पदपूरणा भवन्ति,—लक्षणं हि तानपि व्याप्नोति । एते पुनः प्रायेणानर्थका एवेति विशेषतो निर्दिश्यन्ते अथवा ते प्रायेणार्थवन्तः कदाचिदनर्थकाः इत्यतो विशेषतो निर्दिश्यन्ते ॥

आह,—एवमपि च उकारो न निर्देष्टव्यः । किं कारणम् ? स हि पुरस्तान्निर्दिष्ट एव (१अ० २पा० ४खं०) "अथापि पदपूरण इदमुतदु"—इति । उच्यते, सत्यं निर्दिष्टः । प्रासङ्गिकस्तु स तस्य निर्देशोऽयमेवात्रोकारस्य पदपूरणत्वे मुख्यो निर्देशः, स्व-प्रकरणत्वात् । तत्र तर्हि अकिञ्चित्कर इति ? न अकिञ्चित्करः । किं कारणम् ? शृणु,—यदि ह्ययमुकारः तत्र पूरणत्वेन नोच्यते, इहैवोच्येत, ततः पूर्वोक्तस्य विनिग्रहार्थीयत्वस्यायमपवाद इति गम्येत। अथापि तत्रैव केवलमस्य पदपूरणत्वमुच्यते, नेह, तथापि पादपूरणेषु परिसंख्यायमानेषु नायमुक्त इति पदसंख्यया पदपूरण-त्वमस्य बाध्येत । अनिष्टञ्चैतत् । तस्मादुभयत्राप्यधीत इति ॥

आह,—नन्वेवं खलु नूनमित्येतयोः पदपूरणत्वस्य बाधः प्राप्त इति? उच्यते,—नैवम्। किं कारणम्? उकारवत्तौ ह्युभावपि। यथैव ह्युकारोऽर्थवांश्चानर्थकश्च, एवं तावपि। तस्मादुकारग्रहणेनापि तावप्यत्र गृहीतौ द्रष्टव्यौ। न केवलमुभावेव, किन्तर्हि? अन्येऽपि तावन्त एव सन्ति। तद्यथा,—"आ घा ता गच्छानुत्तरा"—इति अत्र घकारः। तेऽपि चात्रावरुद्धा द्रष्टव्याः। उदाहरणमात्रप्रदर्शनार्थं ह्येतावन्त एवोदाहृताः। त एते सर्व एवार्थासम्भवे सत्यनर्थका एव, सम्भवे त्वर्थवन्त इति। किं कारणम्?—न हि कस्मिंश्चिदर्थे तावत् सम्भवति अनर्थत्वकल्पना न्याय्या शब्दस्य,—अर्थप्रधानो हि शब्दः। स नाकस्मादभिधेयेनार्थेन विना वाक्ये सहन्येत। तस्माद्यावदुगम्यमेव तावदर्थः कल्पनीयः। यत पुनरेतदुक्तम्—'वाक्यपूरणाः' इति (६६ पृ० १५ पं०)। अगतिरेषा। तदेतत् सर्वथाप्यर्थासम्भवे सति अगतौ सत्यां भवति। त एते प्रायोवृत्त्या इव नचिन्वादयोऽर्थवन्तः। प्रायोवृत्त्या च कमोमिदवोऽनर्थका इति द्रष्टव्यम्॥

आह,—ननु आदौ च मध्ये च पूरणानामागमो दृष्टः, तद्यथा —"नूनं सा ते"—इति, अथ कथमुच्यते,—'ये प्रवृत्तेऽर्थे आगच्छन्ति, ते पदपूरणाः'—इति? उच्यते,—न ह्येतदध्ययनकालीनमानुपूर्व्यमक्षराणां पदानां व्याख्याकाले नियतमस्ति, अर्थप्रकाशनार्थनिर्वचनवशेनान्यपदानुपूर्व्यमुपजायते समाख्याकाले। तत्रैवं सत्याख्यातपदम् प्रधानम्, तदनु नाम, तदनूपसर्गाः, तदनु

निपाताः,—इत्येतामानुपूर्वीमपेक्ष्यैतदुक्तम्। तत्र ये प्रवृत्तेऽर्थे आगच्छन्ति, ते पदपूरणा भवन्ति। एतामानुपूर्वीमपेक्ष्य पूर्वमाख्यातलक्षणमुक्तम्, तदनु नामलक्षणम्। तस्मादादावपि निपातः, तन्मध्ये वा अतएव द्रष्टव्यः। लोकेऽपि हि दत्तानुयोगानां ब्राह्मणानामवस्थानक्रमोऽकिञ्चित्कर एव भवति। मध्येऽन्ते चावस्थितो यः प्रधानः, सोऽग्र्य इत्युच्यते। तस्मात् सम्यगेवोक्तं 'ये प्रवृत्तेऽर्थे—इति॥

व्यत्ययं चाधिकृत्य श्लोकमप्युदाहरन्ति,—

"आदिमध्यान्तलुप्तानि प्रच्छन्नापिहितानि च।
ब्रह्मणः परिगुप्त्यर्थं वेदे व्यवहितानि च॥"—इति।

अधुना एवमेतानुदाहृतान् कमीमिदून् समासतः प्रत्येकमुदाहरणैर्दर्शयति,—"शिशिरं जीवनाय कम्"—इत्यत्र कमित्येष पदपूरणः। शिशिरं जीवनाय जीवनार्थमित्यर्थः। तत्र हि प्रायेण प्रचुराणि श्रद्धान्यानि भवन्ति। कमिति पदपूरण एव। "मुञ्चामि त्वा हविषा जीवनाय कम्"—इति (ऋ० सं० ८, ८, १९, १)। अत्र सायणः,—'किमर्थम्? "जीवनाय कम्" जीवनार्थम्, इह लोके चिरकालावस्थानार्थमित्यर्थः। कमिति पूरकः।' —इति। शाखान्तरेषु शेषो द्रष्टव्यः॥

केचिदेवं कृतशेषमत्राधीयते,—

निष्ट्वक्त्रासश्चिदिन्नरो भूरितोका वृकादिव॥
विभ्यस्यन्तो ववाशिरे शिशिरञ्जीवनाय कम्॥"—इति।

निष्ट्वक्त्रा एव 'निष्ट्वक्त्रासः' निर्वसना इत्यर्थः। अपि च। 'भूरितोकाः' बह्वपत्या इत्यर्थः। के पुनस्ते? दरिद्राः, 'केचिन्नरो' मनुष्या इत्यर्थः। किं तेषामिति। 'वृकादिव विस्यन्तः' पुनः पुनर्भृशं वा विभ्यतो वृकादिव हिमात् 'ववाशिरे' पुनः पुनर्भृशं वा वश्यन्ते। किमिति ववाशिरे? शिशरम्। अस्माकं जीवनाय जीवनार्थमागच्छति,--इत्येवं हेमन्ते ववाशिरे। अल्पतरशीतं हि शिशिरं, सुख तत्र जीविष्याम इत्यभिप्रायः॥

निगमप्रसक्तस्य शिशिरशब्दस्य निर्वचनम्—"शिशिर शृणातेः" हिंसार्थस्य "शम्नातेर्वा" हिंसार्थस्यैव, नार्थकृतो विशेषः। हिनस्ति तस्मिन् काले अप्रतिबध्यमानो अतिशयेन दावाग्निः शुष्कानोषधिवनस्पतीन्॥

ईमित्यस्योदाहरणम्--"ए मेन सृजता सुते मन्दि मिन्द्राय मन्दिने। चक्रिं विश्वानि चक्रये॥" (ऋ० सं० १, १, १७, २)। ऐन्द्रेयवा गायत्री। मधुच्छन्दस आर्षम्। पृष्ठ्यामिप्लव-स्तोमवृद्धौ प्रातःसवने ब्राह्मणाच्छंसिनः शस्त्रे महाव्रते च तृचा-शीतिषु विनियुक्ता। 'आ सृजतैनम्' आभिमुख्येन सृजत। 'ईम्'—इति पदपूरण एव। दत्तोक्थपात्रेण चमसैश्च सोमं हे अध्वर्यवः! किमासृजत? योऽयमिन्द्रस्य 'सुते' अभिषुते सोमे स्वांशः, उक्थपात्रचमसस्थः, एनमासृजत। 'मन्दिं' मन्दयिता-रम्। 'मन्दिने' इन्द्राय हर्षवते। 'चक्रिं' चकनवन्तं क्रमणवन्तं वा। अपि वा हविर्द्धानशकटचक्त्राभ्यां चक्रवन्तमपि। चक्रदिति कर्मनाम (पूर्वभागे १८४ पृ०)। अतिविशिष्टवीर्य्यजनकैः

संस्कारकर्मभिस्तद्वन्तं 'विश्वानि' सर्वाणि भूतानि वा। 'चक्रये' कृतवते इन्द्राय। सोमः प्रत्यक्षः, दातारश्च, परोक्षा त्विन्द्रस्य स्तुतिः। "अथापि प्रत्यक्षकृताः स्तोतारो भवन्ति, परोक्षकृतानि स्तोतव्यानि"—इति वक्ष्यति॥

"तमिद्वर्द्धन्तु नो गिरः"—इति। इदित्यस्योदाहरणम्। "तमिद्वर्द्धन्तु नो गिरो वत्सं संशिश्वरीरिव। य इन्द्रस्य हृदं सनिः॥" (ऋ० सं० ७, १, २०, ५)। अमहीयोराङ्गिरसस्येयमार्षम्। गायत्री, सौमी। आवस्तुतौ विनियुक्ता। 'तम्' वर्द्धयन्तु 'नः'। तं सोमम्। 'इत्'—इति पदपूरणः। वर्द्धयन्तूपजातवीर्यं कुर्वन्तु। देवतृप्तये। नः एताः अस्मद् 'गिरः' स्तुतयः। कथं पुनर्वर्द्धयन्तु। 'वत्सं संशिश्वरीरिव'। वत्समिव, एकशिशुका बह्व्यो गावः, ता यथा पर्य्यायेण वत्समेकं मृतवत्साः स्वैः स्वैः पयोभिर्वहनादिसमर्थं कुर्य्युः। एवमेवास्माद्भिः एतं सोममुपजातवीर्यं देवतर्पणाय कुर्वन्तु वर्द्धयन्तु। कतमः। 'यः' 'इन्द्रस्य' 'हृदं सनिः' हृदयसम्भक्ता, तमेनं वर्द्धयन्त्वित्यभिप्रायः॥

आह,—कस्मात् पुनरत्र केचिदुदाहरणमन्त्रा अशेषाः पठ्यन्ते, निरुच्यन्ते, केषाञ्चिदेकदेशाः? इति। उच्यते,—ये तावदशेषाः पठ्यन्ते, निरुच्यन्ते च, ते व्याख्याधर्मोपदेशनार्थम्। यदि पुनः सर्व एव पठ्येरन् निरुच्येरंश्च, अतिगुरुशास्त्रं सम्पद्येत। अथापि सर्वेषामप्युदाहरणमन्त्राणामेकदेशः पठ्येत निरुच्येत च, तथापि व्याख्याधर्मो न प्रदर्शितः स्यात्। तस्माद् व्याख्याधर्मोपदर्शनार्थं

केचिदशेषाः पठ्यन्ते, निरुच्यन्ते च, केषाञ्चिदेकदेशाः, शाखाति-गौरवभयात् ।—इति प्रतिमन्त्रमपि सकलार्द्धर्चपादाध्ययने शक्यते प्रयोजनमन्वेष्टुम्, तदेतत्समासेन ब्रूमः । यस्मिन् यस्मिन्मन्त्रे यद्यत्पदमेकार्थमनेकार्थमनवगतसंस्कारं वा निर्ब्रवीति, किञ्चिद्वान्यच्छब्दरूपमध्याहरति, अन्यद्वापोहति, अन्यथा वा कञ्चिद्विपरिणामं करोति, सन्दिग्धं वा निर्णयति, तदर्थमेव तं सकलमधीते । यस्मिन्वार्द्धर्चे पादे तावत् पदं भवति, यदभिमतं निर्वक्तुं तावन्मात्रमेवाधीते । तन्निर्विवक्षया तदेतदेवं निपुणमन्वेष्टव्यं सर्वत्र ॥

उकारस्योदाहरणम्—"अय मु ते समतसि कपोत इव गर्भधिम् । वचस्तच्चिन्न ओहसे ॥" (ऋ० सं० १, २, २८, ४) । शुनःशेफो नियुक्त आत्मानं मोचयितुमिच्छन्नेतया गायत्र्येन्द्रं तुष्टाव । 'अयम्' इति वर्त्तमानः सन् कर्मणि निर्वित्सन्नाह । 'ते' तव युष्मदर्थं सोमः यं प्रति नित्यकालमेव 'समतसि' सम्पतसि । त्वं तासु क्रियास्वाह्वयमानः समतसि सम्पतसि । कथं पुनर्यं प्रति समतसि ? 'कपोत इव' कम्पतनः कपोतः, कुत्सितपतनः, स यथा 'गर्भधिं' गर्भधानीं कपोतिकाम्, अण्डाश्रयं वा नीडं प्रति पुनः पुनः पतति, एवं यं प्रति नित्यकालमेव सम्पतसि त्वम्, स एवायमभिष्टुतः सोमः, एभिर्ऋत्विग्भिः । अथ किमस्माभिः करिष्यसि ? मोचय अस्मान् । किंवा 'वचः' एवेदं नः स्तुतिलक्षणं 'नोहसे' न वितर्कयसि रोरूपमाणानाम् ? केनाप्यभिप्रायेण वयमेतद्ब्रूमः,—कैर्वा युष्मद्गुणैर्न युक्तमेतदिति,

यतो न मोचयस्यसानतो यूपात्। श्रुत्वैतदवबुद्ध्यार्थमार्त्तताम-स्माकमवधार्य्य कारुण्यान्मोचयास्मान्। किं तेऽस्माभिरयमेव तेऽस्मत्तः प्रति विशिष्टतरः सोमोऽभिषुत इत्यभिप्रायः॥

"इवोऽपि दृश्यते"। कदाचिदनर्थकः—इति वाक्यशेषः॥५॥

किमुदाहरणम्?—

सु विदुरिव सु विज्ञायेते इवाथापि नेत्येष इदित्येतेन सं प्रयुज्यते परिभये। हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान्। शचार्मदन्त उत दक्षिणाभिर्नेङ्गिङ्गायन्त्यो नरकम्पतामेति। नरकं न्यरकं नीचैर्गमनं नास्मिन्नमणं स्थानमल्पमप्यस्तीति वाथापि न चेत्येष इदित्येतेन सम्प्रयुज्यतेऽनुपृष्टे न चेत् सुरां पिबन्तीति सुरा सुनोतेरेवमुच्चावचेष्वर्थेषु निपतन्ति त उपेक्षितव्याः॥ ६॥

इति प्रथमाध्यायस्य तृतीयः पादः॥ २, ३॥

"सु विदुरिव, सु विज्ञायेते इव"—इत्येते उदाहरणे। सुष्ठु विदुर्यज्ञं ब्राह्मण इति, इवोऽनर्थक एव वाक्यपूरणः। सुष्ठु विज्ञायेते यज्ञो नक्षत्रं ब्राह्मणैरिति, अत्रापीवोऽनर्थक एव॥

व्याख्याताः पदपूरणाः, निपातसमाहारमधुना दर्शयति, तदधिकारार्थोऽयम् "अथ" शब्दः। इति सम्भावने। अथायमेव इदिति केवलः प्रयुज्यमानः पदपूरणो भवति। अपिचायमेव "न-इत्येतेन" "सं" युक्तः, "प्रयुज्यते परिभये" अर्थे। सर्वतो

भयं परिभयम्। कथं प्रयोगः? "नेञ्जिम्हायन्त्यो नरकं पतामेति।" मृग्यःशेषः॥

केचित्त्वेतं कृतशेषमत्राधीयन्ते,—"हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान्। शचीर्मदन्त उत दक्षिणाभिर्नेञ्जिह्मायन्त्यो नरकं पताम" इति॥

नारदेन किल विप्रलभ्यमाना असुरपत्न्यो भर्तॄन् प्रति तमनेन मन्त्रेण प्रत्यूचुः। 'एके' तावत् 'इतः' लोकात् 'हविर्भिः' पुरोडाशादिभिर्निमित्तभूतैः 'स्वः' 'सचन्ते' स्वर्गं लोकं प्राप्नुवन्ति स्म। अथ 'एके' 'सवनेषु' यज्ञेषु सोमान् सुन्वन्तः अभिषुण्वन्तः, तेन कर्मणेत्यर्थः। 'शचीर्मदन्तः, अन्ये शच्या वाचा स्तुतिभिरेके देवान् मादयन्तः सन्तर्पयन्त इत्यर्थः। अप्यन्ये 'दक्षिणाभिः' स्वः सचन्ते इत्येतदेवानुवर्त्तते। तत्रैवं सति, तेन तेनाभ्युद्यतेषु प्राणिषु श्रेयः प्रति यदि वयमेतानपि भर्तॄन् सम्यक् परिचरेम। अन्येषां जपहोमादीनां कर्मणामसम्भवे सति। "न इत्" वयमेतेषामप्युप "जिह्मायन्त्यो" जिह्ममाचरन्त्यो भगवन् "नरकं पताम",—न ह्यन्यो भर्तृपरिचर्य्यातः स्त्रियाः कश्चनधर्मोऽस्तीत्यभिप्रायः॥

नरकशब्दं निर्व्रवीति,—नीचैरस्मिन्रम्यते गम्यत इति नरकम्। अथवा नास्त्यस्मिन् रमणं रतिकरं स्थानमल्पमप्यस्तीति नरकम्। अथाप्ययमपरो निपातसमाहारो नचेत्येष इदित्येतेनैव सम्प्रयुक्तः प्रयुज्यते। केनचिदनुपृष्टे सति प्रतिवचनं भवति। तद्यथा कश्चित् कश्चित् पृच्छति,—'तिष्ठन्ति' वृषलाः? इति। ततः प्रत्यावष्टे,—'तिष्ठन्ति' इति। ततो 'यदि तिष्ठन्ति, किमर्थं

नागच्छन्ति ?' इति पुनरनुपृष्टे ब्रवीति,—'न चेत् सुरां पिवन्त्यागमिष्यन्ति' इति, यदि सुरां न पिबन्तीत्यर्थः ॥

अथ "सुरा" कस्मात् ? "सुनोतेः",—सा ह्यभिषूयते अनेकैर्द्रव्यैः पिष्टादिभिः ।

"एवमुच्चावचेष्वर्थेषु निपतन्ति त उपेक्षितव्याः" । एवमनेन प्रकारेण उच्चावचेष्वर्थेषु बहुप्रकारेषु समाहूताश्चान्येऽप्येवं बहुप्रकारा निपतन्ति । प्रयुज्यमानास्ते लक्षणशास्त्रमेतच्चार्थनिर्वचनशास्त्रमुपेत्योपगम्य अनुप्रवेश्य, ईक्षितव्याः,—कः कस्मिन्नर्थं वर्त्तते ? इत्येवं द्रष्टव्याः परीक्ष्या इत्यर्थः ॥ ६ ॥

इति निरुक्तवृत्तौ षष्ठाध्यायस्य तृतीयः पादः ॥ ६, ३ ॥

चतुर्थः पादः ॥

इतीमानि चत्वारि पदजातान्यनुक्रान्तानि नामाख्याते चोपसर्गनिपाताश्च तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च न सर्वाणीति गार्ग्यो वैयाकरणानां चैके तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां संविज्ञातानि तानि यथा गौरश्वः पुरुषो हस्तीत्यथ चेत् सर्वाण्याख्यातजानि नामानि स्युर्यः कश्च तत्कर्म कुर्य्यात्

सर्वं तत् सत्त्वं तथाऽऽचक्षीरन् यः कश्चाध्वानमश्नु वीताश्वः स वचनीयः स्याद् यत् किञ्चित् तुन्द्यात् तृणं तदथापि चेत् सर्वाण्याख्यातजानि नामानि स्युर्यावद्भिर्भावैः सम्भयुज्येत तावद्भ्यो नामधेयप्रतिलम्भः स्यात् तत्रैवं स्थूणा दृशया वा सञ्जनी च स्यात् ॥ १ ॥

"इति"—करणोऽधिकारपरिसमाप्त्यर्थः। "इमानि चत्वारि पदजातान्यनुक्रान्तानि, नामाख्याते चोपसर्गनिपाताश्च" इति। प्रतिज्ञाभ्यासो निगम इत्यर्थः। इतीमानि, चत्वारि पदजातानीति व्याख्याय अनुक्रान्तानि,—पूर्वमाख्यातम्, ततो नामानि, ततः उपसर्गाः, ततो निपाता इत्येवमानुपूर्व्येण क्रान्तानि वर्णितानि। व्याख्ययेति वाक्यशेषः। कतमानि पुनस्तानि ? नामाख्याते चोपसर्गनिपाताश्च—इति। तदपि व्याख्यातमेव ॥ यच्च तदुक्तं,—'नाम्नः किञ्चिदवशिष्यते, तच्चतुर्थेन पादेन वर्णयिष्यामः'—इति (१ अ० १ पा० ४ ख०), तदिदमेवावसरप्राप्तं पदचतुष्टयलक्षणानन्तरमारभ्यते,—"तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च"। तत्र तस्मिन्नेव पादचतुष्टये यानि नामानि तानि सर्वाण्येवाविशेषेणाख्यातजानीत्येवं शाकटायन आचार्यो ब्रवीतीति वाक्यशेषः। नैरुक्तानां चैष समयः सिद्धान्तः सर्वेषामविशेषेण गार्ग्यवर्ज्यम् ॥

आह—कः पुनरन्यथा ब्रवीति, येनैवमुच्यते,—शाकटायनो ब्रवीतीति ? उच्यते,—"न सर्वाणीति गार्ग्यः" ब्रवीति। किं

गार्ग्य एव ब्रवीति ? नेत्युच्यते,—"वैयाकरणानां चैके"—व्याकरणमधीयन्ते ये, ते वैयाकरणाः, तेषां चैके न सर्वाण्याख्यातजानि नामानीत्येवं ब्रुवत इति वाक्यशेषः ॥

"तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां संविज्ञातानि तानि"—इति। तदेतत् प्रपञ्च्यते गार्ग्यपक्षेण। यान्याख्यातजानि नामानि, यानि यावन्ति, एवं पर्य्युपयुक्तस्तच्छब्दः। इह त्रिधा व्यवस्था नाम्नाम्। तद्यथा,—प्रत्यक्षक्रियाणि, प्रकल्पक्रियाणि, अविद्यमानक्रियाणि। तत्र, प्रत्यक्षक्रियाणि,—कारको हारक इति। प्रकल्पक्रियाणि, तद्यथा,—गौरश्व इति। अविद्यमानक्रियाणि, तद्यथा,—डित्थो डवित्थः, अरविन्दोऽर्वाङ् चन्द्र इति। तत्रैवं सति यत्र येष्वित्यर्थः। केषु नामसु स्वरसंस्कारौ, स्वरश्चोदात्तादिः, सस्कारश्च प्रकृतिप्रत्ययादिः, तौ स्वरसंस्कारौ। समर्थौ, समर्थता नामोपपत्तिरुच्यते, सङ्गतार्थौ, लक्षणशास्त्रविहितयोपपत्त्या युक्ताविति अर्थः। यथैव लक्षणाविप्रतिपत्त्या स्वरोऽवस्थितः, एवं संस्कारोऽपि। येष्वपि च प्रादेशिकेन, प्रदिश्यते द्रव्यमनयेति प्रदेशः क्रिया, या तस्मिन् द्रव्ये अवस्थिता यद्धेतुकस्तस्य नामधेयप्रतिलम्भोऽभिप्रेतः, तस्याः प्रदेशाख्यायाः क्रियायाः अभिधायको धातुः स गुण इत्युच्यते। अन्यत्र हि गुणशब्दो प्रधाने वर्त्तते। शेषः, अङ्गं, गुणः इति समानार्थाः। प्रधानन्तु तत्र क्रियाप्रदेशाख्या, तदभिधायको धातुः गुणाख्यः, स प्रदेशवाचकत्वात् प्रादेशिको गुण इत्युच्यते। तेन धातुरूपेणान्विताववनुगतौ स्वरसंस्कारौ स्यातां भवेताम्।

येषामाह, किन्तेषामिति ? उच्यते,—संविज्ञातानि तानि। समं विज्ञातानि ऐकमत्येन विज्ञातानीत्यर्थः। तेषु तावदविप्रतिपत्तिरेवास्माकमाख्यातजानि नामानीति। तद्यथा,—कर्त्ता, कारकः, पक्ता, पाचक इति। न पुनर्यथा गौरश्वः पुरुषो हस्तीति। किङ्कारणम् ? एतेषु प्रकल्पन्ते क्रियाः, न साक्षादुपलभ्यन्ते। अपि चैतेषु कल्पयितुमपि तावच्छक्यन्ते। तद्दिच्छादिषु पुनः कल्पयितुमपि शक्यन्ते। तस्मान्न सर्वाण्याख्यातजानि नामानीति। तत्र यदुक्तं 'सर्वाण्याख्यातजानि नामानि' इति तदयुक्तम्। रूढिशब्दे च क्रियाः केवलं शब्दव्युत्पत्तिकर्मण्युपलक्षणभूता निमित्तभावेनोपादीयन्ते, न वस्तुतोऽर्थक्रियास्वनुसहायभावं प्रति। तत्र शब्दस्य प्रच्युतानुपलक्षितेऽनुप्रवृत्ते ऽभिधाने निर्वृत्तायां क्रियायामुपरतसाधनव्यापारं निरूप्य क्रियायामभिधानं वस्तुमात्रस्य प्रतिनिर्देशकं रूढिरित्यभिधीयते ॥

अपरो व्याख्यामार्गः। "तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्याताम्"। यत्र यस्मिन्नाम्नि स्वरसंस्कारौ, समर्थौ अष्टाध्यायीलक्षणोपपत्त्या युक्तौ, प्रादेशाभिधायिना च धात्वाख्येन प्रादेशिकेन गुणेनान्वितौ अनुगतौ, स्यातां न्यायवत्कार्मनामिकसंयुक्तेन संस्कारेण। तद्यथा,—कर्त्ता, कारकः, पक्ता, पाचक इत्येवमादि। तदाख्यातजं गुणकृतमिति प्रतीम इति वाक्यशेषः। येषु पुनरष्टाध्यायीलक्षणपराङ्मुखौ स्वरसंस्कारावनुगतौ, न च न्याय्यकार्मनामिकसंस्कारयुक्तेन प्रदेशाख्येन धातुरूपेण। किं तेषामिति ? उच्यते,—"संविज्ञा-

नानि तानि" । संविज्ञानपदमितीह शास्त्रे रूढिशब्दस्येयं सञ्ज्ञा । वक्ष्यति हि, अग्निरिन्द्र इत्येवमादीनां संविज्ञानपदत्वम्—"यत्तु संविज्ञानभूतं स्यात्" इति । तथा वृत्रहा पुरन्दर इत्येवमादीनां गुणपदत्वम् । स एवमिहापि विभागो द्रष्टव्यः । तत्र गुणपदानि कारकपाचकादीनि । संविज्ञानपदानि तानि "यथा,—गौरश्वः पुरुषो हस्ती" इत्येवमादीनि,—न ह्येषां गवादीनाम् अष्टाध्याय्यां व्युत्पत्तिलक्षणमस्ति, तस्माद्रूढिशब्दा एवैत इति ॥

अन्ये तु प्रदेशो व्याकरणमिति व्याचक्षते । तत्र हि शब्दानां लक्षणानि प्रदिश्यन्ते । तत् कुतः ? क्वचिल्लक्षणानुग्रहः लक्षणावयवो वा गुण इत्युच्यते,—प्रसिद्धो हि गुणशब्दोऽनुग्रहेऽवयवे च । तद्यथा,—'गुणे ममायं वर्त्तते' इत्युक्तेऽनुग्रहे वर्त्तते इति गम्यते, अवयवेऽपि,—'द्विगुणा रज्जुः', 'त्रिगुणा' इति चोक्ते द्व्यवयवा त्र्यवयवेति गम्यते । शेषं समानमेव पूर्वाभ्यामर्थाभ्याम् ॥

अथवा संविज्ञानानि तानि, संविज्ञातानि तानि चेत्युभावपि पाठौ । तस्मादुभयथाऽपि व्याख्यातम्,—सत्त्वं प्रदेश इति । केचिदङ्गभूता क्रिया गुण इति व्याचक्षते ॥

किं चान्यत् ? "अथ चेत् सर्वाण्याख्यातजानि नामानि स्युः" । तथाप्ययमपरो दोषः प्रसज्येत । आह, कतम इति "यः कश्च तत् कर्म कुर्य्यात् सर्वं तत्सत्त्वं तथाचक्षीरन्, यः कश्चाध्वानमश्नुवीत, अश्वः स वचनीयः स्यात्, यत् किञ्चित् तृन्द्यात् तृणं तत्"—इति । यः कश्चाविशेषेण प्राणी तत् कर्म

कुर्य्यात्, यत् किञ्चिदनेकप्राप्याश्रयमेकवदभिप्रेत्योच्यते,—तत्कर्म कुर्य्यादिति ? सर्वमेव तं प्राणिनं तेनैवैकेन नाम्ना आचक्षीरन्। तद्यथा। यः कश्चाध्वानमविशेषेणानश्वोऽप्यश्नुवीत, अश्व इत्येवं स वचनीयः स्यात्। कस्माद्धाश्वः अश्नुवन्नश्व इत्युच्यते, अन्योऽश्नुवन्नपि नोच्यते ? इति विशेषहेतुर्नास्तीति। तस्माद्श्वोऽपि नैवाशनक्रियायोगाभिप्रायेणाश्व इत्युच्यते, किन्तर्हि ? शब्दव्यवहार एवायमर्थप्रत्यायनार्थः ईदृशः क्रियानिरपेक्षः। एवमेव, यत् किञ्चित् तृन्द्यादविशेषेण तत्सर्वं तदनक्रियायोगात् तृणमित्येवमुच्यते। तस्मान्न सर्वाण्याख्यातजानि नामानीति ॥

किञ्चान्यत् ? "अथापि चेत्" अथापि यदि "सर्वाण्याख्यातजानि नामानि स्यु." । तथाप्ययमपरो दोषः स्यात्। आह, कतमः ? उच्यते,—"यावद्भिर्भावैः सम्प्रयुज्येत तावद्भ्यो नामधेयप्रतिलम्भः स्यात् तच्चैवम्" । तद्यथा,—स्थूणा दरशया वा सञ्जनी च स्यात्", क्रियाहेतुके हि नामधेयप्रतिलम्भे सति यावद्भिर्भावैर्यावतीभिः क्रियाभिरेकं द्रव्यं संयुज्येत, तावद्भ्यो भावेभ्यः क्रियाभ्यो नामधेयप्रतिलम्भः स्यात्। किं कारणम् ? न हि तत्र कासाञ्चिद्व्यावर्त्तको विशेषहेतुरस्ति, अन्यासां वा नियामकः। तच्चैवं सति स्थूणा एकैव सति दरे शेते इति दरशया इत्युच्येत, न चोच्यते। तथा च सज्यतेऽस्यां वंश इति सञ्जनीत्युच्येत न चोच्येत। एवमनेकानि सत्त्वानि एकक्रियायोगादेकनामानि स्युः, एकं वानेककक्रियायोगादनेकनाम, उभय-

थापि च व्यवहाराप्रसिद्धिः। तस्मान्न सर्वाण्याख्यातजानि नामानि स्युः ॥ १ ॥

अथापि य एषां न्यायवान् कार्मनामिकः संस्कारो यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन् पुरुषं पुरिशय इत्याचक्षीरन्नष्टेत्यश्वन्तर्दनमिति तृणमथापि निष्पन्नेऽभिव्याहारेऽभिविचारयन्ति प्रथनात् पृथिवीत्याहुः क एनामप्रथयिष्यत् किमाधारश्चेत्यथानन्वितेऽर्थेऽआदेशिके विकारे पदेभ्यः पदेतरार्द्धान् सञ्चस्कार शाकटायन एतेः कारितश्च यकारादिञ्चान्तकरणमस्तेः शुद्धञ्च सकारादिञ्चाथापि सत्त्वपूर्वो भाव इत्याहुरपरस्माद्भावात् पूर्वस्य प्रदेशो नोपपद्यत इति तदेतन्नोपपद्यते ॥ २ ॥

आह,—किमिति ? उच्यते,—"य एषां न्यायवान् कार्मनामिकः संस्कारो यथा चापि प्रतीतार्थानि स्युस्तथनान्याचक्षीरन्"।

एषां पुरुषाश्वादिनाम्नां न्यायवान् लक्षणन्यायेन युक्तः।

आह,—कः पुनरसाविति ? उच्यते,—कार्मनामिकः संस्कारः। कर्मकृतं नाम तत् पुनः पाचकलावकादि, तस्मिन् भवः कार्मनामिकः संस्कारः। किञ्च। यथाचापि प्रतीतार्थानि स्युः, प्रतीतक्रियाणि स्युः तथैव नान्यान्याचक्षीरन् जनाः ॥

आह,—कथं पुनराख्यायमानान्येतानि न्यायवता कार्मनामिकानि संस्कारेणोपेतानि स्युः, कथं वा प्रतीतक्रियाणीति ? उच्यते,—"पुरुषं" तावत् पुरि शय इत्याचक्षीरन्" । पुरि ह्यसौ शेते पुरिशय इति प्राप्नोति । एवमसौ न्यायवता कार्मनामिकसंस्कारयुक्तेन शब्देनोक्तः स्यात् । एवं चैष प्रतीतक्रियः शब्दो भवति । एवमेव "अष्टा इत्यश्वम्" आचक्षीरन्,—अश्नोति हि असौ इति अष्टा प्राप्नोति । एवमेव तृन्द्यते तमिति "तर्दनमिति तृणम्" आचक्षीरन् । न चैवमाचक्षते । न चासति कारणे विद्यमाना क्रिया परोक्षीकर्त्तुं न्याय्या, तस्मात् न सर्वाणि आख्यातजानि नामानीति ॥

"अथापि" इदमपरमप्राप्तं कुर्वन्ति, ते शाकटायनादयः । किम् ? "निष्पन्नेऽभिव्याहारेऽभिविचारयन्ति, प्रथनात् पृथिवीत्याहुः, क एनामप्रथयिष्यत्"—इति । निष्पन्ने, कस्मिन् ? अभिव्याहरणमभिव्याहारः, तस्मिन्नभिव्याहारे, ततः पश्चादाभिमुख्येन स्थित्वा तस्याभिधानस्य, ततो विचारयन्ति ।

कतमस्य धातोरत्र रूपमिति ? आह,—प्रथनापृथिवीत्याहुः ते शाकटायनादयः ।

आह,—ततः किमिति ? उच्यते,—तत्र वयं पृच्छामस्तावत्, यदीयं स्वभावत एव पृथिवी नाम अभविष्यत्, ततः क एनामपृथिवीं सतीमप्रथयिष्यत् ? कोऽस्याः प्रथनमकरिष्यदित्यभिप्रायः ॥

अथापि कश्चिदस्याः अपृथिव्याः सत्याः प्रथनकर्त्ताभ्युपगम्येत, ततोऽपि च वयमिदमपरं पृच्छामः,—"किमाधारश्च इति" ।

चशब्दः समुच्चयार्थः,—सर्वस्य हि प्राणिजातस्येयमेवाधारः प्रतिष्ठा, अथ पुनर्यदेयममथितासीत्, तदा योऽस्याः प्रथयिता स किमाधार आसीत् ?—न ह्यनाधारेणाप्रतिष्ठितेनशक्येयं प्रथयितुम्, स वाधारो नास्तीति प्रथनक्रियाभावः प्रथनक्रियाभावे च सति क्रियाजान्येवमादीनि नामानीत्येतदयुक्तम्। तस्मान्न सर्वाण्याख्यातजानि नामानीति ॥

"अथ" अपि इदमपरमप्राप्तं शाकटायनः कृतवान्।

आह,—किमिति? उच्यते,—"अनन्वितेऽर्थे" इत्येवमादिर्दोषः।

आह,—वेदाङ्गानामेकैकमनेकप्रभेदम्। तद्यथा,—निरुक्तं चतुर्दशप्रभेदम्। व्याकरणमष्टप्रभेदम्। तत्र, केषाञ्चिन्नैरुक्तानां कैश्चिद्वैयाकरणैः साकं केषुचिच्छब्देष्वैकमत्यं केषाञ्चिद्वैमत्यम्। तत्र, शाकटायनो नैरुक्ताश्च गार्ग्यवर्जं कानिचिदभिधानान्यनेकैर्धातुभिरनुविदधति, कानिचिदेकेनैव। किं कारणम्? प्रतिनियतो हि स्वेषु स्वेषु व्याकरणेषु शब्दानुविधानसमयः। तद्यथा,—पाणिनीया भू इति प्रकृतिमुपादाय लङित्येतं प्रत्ययमुपाददते। ततः कृत्वा सानुबन्धलोपस्य लस्य स्थाने तिबादीनादिशन्ति, तथाहि ते तं शब्दमनुविधातुं शक्नुवन्ति। स हि तेषां शब्दानुविधानोपायः पाणिनिना परिकृतः। सैषा शब्दानुविधाने तन्त्रशीलीत्येतदेवैकं प्रयोजनमुक्त्वा नान्यत् प्रयोजनमस्ति लङादीनामध्ययने लोपे च। अपरे पुनर्वैयाकरणा लटमकृत्वैव तिबादीनेवोपाददते। तेषामपि हि शब्दानुविधाने सा तन्त्रशीली। एवं प्रतिनियतया स्वया स्वया तन्त्रशील्या भवतीत्येवमादि समानमेव

शब्दरूपं साधयन्ति। तत्रैवं शब्दानुविधानोपायविप्रतिपत्तौ सत्यां शाकटायन आचार्योऽनेकैश्च धातुभिरेकमभिधानमनुविहितवान्, एकेन चैकमेव। तत्र यदनेकैरनुविहितवान्, तदितरैर्गार्ग्य-पाणिन्यादिभिर्न मृष्यते। किं कारणम्? अप्रसिद्धो हि स तेषां शब्दानुविधानमार्गः। धातुसमुदायमात्रमेव नामेति। अतस्ते शाकटायनमाक्षिप्यन्त आहुः—"अथानन्विते ऽर्थे" इति। अनन्विते ऽर्थे अननुगते शब्देनार्थे, यत्र संस्कार्य्यमाणोऽपि शब्दोऽर्थमनुगन्तुं न शक्नोति। एवं धातुज असमर्थो भवति।

"अप्रादेशिके विकारे" च। यया हि क्रियया तद्द्रव्यं प्रदिश्यते, तदभिधायको यो धातुः, स तदभिधानं विगृह्यमाणं विकर्तुं न शक्नोति यत्र।

तत्र ह्रीयमानप्रतिज्ञः शाकटायनः सर्वाण्याख्यातजानि नाम-न्युपपादयिष्यन्नसम्भवे सति काशकुशावलम्बनमिव कुर्वन् किम-करोदिति? "पदेभ्यः पदेतरार्द्धान् सञ्चस्कार शाकटायनः"। पदेभ्यः आख्यातपदेभ्यः समस्तेभ्योऽवयवानुपादाय पदेतरार्द्धान् अन्यान् अन्यांश्च इतरेतराख्यान् पदावयवैरन्यैश्चान्यैश्चान्यदर्द्धं नाम्नः संस्कृतवान्॥

तद्यथा,—'सत्यम्'—इत्येतदभिधानं सञ्चस्कार। कथम्? "एतैः कारितं च यकारादि चान्तकरणमस्तेः शुद्धं च सकारादि ”। एतैः 'इण् गतौ (अ० प०)'—इत्यस्य कारितं ण्यन्तं रूपं कृत्वा ततो यकारमन्तमादाय यकारान्तं कृत्वा सत्यशब्दस्यान्तमर्द्धं सञ्चस्कार, ततो 'यम्'—इति भवति। अस्तेः शुद्धञ्च। 'अस्

भुवि (अ० प०)'—इत्येतस्य शुद्धमेव रूपं कृत्वा तकारान्तमित्यर्थः। ततः सकारादिशब्दरूपं गृहीत्वा 'सत्'—इत्येतत्, 'सत्यम्'—इत्येतस्य शब्दस्य आदिमकरोदाद्यमर्थं सञ्चस्कार, तत्सदिति भवति। अत्र योऽयमस्तेस्तकारः, स यकारमधिरोहति। एवमेतदेकमभिधानं द्वयोर्धात्वोः सञ्चस्कार सत्यमिति भवति॥

अथ कोऽर्थः? सन्तमर्थं मापयति प्रत्यापयति गमयतीति सत्यम्। कारित च यकारादिश्च शुद्धञ्च सकारादिश्चेति इतरस्य चेतरं चार्द्धमिति समुच्चयार्थाश्चकाराः एवं पदेभ्यः पदेतरार्द्धान् सञ्चस्कार शाकटायनः, तदेतदन्याय्यं कृतवान्,—को हि नाम पदं विभज्यानेकधातुजं कुर्य्यात्, तदेतदकृतपूर्वमन्यैर्विद्वद्भिः शाकटायनोऽतिपाण्डित्याभिमानाद्करोत्,—यदभिनत् पदानि॥

अपि चोपजायते नः शङ्का, यथासौ प्रवृत्तो नासौ पदेषु स्थास्यति, अपि चासौ वर्णानपि भेत्स्यति, अनेकार्थांश्च कल्पयिष्यति। यो हि पदान्यभिनत्, तस्य वर्णभेदे विशेषहेतुः को भविष्यति? तस्मादतिप्रसङ्गदोषोपपत्त्या नानेकधातुजानि नामानि, नापि सर्वाण्याख्यातजानि नामानीति॥

"अथापि" अयमपरो दोषः प्रसज्येत। कतमः? "सत्त्वपूर्वो भाव इत्याहुः" अभियुक्तास्तद्विदः। सत्त्वं पूर्वमस्मात्सोऽयं सत्त्वपूर्वः। किं कारणम्? सत्त्वाश्रय एव ह्यसौ। तत्रैवं सति "अपरस्माद्भावात्" अपरकालीनेन भावेन क्रियया "पूर्वस्य"

पूर्वोत्पन्नस्य "प्रदेशः" प्रदेशनं सञ्ज्ञा प्रतिलम्भो "नोपपद्यते"। किं कारणम्? उत्पत्तिसहभूता हि सा, स्वेनाभिधानेन क्रिया-निरपेक्षेणाभिसम्बद्धमेव द्रव्यमुत्पद्यते,—नित्यसम्बद्धौ हि शब्दार्थौ। "इति तद्देतन्" सर्वथा सर्वाण्याख्यातजानि नामानीति शाकटायनमतं "नोपपद्यते"। तदनुपपत्तावस्मत्पक्षसिद्धिः,—कानिचिदाख्यातजानि नामानि, कानिचिदनाख्यातजानीति। अथ शक्यते प्रत्यवस्थातुं प्रत्यवस्थीयतामिति परिसमाप्तो गार्ग्यपक्षः ॥ २ ॥

शाकटायनपक्षेणेदानीमेतान् दोषान् प्रतिसमाधास्यामस्तदर्थमिदमारभ्यते,—

यथो हि नु वा एतत्तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां सर्वं प्रादेशिकमित्येवं सत्यनुपालम्भ एष भवति यथो एतद्यः कश्च तत्कर्म कुर्य्यात् सर्वं तत्सत्त्वं तथाचक्षीरन्निति पश्यामः समानकर्मणां नामधेयप्रतिलम्भमेकेषां नैकेषां यथा तक्षा परिव्राजको जीवनो भृमिज इत्येतेनैवोत्तरः प्रत्युक्तो यथो एतद्यथा चापि प्रतीतार्थानि स्यु स्तथैनान्याचक्षीरन्निति सन्त्यल्पप्रयोगाः कृतोऽप्येकपदिका यथा व्रततिर्दर्भमूनाजाट्य आट्णारो जागरूको दर्विहोमीति यथो एतन्निष्पन्नेऽभिव्याहारेऽभिवि-

चारयन्तीति भवति हि निष्पन्नेऽभिव्याहारे योगपरीप्टिः अथनात् पृथिवीत्याहुः क एनामप्रथयिष्यत् किमाधारश्चेत्यथ व दर्शनेन पृथुरप्रथिता चेदप्यन्यैः ॥ ३ ॥

"यथो हि नु वा एतत्" इति। यथेति वाक्योपादाने, यथा येन प्रकारेण। उकारोऽवधारणार्थः। व्याख्यातमेतत्,—"अथाप्युकार एतस्मिन्नेवार्थे"। इतरेण येनैव प्रकारेण प्रसिद्धमाचार्येणाख्यातजत्वं प्रतिषिद्धं नाम्नः, तेनैव प्रकारेण प्रत्यनुभाष्यामीति। हि—इत्यसूयायाम्। कथं हि व्याकरिष्यतीति। नु—इत्येष हेत्वपदेशे। वै—इत्ययं यथोक्तपूर्वपक्षोपदेशार्थः। येनैव प्रकारेणासमर्था हेतव उक्ताः, तेनैव प्रकारेण प्रत्यनुभाष्य प्रतिवक्तृधर्मेण समीकरिष्यामः॥

यथैतदुक्तं किमिति? "तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्याताम्" इति। आह तत्र किमिति? उच्यते,—तदेतत् प्रत्युच्यत इत्युपप्रयुक्तस्तच्छब्दः॥

आह,—केन पुनः प्रकारेण प्रत्युच्यत इति? उच्यते—"सर्वं प्रादेशिकमित्येवं सत्यनुपालम्भ एष भवति"। सर्वमेव प्रादेशिकं सर्वमेष क्रियाजं नाम। आह,—ततः किम्? इत्येवं सत्यनुपालम्भ एप भवति। आह, कथम्? शृणु प्रदेशवाचिन आख्यातानुत्प्रेक्ष्य तदाश्रयौ स्वरसंस्कारौ यावद्गम्यमनुविधेयौ,—विभ्वी हि लक्षणगतिर्नैष शब्दापराधो नाप्यस्माकम्। भवत इवायमपराधो मन्दशिक्षितत्वात्,— येना-

दुविधातुं स्वरसंस्कारौ विद्यमानावपि प्रदेशवाचिनि धातौ न शक्नोषि, स त्वं तावत् पुनः पुनः शिक्षस्वान्यद्व्याकरणं यावच्छक्तिस्तवानुविधातुमिति। व्याकरणेऽप्यष्टधाभिन्ने लक्षणैरेकदेशो विश्लिष्टः। कश्चित् सौत्रो धातुः, कश्चित् तुशब्दचशब्दवाशब्दातिरिक्ताध्याहारविभागादिगम्यः। तद्व यथा। मतान्तरेष्वप्यभिन्नेषु कश्चित् क्वचिद्विधिरुच्यते। ते च सर्व एव प्रयोगमिच्छता प्रयोगकाल उपसंहर्त्तव्याः। एवमिहापि सर्वाण्येव लक्षणशास्त्राण्यपेक्ष्याणि अखिलस्वरसंस्कारसिद्धये। —इति स त्वं तावत् शिक्षस्वानिर्घिणः, यावदखिलशब्दानां स्वरसंस्कारावनुविधातुमुपक्रान्तुं सामर्थ्यमिति॥

"यथो एतत्" यत् पुनरेतदुक्तम्,—"यः कश्च तत् कर्म कुर्य्यात्, सर्वं तत् सत्त्वं तथाऽऽचक्षीरन्निति"। अनेकेषामेकक्रियायोगादेकनामता प्रसज्येतेति॥

अत्र ब्रूमः,—न हि प्रसज्यते। त्वमपि पश्यसि, वयमपि च "पश्यामः समानकर्मणां" तुल्यकर्मणां अपि सतां कर्मकृतां "नामधेयप्रतिलम्भमेकेषां नैकेषां यथा तक्षा परिव्राजको जीवनो भूमिज इति।" तक्षन् कश्चित् तक्षेत्युच्यते। अन्यः तक्षकपि न तक्षेत्युच्यते, आह,—कोऽत्र हेतुरिति? शृणु—लोकमेव पृच्छ, तमेवोपालम्भस्व, न मयैष नियमः कृत इति। अथ च तद्यथा,—समानमीहमानानां कश्चिदेकार्थेन संयुज्यते, कश्चिन्न, वेदादीनाम्, एकार्थेन संयुज्यत इति अन्यैरपि संयुक्तः, सत्यमेकेन चालब्धम्। स्वभावतो हि शब्दानां क्रियाजत्वेऽपि सति काञ्चि

देव क्रियामङ्गीकृत्यावस्थितिर्भवतीति। अथवा क्रियातिशयकृतो नियमः स्यात्,—यो हि यदतिशयेन करोति, तस्यानेकक्रियावत्त्वेऽपि सति तद्धेतुक एव नामधेयप्रतिलम्भो भवति॥

अयं समाधिः,—अथवा न ब्रूमो यो यत्र यदा च तक्षति, स एव तक्षेति। किन्तर्हि? यो यदा यत्र तक्षा भवति, स एव तक्षेति। तदेतल्लक्षणमनियतं, काममन्येष्वप्यस्तु कदाचित् कचित् तेषामप्यन्याः क्रिया नियततराः सन्ति, यद्धेतुको नामधेयप्रतिलम्भ इति? तेषां तु तक्षा नियमतः तक्षतीति विशेषः। जीवन इक्षुरसः, शाकजातिर्वा। भूमिजोऽङ्गारकः॥

"एतेनैवोत्तरः प्रत्युक्तः"। आह,—कतमः? यावद्भिर्भावैः सम्प्रयुज्येत तावद्भ्यो नामधेयप्रतिलम्भः स्यादित्येषः। पश्यामोऽनेकक्रियायुक्तानामपि एकक्रियाकारितो नामधेयप्रतिलम्भो भवति। तद्यथा,—तक्षा, परिव्राजक इत्येतान्येवोदाहरणानि। तक्षा ह्यन्यान्यपि कर्माणि करोति। न पुनस्तस्य तत्कृतो नामधेयप्रतिलम्भोऽस्ति। तत्र, यदुक्तमेकस्यानेकक्रियायोगादनेकनामता प्रसज्येतेति। एतदयुक्तम्। न हि प्रसज्येत। यदि वोक्तमनेकेषामेकनामता, एकस्य चानेकनामता प्राप्नोति,—ततश्च व्यवहाराप्रसिद्धिरिति, न हि तदुभयमस्ति। अनेकेषामेकक्रियायोगे हि सति एकस्य चानेकक्रियायोगेऽपि हि सति व्यवस्थित एव शब्दनियमः स्वभावत एव लोके। तस्मान्न व्यवहाराप्रसिद्धिदोषोऽस्ति। तत्र, यदुक्तं व्यवहाराप्रसिद्धिदोषप्रसङ्गान्न सर्वाण्याख्यातजानि नामानीति, एतदयुक्तम्॥

"यथो एतत्" यत् पुनरेतदुक्तम्—"यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति"। अत्र ब्रूमः,—शब्दस्वाभाव्यमेतत्' —यत् तथा सर्वाण्याख्यायन्ते, यथा यथा प्रतीतार्थानि भवन्ति न तत्राहमपराध्ये भवतः, नापि शास्त्रम्। यथावस्थितानां हि शब्दानामन्वाख्यानमात्रमेव क्रियते, नाह शब्दानां कर्त्ता, य एषां प्रयोक्तारस्तानेवोपालम्भस्व, निराकुरु वा यदि शक्नोषि॥

आह,—कस्मात् पुनः कानिचिदाख्यायन्ते लोके? तदभिधाने स्वाभाव्यमेव,—कानिचित् प्रतीतार्थानि, कानिचिदप्रतीतार्थानि, तान्यपि शास्त्रेण प्रतीतार्थान्येव कर्त्तव्यानि एतदेव शास्त्रस्य शास्त्रत्वम्,—यदप्रतीतार्थान्यपि प्रकृत्यादिना प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति आख्यायन्त एव कानिचित्, कानिचिच्छास्त्रेण प्रतीतार्थानि क्रियन्ते। रूढ्यनुविधायित्वाल्लक्षणस्य, गुणतस्तेषु लक्षणम्। अपि च। "सन्ति" एव "अल्पप्रयोगाः" प्रतीतार्थक्रियाः केचित् "कृतः" कृत्प्रत्ययान्ताः शब्दाः "अपि" "एकपदिकाः" एकपदप्रकरणान्तर्वर्त्तिनस्तद्धर्माणः। तत् "यथा,—व्रततिर्दमूना जाट्य आट्णारो जागरूको दर्विहोमीति"। व्रततिर्वृणातेर्वल्ली। दमूना दममना वेत्येवमादि, अग्निरतिथिर्वा। जाट्यः जटावान्। आट्णारो अटनशीलः। जागरूको जागरणशीलः। दर्विहोमीति दर्व्या जुहोतीत्येवं प्रतीतार्थान्यपि शाकटायनाभिप्रायः। तत्र यदुक्तं—'न सर्वाण्याख्यातजानि नामानीति' तद् युक्तम्॥

"यथो एतत्"—पुनरेतदुक्तम्,—"निष्पन्नेऽभिव्याहारेऽभिविचारयन्तीति"। अत्र ब्रूमः,—युक्तं ते कुर्वन्ति—"भवति

हि निष्पन्नेऽभिव्याहारे योगपरीष्टिः"। योगपरीष्टिर्नाम योगस्य परीक्षणम्॥

कथञ्चानुत्पन्नः सन्नभिधानयोगः परीक्ष्येत। तत्र यदुक्तं—"प्रथनात् पृथिवीत्याहुः"। "क एनामप्रथयिष्यत् किमाधारश्चेति"। वयमेवं ब्रूमः,—प्रथितेयं केनचिदतः पृथिवीयमित्याह। कथमियमप्रथिता सती पृथिवीत्वमापेति? उच्यते,—"अथ वै दर्शनेन पृथुरप्रथिता चेदप्यन्यैः"। दृश्यमाना हीयं पृथिवी। तस्मात् यद्यप्यप्रथिता कैश्चिदन्यैस्तथापीयं पृथुदर्शनयोगात् पृथिव्येव। तत्र, यदुक्तं—'क एनामप्रथयिष्यत् किमाधारश्च?' एतदयुक्तम्, अन्यथा हि धात्वर्थो नोपपद्यत एव। तत्रैवं सति, यथा न विरोत्स्यते, तथा निर्वक्ष्यामः। तस्मादविरुद्धः शाकटायनाभिप्रायः॥ ३॥

अथाप्येवं सर्व एव दृष्टप्रवादा उपालभ्यन्ते यथो एतत्पदेभ्यः पदेतरार्द्धान् त्सञ्चस्कारेति योऽनन्वितेऽर्थे सञ्चस्कार स तेन गर्हः सैषा पुरुषगर्हा यथो एतदपरस्मादभावात् पूर्वस्य प्रदेशो नोपपद्यत इति पश्यामः पूर्वोत्पन्नानां सत्त्वानामपरस्मादभावान्नामधेयप्रतिलम्भमेकेषां नैकेषां यथा विल्वादो लम्भचूड़क इति विल्वं भरणाद्वा भेदनाद्वा॥ ४॥

इति प्रथमाध्यायस्य चतुर्थः पादः॥ १, ४॥

"अध" । "अपि" च, यदि दृष्टेऽप्यस्याः पृथुत्वे न वयमुपलभ्यामहे । ननु "एवं" सति, "सर्व एव दृष्टप्रवादा उपालभ्यन्ते" न केवलमहमेव । योऽयं दृष्ट्वा ब्रवीति, स तत्र दोष एव । तथा सति, दृष्टहानं प्रसज्येत, अनिष्टञ्चैतत् । तस्मात् पृथुदर्शनात् पृथिवीत्युच्यते ॥

"यथो एतत्" यत् पुनरेतदुक्तम्—"पदेभ्यः पदेतरार्द्धांत्सञ्चस्कारेति" अत्र ब्रूमः,—"योऽनन्विते" शब्देनानभिधेये "अर्थे" अननुगतमसम्बद्धं "सञ्चस्कार, स तेन" सम्बद्धेन संस्कारेण "गर्हः" गर्हणीयः । पुनराचार्यो योऽनुगतधातुभिरनेकैरेकाभिध्यानगतानर्थांस्ततः सञ्चस्कार, नैव मौढ्येन । "सैषा" तदभिप्रायापरिज्ञानात् "पुरुषगर्हा" पुरुषो हि कश्चित् अशिक्षितत्वादेकधातुजमपि न जानाति, किमुत बहुधातुजम् । अपि च सन्ति लोके तादृशाः पुरुषाः, ये कारकहारकादीन्यपि प्रकटक्रियाणि सन्ति, कतमेभ्यो धातुभ्य एतान्यभिनिष्पाद्यन्त इति न जानते, एष पुरुषदोषो न शास्त्रदोषः,—यदनुगमयितुं शब्दैरर्थो न शक्यते। नन्व,—'यदुक्तम्, अननुगत एवार्थे सञ्चस्कार शाकटायनः, सन्तमेव ह्यर्थमाययति गमयतीति' सत्यम् । तस्मादुपपद्यत एव शाकटायनमतम् ।

अपि च, रूढ़िशब्दव्युत्पत्तिर्मन्त्रेष्वपि दृश्यते । यथा लक्षणं, तथा लक्ष्यं प्रवर्तितुमर्हति,—इतरथा हि कस्य तल्लक्षणं स्यात् । यद्सर्पत् तत्सर्पिरिति मन्त्रः, यन्नवनीतमभवदिति मन्त्रः । अपि च, ब्राह्मणेनाप्यनेकधातुजान्येव कृत्वा निरु-

च्यन्ते। तत्र मन्त्राभिधानानि यत्परिज्ञाने च फलमुपपद्यते। आह,—"तदेतत् त्र्यक्षर ᳪहृदयमिति, ह इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद, द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद, यमित्येकमक्षरमेति स्वर्गं लोके य एव वेद (श० ब्रा० १४, ८, ४, १)"—इति। एवं हरतेर्दद्दातेरेतेर्हृदयशब्दः। तदर्थ-फलोपदर्शनार्थं ब्राह्मणेनैव निरुक्तः। तच्च नः परं प्रमाणम्। तस्माच्छाकटायनस्तदनुदृश्य सम्यगेव कृतवान्,—यदनेकैर्धातुभि-रेकमभिधानं निरुक्तवानिति।

"यथो एतत्" यत् पुनरेतदुक्तम्,—"अपरस्माद्वावात् पूर्वस्य प्रदेशो नोपपद्यत इति पश्यामः" अत्र ब्रूमः,—"पूर्वोत्पन्नानां सत्त्वानामपरस्माद् भावान्नामधेयप्रतिलम्भम्"। अपरस्मादपि सतो भावात्। "एकेषाम्? न एकेषाम्"। तत् "यथा"—"विल्वादो लम्बचूड़क इति"। पश्चात्कालीनयापि चूड़ालम्बन-क्रियया, भविष्यता योगेन विल्वादनक्रियया च, पूर्वोत्पन्नस्य सत्त्वस्य नामधेयप्रतिलम्भ उपपद्यमानो दृष्टः। क्व चान्यत्र नोप-पद्यते। तत्र यदुक्तमपरस्माद्भावात् पूर्वस्य प्रदेशो नोपपद्यते, रूढ्यै तदनेकत्वादयुक्तम्। उपपद्यत एव हि केषाञ्चिदिति॥

"विल्वं भरणाद्वा भेदनाद्वा"। भृतं हि तद् भवति वीजा-नाम्, बिभर्त्ति वा। दुर्भिक्षादौ भक्ष्यमाणं जनम्, भेदनाद्वा भिद्यते हि तदवश्यं भक्षणायेति॥

आह,—किमिदमतिमध्विव किमपि पूर्वोत्तरपक्षसम्बद्धं नामा-ख्यातजत्वमधिकृत्योक्तमिति? उच्यते,—शिष्यबुद्धिवृद्ध्यर्थमेत-

दुक्तम्, कथं नाम व्युत्पन्नबुद्धिः शिष्योऽप्रतिबुध्यमानः सर्वतो-मुखानेव लौकिकवैदिकाञ्छब्दान्निर्ब्रूयादिति। सर्वाण्येव हि व्याकरणानि निरुक्तानि च वेदाङ्गत्वाविशेषात् प्रमाणानि। तेषा-मेव फलमिदं साध्वित्येतदशक्यं तदुक्तमिति ॥ ४ ॥

इति निरुक्तवृत्तौ षष्ठाध्यायस्य चतुर्थः पादः ॥ ४ ॥

पञ्चमः पादः

अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यतेऽर्थम-प्रतियतो नाल्पन्तं स्वरसंस्कारोद्देशस्तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकञ्च यदि मन्त्रार्थप्रत्यया-यानर्थकं भवतीति कौत्सोऽनर्थका हि मन्त्रास्तदेते नोपे-क्षितव्यं नियतवाचो युक्तयो नियतानुपूर्व्या भवन्त्यथापि ब्राह्मणेन रूपसम्पन्ना विधीयन्ते। उरु प्रथस्वेति प्रथयति। ग्रोहाणीति ग्रोहत्यथाप्यनुपपन्नार्थाभवन्ति। ओषधे त्राय-स्वैनं स्वधिते मैनं हिंसीरित्याह हिंसन्नथापि विप्रतिषि-द्धार्था भवन्ति। एक एव रुद्रोऽवतस्थे न द्वितीयः। असंख्याताःसहस्राणि ये रुद्रा अधि भूम्याम्। अशत्रुरिन्द्र

जज्ञिषे शतं सेना अजयत्साकमिन्द्र इत्यथापि जानन्तं सम्प्रेष्यत्यग्नये समिध्यमानायानुब्रूहीत्यथाप्याहादितिः सर्वमिति। अदितिर्द्यौरदितिरन्तरिक्षमिति। तदुपरिष्टाद्व्याख्यास्यामोऽथाप्यविस्पष्टार्था भवन्त्यभ्यग्यादृश्मिञ्जारयायिकाणुकेत्यर्थवन्तः शब्दसामान्यादेतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत् कर्म क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणम् ॥ १ ॥

एवं नामाख्यातोपसर्गनिपातानां प्रविभागेनावस्थितानामेतल्लक्षणं परिज्ञायते—"अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते"। अथशब्दोऽधिकारार्थः। द्वितीयं शास्त्रारम्भप्रयोजनमधिकरोतीति। अपीति सम्भावने। अपि पदेषु विभागेनावस्थितेषु लोके वेदे वा, अपि मन्त्रेषु वाक्यभावेनावस्थितेषु, यः समस्तार्थस्तस्मिन् प्रत्ययो विशेषावधारणं न विद्यते, न भवतीत्यर्थः। अपीदं शास्त्रमन्तरेण पदार्थप्रत्ययो नास्ति। अपि वाक्यार्थ इत्यभिप्रायः ॥

आह,—कः पुनः पदार्थवाक्यार्थयोर्विशेष इति ? उच्यते,—साकाङ्क्षः पदार्थो निराकाङ्क्षो वाक्यार्थः। तद्यथा,—गौरित्युक्ते किमित्याकाङ्क्षा भवति, ततो गच्छतीत्युक्ते निराकाङ्क्षं भवति, तथा गच्छतीत्युक्ते क इति साकाङ्क्षं भवति तथा गौरित्युक्ते निराकाङ्क्षं भवति। अथेदानीं गौर्गच्छतीत्युक्ते गौर्वाह-

दोहादिभ्यो व्यावृत्य गमनेऽवतिष्ठते, गमनं चान्येभ्यो व्यावृत्य गव्येवावतिष्ठते। एष वाक्यार्थः। स एष प्रकरणाविरोधी वाक्यार्थः पदार्थं नियमेन लक्षयति, पदार्थश्च पदलक्षणम्। पदार्थसन्निधोगेन हि व्याकरणे पदानां प्रकृतिप्रत्ययादीनि लक्षणानि व्यादिश्यन्ते॥

यत एवमतः "अर्थमप्रतियतो नात्यन्तं स्वरसंस्कारोद्देशः"। अर्थमप्रतियतोऽप्रतिपाद्यमानस्यावधृतार्थस्येत्यर्थः। "नात्यन्तम्"। नैकान्तिकेन, एकान्तं नाम निश्चयोऽनिश्चयेनेत्यर्थः। किम्? 'स्वरसंस्कारोद्देशः'। स्वरोद्देशः संस्कारोद्देशश्च, स्वरावधारणं संस्कारावधारणं नास्तीति वाक्यशेषः। किं कारणम्? न ह्यनवधृतार्थः स्वरसंस्कारावधारयितुं शक्नुयात्,—अर्थवशेन हि स्वरसंस्कारावतिष्ठेते॥

"तदिदम्" एवं कृत्वा निरुक्तशास्त्रं "विद्यास्थानम्" एतदधीनत्वादर्थपरिज्ञानस्य। अर्थवशगत्वाच्च स्वरसंस्कारयोरिदं "व्याकरणस्य कार्त्स्न्यं" कृत्स्नभावं, करोतीति वाक्यशेषः। व्याकरणेन हि स्वरसंस्कारौ चिन्त्येते। तस्मादपरिसमाप्तमेव तावद् व्याकरणं यावत् निरुक्तं नाधिगतमिति,—न हि अनैरुक्तोऽर्थमवधारयितुमलम्,—नानवधृतार्थः स्वरसंस्कारतत्त्वं विजानीयादिति॥

आह,—ननु व्याकरणस्य कार्त्स्न्यमेतत् करोतीत्युक्ते तच्छेषमेवैतत्, गुणादिवत्, ततश्च विद्यास्थानत्वमस्य विरुध्यत इति? नेत्युच्यते,—"स्वार्थसाधकञ्च"। स्वार्थाजहद्वृत्त्या (अजहत्स्वार्था-

वृत्त्या) ह्येतदनुषङ्गतो व्याकरणस्य कृत्स्नतां करोति। यथा लोके स्वार्थमपरिहाय कश्चित् परानुग्रहं करोत्येवम्। यत् पुनरेतदुक्तं गुणादिवदिति। ते हि तन्त्रान्तर्भूता एव "उणादयो बहुलम् (पा०३, ३, १)"—इत्युक्तम्, न पुनर्निघण्टवो बहुलमिति। तस्मात् स्वतन्त्रमेवेदं विद्यास्थानमर्थनिर्वचनम्, व्याकरणन्तु लक्षण-प्रधानमिति विशेषः॥

आह,—"यदि मन्त्रार्थप्रत्ययाय" एतदारभ्यते, हन्त तदेव मर्थमारभ्यमाणम् "अनर्थकम्" एव "भवतीति"। आह,—क एवमाहेति? उच्यते,—"कौत्सः'। किं कारणम्? "अनर्थका हि मन्त्राः"। न हि मन्त्राणामर्थोऽस्ति वाच्यवाचकत्वेन। तदर्थनिर्वचनायारभ्यमाणमिदमप्यनर्थकमेव भवति। तस्मान्ना-रब्धव्यमित्येवं कौत्सो मन्यते॥ "तत्" एतदेवमुच्यमानं कौत्सम् "एतेन" अनेन नैरुक्तेन "न" "उपेक्षितव्यम्"। उपगम्य वेदं शास्त्रञ्च ईक्षितव्यम्, किमसौ सत्यमाचष्टे वृथेति वा परीक्ष्यम्। अर्थवत्त्वे मन्त्राणां यद्धेतुज्ञानं वक्ष्यमाणं तदुपग-म्यार्थवत्त्वं मन्त्राणामीक्षितव्यमिति केचिदाहुः।

कया पुनरुपपत्त्या कौत्सो मन्त्राणामानर्थक्यमाहेति? उच्यते,—"नियतवाचो युक्तयो नियतानुपूर्व्या भवन्ति"—इति। नियतवाचो युक्तयः, निरूढवाचो युक्तयः,—अभिधाननियता हि ते भवन्ति।—"अग्न आ याहि वीतये (सा० वे० सं० १, १, १, १)"—इति मन्त्रेण पुनर्विभावसो! आगच्छ पातायेति। नियतानुपूर्व्या नियतनिष्ठानुपूर्वी पदप्रयोगस्य। तद्यथा,—'अग्न

आयाहि' इति न पुनर्भवति 'आयाह्यग्ने' इति। इह लोकेऽर्थवतां शब्दानामनियमेन पर्य्यायवचनता दृष्ट्वा गवादिप्रयोगे, तथा न पौर्वापर्य्यं दृष्टम्। तद्यथा,—'गोणीमभ्याज' 'अभ्याज गोणीम्' 'आहर पात्रम्' 'पात्रमाहर' इति। न च तथा मन्त्रेषु। ततोऽर्थवच्छब्दवैधर्म्यात् पश्यामोऽनर्थका मन्त्रा इति॥

अथाप्ययमपरो हेतुरानर्थक्ये मन्त्राणाम्। आह,—कतमः? इति, उच्यते,—"ब्राह्मणेन" ते "रूपसम्पन्नाः" अपि सन्तो "विधीयन्ते" एव। यदि ह्येते अर्थवन्तोऽभविष्यन्, स्वेनैव लिङ्गेन स्वमात्मानमेते विनियोक्तुं समर्था इति कृत्वा न ब्राह्मणेन तेषु तेषु कर्मसु व्यधास्यन्त, विहिताश्च। तद् यथा,—"उरु प्रथस्वेति प्रथयति (श० ब्रा० १, १, ६, ८) प्रथनलिङ्गो मन्त्रो विहितः प्रथनकर्मणि, यथा च,—"उरु प्रथा उरुप्रथस्वोरु ते यज्ञपतिः प्रथताम् (य० वा० सं० १, २२)"। यजुरिदम्, पुरोडाशं प्रत्युच्यते। पुरोडाश! त्वं विस्तीर्णप्रथनः सन् विस्तारप्रथाः, स्वात्मानं ते तव यज्ञपतिश्चायं यजमानः प्रजापशुहिरण्यादिभिश्चोरुप्रथतां विस्तीर्य्यतामिति। तथा,—"प्रोहाणीति प्रोहति"—इति ब्राह्मणं द्रोणकलशप्रोहणविधावपि। "इदमहमात्मानं प्रोहामि"—प्राञ्चं प्रेरयामि इति प्रोहाणीति प्रोहति, प्रोहणलिङ्गो विहितः प्रोहणकर्मणि। तस्माल्लिङ्गसम्पन्नविधानात् पश्यामो ब्राह्मणेनानर्थकस्वरूपमेव सन्तं मन्त्रं नियुक्तम्। एवं सति, मन्त्रं मन्त्रं पुनर्विदध्वत ब्राह्मणमर्थवत्। अनर्थका मन्त्राः—न ह्यर्थवन्तः सन्तो दासवद्ब्राह्मणेन विधीयेरन्, विहिताश्च।

तस्मादनर्थका मन्त्रा इति पश्यामः। अपि च,—ब्राह्मणस्यानर्थक्योपगम्ये देशकालकर्तृदक्षिणादिकर्माङ्गभूतं कुत उपलभ्येत? तथाच ब्राह्मणस्यानर्थक्येऽभ्युपगम्यमाने वेदैकदेशस्य मन्त्रस्यात्यन्तमेवानर्थकत्वमभ्युपगत स्यात्,—न हि ब्राह्मणस्य विधिस्तुत्यर्थावृतेऽर्थवत्तास्ति, मन्त्राणां पुनर्वाच्यवाचकत्वेनानर्थकानामपि सतां विनियोगमात्रेणार्थवत्ता स्यात्। एतस्माच्च काममनर्थका मन्त्रा वाच्यवाचकत्वेन सन्तो विनियोगमात्रेणैवार्थवतो विधेयत्वात् विधायकत्वाच्च ब्राह्मणमर्थवदस्त्विति॥

"अथापि" अयमपरो हेतुरनर्थकत्वे मन्त्राणाम्। आह,—कतमः? इति उच्यते,—"अनुपपन्नार्थाः" हि एते "भवन्ति" य एतेष्वर्थो लभ्यते,—अयमेतेष्वर्थः स्यादिति नासावुपपद्यते। तद्यथा,—"ओषधे त्रायस्व (य० वा० सं० ४, १, ६, १५) एनम्" —इत्याह। न चौषधिरात्मानमपि त्रातुं समर्था, किं पुनर्वृक्षम् तथा,—"स्वधितेमैन ∪ हि ∪ सीः (य० वा० सं० ४, १, ६, १५) इत्याह" आत्मानमेव "हिंसन्"। को हि नाम एवमुक्त्वा स्वयमेव हिंस्यात्? हिनस्ति च। लोके यान्येवंविधानि वाक्यान्युन्मत्तप्रभृतीनां तान्यनर्थकान्युच्यन्ते, तथैवेमानि। तस्मादिमान्यप्यनर्थकानीत्युपपद्यते॥

"अथापि" अयमपरो हेतुरानर्थक्ये मन्त्राणाम्। आह,—कतमः? इति, उच्यते,—"विप्रतिषिद्धार्था भवन्ति" इति। अन्यस्यान्येन विरुद्धार्थेन प्रतिषेधो विप्रतिषेधः, इतरेतरव्याघात इत्यर्थः। तद्यथा,—"एक एव रुद्रोऽवतस्थे न द्वितीयः"

"असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम् (य० वा० सं० १६, ५४)" "अशत्रुरिन्द्र जज्ञिषे (ऋ० सं० ८, ७, २१, २)" "शतं सेना अजयत् साकमिन्द्र (ऋ० सं ८, ५, २२, १)—इति"। एतान्युदाहरणानि। "एक एव रुद्रोऽवतस्थे न द्वितीयो रणे निघ्नन् पृतनासु शत्रून्। संसृज्य विश्वा भुवनानि गोपा प्रत्यङ् जनान् सञ्चुकोचान्तकाले॥" 'एक एवावतस्थे रुद्रः' स्थितवान्, 'रणे' रणाय रणार्थम्, 'न' अन्यो 'द्वितीयः' कश्चिदस्ति। इति रुद्रबहुत्वप्रतिषेधः। कथमवतस्थे? 'नि' निश्चयेन 'घ्नन्' 'पृतनासु' स्पर्द्धनीयेषु संग्रामेषु 'शत्रून्'। किञ्च, स एकः 'संसृज्य' सृष्ट्वा, 'विश्वा' विश्वानि भुवनानि 'गोपा' रक्षिता, सृष्ट्वा च सर्गकालानन्तरमेव पालयिता च स्थितिकाले। 'प्रत्यङ्' प्रतिलोम्येन 'जनान्' 'सञ्चुकोच' सङ्कोचयति, 'अन्तकाले' प्रलयकाले। य एवं गुणयुक्तो रुद्रस्तं वयं स्तुमः। "असंख्याता०—०भूम्याम् तेषां सहस्रयोजनेऽव धन्वानि तन्मसि" (य० वा० सं० १६, ५४)। एषा शतरुद्रियेऽनुष्टुप्। अनेन चाग्निचयनेऽर्कपर्णेनाजाक्षीरमिश्रा गवेधुकाः सप्तकृत्वो हूयन्ते उत्तरस्यां श्रोणावन्त्यायामिष्टकायाम्। प्रजापतेरार्षम्। 'असंख्याता' असंख्यातानि 'सहस्राणि' बहूनीति यावदुक्तं स्यात्, केषाम्? 'ये रुद्राः' 'भूम्याम्' 'अधि' उपरि 'तेषां' 'सहस्रयोजने' अध्वनि अवस्थितानामेव 'अव' 'तन्मसि' तनुमः 'धन्वानि' धनूंषि। अप्रासानामेवास्मान् प्रतीत्यभिप्रायः। तावद्भेतानभिष्टुमो यावत्ततानि तानि धनूंषि। "त्वं सिन्धून् अवासृजोऽधराचः अहन्नहिम्। अशत्रुरिन्द्र जज्ञिषे विश्वं

पुष्यसि वार्यं तं त्वा परिष्वजामहे नभन्तामन्यकेषा ज्याका अधि धन्वसु ॥" (ऋ० सं० ८, ७, २१, २)। एतया अतिच्छन्दसा इन्द्रं तुष्टाव सुराः पैजवनः। षोड़शिनि शस्त्रे विनियुक्ता। हे 'इन्द्र!' 'त्वम्' 'अवासृजः' 'सिन्धून्' स्यन्दनान् एतान् माध्यमिकान् उदकसंस्त्यायान्। कथं पुनरवासृजः? 'अधराचः' तानधिगमनान् कृत्वा सर्वानेवावासृजः, नित्यकालम् 'अहन् अहिम्' घ्नन् मेघम्। 'अशत्रुः' अशातयितव्यः 'जज्ञिषे' जायसे नित्यकालं भवसि; तस्मिन् हते मेघे। किञ्च, त्वमेतेन प्रकारेण मेघवधकर्मणा 'विश्वं' सर्वं 'पुष्यसि' पुष्णासि 'वार्यं' वारिभवं व्रीह्यादिकम्। 'तं' 'त्वा' त्वाम् एवङ्गुणसंयुक्तं वयं 'परिष्वजामहे' सर्वतः स्वजामहे। 'नभन्तां' मा भूवन् 'अन्यकेषाम्' अन्येषाम् 'ज्याका' ज्या 'अधिधन्वसु' अधिधनुःषु। किमुतान्ये केचनाभ्युद्यमाना एते स्म द्विषः अवततज्य धनुषो हतसर्वोद्यमाः सन्त्विवत्यतस्त्वां परिष्वजामहे इत्यभिप्रायः। "आशुः शिशानः" —इत्येषा अप्रतिरथेन त्रिष्टुबग्निप्रणयने विनियुक्ता। अप्रतिरथस्येन्द्रपुत्रस्यार्षम्। 'आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्। सङ्क्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत् साकमिन्द्रः॥" (ऋ० सं० ८, ५, २२, १)॥ 'आशुः' व्यापकः क्षिप्रो वा, 'शिशानः' शिश्यानः तीक्ष्णीकुर्वन् आयुधम्, प्रगृहीतायुधः, 'वृषभो न' वृषभ इव पुष्टो योद्धा, 'घनाघनः' जहिजहीत्येवं शब्दकारी, 'क्षोभणः' केषाम्? 'चर्षणीनाम्' प्रत्यनीकावस्थितानामसुरादीनाम्, 'सङ्क्रन्दनः' समाह्वाता शत्रूणाम्, आह्वय च

'अनिमिषः' आदरवान् जयं प्रति, 'एकवीरः' एक एव विक्रान्तः अप्रतिद्वन्द्वः सङ्ग्रामेषु, 'शतं सेनाः' बह्वीः शत्रुसेनाः 'साकम्' अवस्थिताः 'अजयत्' एक इन्द्रो यः, तं वयं स्तुमः। एवमितरैतत्प्रतिषिद्धान्येतानि मन्त्रवाक्यानि। यद्येको रुद्रः, नासङ्ख्यातानि सहस्राणि, अथासङ्ख्यातानि, नैकः यद्यशत्रुः, कथं शतं सेना अजयत्? अथ शतं सेना अजयत्, कथमशत्रुः? लोके हि यान्येवंलक्षणानि वाक्यानि उन्मत्तादीनाम्, तान्यनर्थकानीति॥

"अथापि" अयमपरो हेतुर्मन्त्राणामानर्थक्ये। कतमः? इति, उच्यते,—"जानन्तं सम्प्रेष्यति" अध्वर्युर्होतारम्। कथम्? 'अग्नये समिध्यमानायानुब्रूहीति "तदु हैक आहुः। अग्नये समिध्यमानाय होतरनुब्रवीति।" (श० ब्रा० १, ३, २, ३)। होता हि विधिज्ञ एव भवति,—नह्यविद्वान् विहितोऽस्तीति स विजानात्येवामुष्मिन्नवधाविदं मयानुष्ठातव्यमिति। तदेतद्विज्ञातार्थस्य सतः सम्प्रेषणमनर्थकमेव भवति। यदैतदर्थकमेवमन्येऽपि मन्त्रा इति॥

"अथापि अयमपरो हेतुर्मन्त्राणामानर्थक्ये। आह,—कतमः? इति, उच्यते,—"आह" मन्त्रनिगमः "अदितिः सर्वमिति"। आह,—किमुदाहरणम्? 'अदितिर्द्यौरदितिरन्तरिक्षमिति' "अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वेदेवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम्॥" (ऋ० सं० १, ६, १६, ५)। "तत्" एतदुदाहरणम् "उपरिष्टाद् व्याख्यास्यामः"। इह त्वेवमर्थमियमुदाहृता,—कथं यैव द्यौः, सा अन्तरिक्षम्?

यैव माता, स एव पुत्रः, स एव पितेत्येवमादिं किमपि बहुत्र परम्परासम्बद्धमुच्यते ? तदर्थवत्त्वे सत्युपपादयितुमशक्यम्। तस्मादनर्थका मन्त्रा इति ॥

"अथापि" अयमपरो हेतुरानर्थक्ये मन्त्राणाम्। आह,—कतमः ? इति, उच्यते,—"अविस्पष्टार्थाः" अपि हि केचित् "भवन्ति"। तद्यथा,—"अम्यग्, याद्वस्मिन्, जारयायि, काणुका,—इति" एवमादयः। न ह्येषां विस्पष्टार्थता मन्त्रेषु शक्यते परिज्ञातुम्,—न च केचिदर्थवन्तः केचिदनर्थका इति न्याय्यमभ्युपगन्तुम्, अर्द्धावेशसं हि स्यात्। तस्मात् सर्व एवानर्थका इति ॥ परिसमाप्तः पूर्वपक्षः ॥

स्वपक्षनिदानं स्थापयिष्यामः, तदर्थमिदमारभ्यते,—"अर्थवन्तः शब्दसामान्यात्" इति। अर्थवन्तः एव मन्त्रा इति प्रतिज्ञा। हेतुरुच्यते,—शब्दसामान्यादिति। समान एव हि शब्दो लोके मन्त्रे च। तथा च, य एव गोशब्दो लोके खरसंस्कारयुक्तः, स एव मन्त्रेष्वपि। तत्रैवं सति, स एवार्थवान् लोके स एव चानर्थको मन्त्रेष्विति विशेषहेतुर्नास्ति, असति च विशेषहेतावर्थवन्त एव मन्त्राः शब्दसामान्यादित्युपपद्यते। तत्पुनरेतदुक्तम्, —प्रयोगानियमाल्लोकेऽर्थवत्त्वं प्रयोगनियमाच्च मन्त्राणामानर्थक्यमिति, तत् प्रति वक्ष्याम एतत् लोकेऽपि हि प्रयोगनियमो दृष्टः। तद्यथा,—पितापुत्राविति ॥

किञ्चान्यत्—"एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत् कर्म क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणम्। एतदेव हि यज्ञ-

कर्मणः समृद्धम्। तत् किम्? इति, उच्यते,—'यद्रूपसमृद्धम्' मन्त्रलिङ्गैरभिधीयते, तदेव हि समस्तवृद्ध्या युक्तं भवति, नेतरत्। एतदेव सुतरां स्पष्टीकरोति,—'यत् कर्म क्रियमाण-मृग्ज्ञुर्वाभिवदतीति च ब्राह्मणमिति'। शब्दसामान्याद्ब्राह्मण-प्रामाण्याच्चेति। च शब्दो ब्राह्मणमपि च मन्त्राणामर्थवत्त्वमेवं दर्शयति। अनर्थका हि सन्तः कथं कर्माभिवदेयुः? कथं वाऽन-भिवदन्तः समर्द्धयेयुः? अर्थवाचं वाभ्युपगतं भवता ब्राह्मणस्य? अथापि ब्राह्मणेन रूपसम्पन्ना विधीयन्ते इति अत्र ब्राह्मणेन सिद्धमेवार्थवत्त्वमुक्तं मन्त्राणाम्। तदेतदुपदर्शितमस्माभिस्तस्मा-दर्थवन्त एव मन्त्रा इति ॥ १ ॥

क्रीलन्तौ पुत्रैर्नप्तृभिरिति यथो एतन्नियतवाचो युक्तयो नियतानुपूर्व्या भवन्तीति लौकिकेष्वप्येतद्यथेन्द्राग्नी पितापुत्राविति यथो एतद् ब्राह्मणेन रूपसम्पन्ना विधी-यन्त इत्युदितानुवादः स भवति यथो एतदनुपपन्नार्था भवन्तीत्याम्नायवचनादहिंसा प्रतीयेत यथो एतद् विप्रतिषि-द्धार्था भवन्तीति लौकिकेष्वप्येतद्यथाऽसपत्नोऽयं ब्राह्मणो-ऽनमित्रो राजेति यथो एतज्जानन्त संप्रेष्यतीति जानन्त-मभिवादयते जानते मधुपर्कं प्राह यथो एतददितिः सर्व-मिति लौकिकेष्वप्येतद्यथा सर्वरसा अनुप्राप्ताः पानीयमिति

यथो एतदविस्पष्टार्थां भवन्तीति नैष स्थाणोरपराधो यदेनदमन्धो न पश्यति पुरुषापराधः स भवति यथा जानपदीषु विद्यातः पुरुषविशेषो भवति पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति ॥ २ ॥

प्रथमाध्यायस्य पञ्चमःपादः ॥ १, ५ ॥

किं पुनः समृद्धरूपत्वे मन्त्राणामुदाहरणम्? उच्यते,—"क्रीलन्तौ"—इति। "इहैव स्तं मा वियौष्टं विश्वमायुर्व्यश्नुतम्। क्रीलन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे॥" (ऋ० सं० ८, ३, २८, २)। सूर्य्याया आर्षम्। विवाहे विनियुक्ता। अनुष्टुप्। 'इहैव' 'स्तं' भवन्तं युवां, 'स्वे गृहे' 'मोदमानौ' हर्षमाणौ 'मा वियौष्टम्' मा च वियुज्येत्राम्। 'विश्वं' सर्वम् 'आयुः' व्यश्नुत क्रीलन्तौ 'पुत्रैः' 'नप्तृभिः' पौत्रैश्च सहेत्याशीः। स्थापितमर्थवत्त्वं मन्त्राणाम्॥

अधुना परपक्षे हेतवो निराकर्त्तव्याः, तदर्थमिदमाह,—"यो एतत्" इति। यत् पुनरेतदुक्तम्। "नियतवाचो युक्तयः, नियतानुपूर्व्या भवन्ति इति"। अत्र ब्रूमः,—"लौकिकेष्वपि" ह्यर्थवत्सु शब्देषु नियतवाचो युक्तित्वं नियतानुपूर्व्यत्वञ्च दृष्टमेव। "एतदयथा,—इन्द्राग्नी पितापुत्राविति" च। तत्र, यदुक्तं नियतवाचो युक्तित्वान्नियतानुपूर्व्यत्वाच्चानर्थका मन्त्रा इति। एतदयुक्तम्। लौकिकेष्वपि हि नियतप्रयोगाः सन्तः शब्दाः केचिदर्थवन्तो

द्वष्टाः, यथेन्द्राग्नी पितापुत्राविति। स एष प्रयोगनियमादनर्थका मन्त्रा इत्यनैकान्तिको हेतुः। तस्मादर्थवन्त एवेति॥

"यथो एतत्" यत् पुनरेदुक्तम्,—"ब्राह्मणेन रूपसम्पन्ना विधीयन्त इति"। अत्र ब्रूमः,—"उदितानुवादः स भवति"। न समर्थ आत्मानमेव स्वेन रूपेण विधातुमित्यतो ब्राह्मणेन विधीयते किन्तर्हि आत्मनियोगाश्रयमुक्तमेव सन्तं मन्त्रेणार्थं ब्राह्मणमनुवक्ति विस्तरेण प्रकृतार्थसन्तुष्ट्यया, न ह्यनुक्तं स्तोतुं शक्यते, सोऽयमेवमुदितानुवाद एव भवति, उक्तानुवाद इत्यर्थः। अपि चानेकेऽपि समानलिङ्गाः प्रकरणे मन्त्रा भवन्ति, ते ह्यहम्पूर्विकया एकं प्रयोगं प्रति 'खले कपोत'वत् सम्पतन्ति, तेषां समुच्चये विकल्पे च प्राप्ते सति अभिमत एको नियमार्थं ब्राह्मणेन विधीयते। एवमुभयोरर्थवत्त्वं मन्त्रब्राह्मणयोः। तत्र यदुक्तं रूपसम्पन्नविधानान्मन्त्रानर्थक्यम्, मन्त्रार्थवत्त्वे वा ब्राह्मणानर्थक्यमिति, एतदयुक्तम्। तस्मादुभयमर्थवत्—मन्त्राश्च ब्राह्मणञ्चेति॥

"यथो एतत्" यत् पुनरेतदुक्तम्,—'ओपधे त्रायस्वैनम्, स्वधिते मैन᳔ हिᳬसीः,—इत्यादयः अनुपपन्नार्थाः भवन्ति। अत्र ब्रूमः,—ओषध्यधिदेवतोच्यते, हे ओषधे! त्रायस्वैनम्, त्वत्पूर्वको ह्येष वृक्षश्छिद्यमानः सम्यक् छिन्नो भविष्यति, ततश्च यज्ञे विनियुक्तः। प्रतिविशिष्टमुत्कर्षमेतस्याः स्थावरत्वात् प्राप्स्यत इत्येतत् त्राणमभिप्रेत्योक्तमोषधे त्रायस्वैनमिति, न छेदनं प्रतिपत्स्यतेऽल्पमित्यनेनाभिप्रायेण। तस्मादुपपन्नार्थ एवायम्। तत्र यदुक्तमनुपपन्नार्था इत्येवमादयो मन्त्रा इति, एतदयुक्तम्॥

यदपि चोक्तम्,—'स्वधिते मैᳬ हिᳬसीरित्याह हिᳬसन्निति'। तत्र ब्रूमः,—"आम्नायवचनादहिंसा" एषा "प्रतीयेत"। आह,—कथमहिंसा? प्रत्यक्षतो हि छिद्यते वृक्षः। शृणु,—इयमहिंसा, इयं हिंसा,—इत्यागमादेतत् प्रतीयते। प्रतिविशिष्टश्चायमेव वैदिक आम्नाय आगमः, एतत्पूर्वकत्वादन्येषामागमानाम्। स एष कृत्स्नस्य जगतः प्रतिविशिष्टाय श्रेयसेऽभ्युद्यतः सन् हिंसायां कर्त्तारं विनियोज्यत इति। कुत एतत् पुनरियमहिंसैव? यतोऽस्मान् नियुनक्ति कर्त्तारम्। तदेतदागमप्रत्यक्षमेव यथेयमहिंसेति। अपि चैतदोषधिवनस्पतिपशुमृगपक्षिसरीसृपाः सम्यगुपयुक्ताः सन्तो यज्ञे परमुत्कर्षं प्राप्नुवन्ति। सोऽयमभ्युदय एव सम्पद्यते, न हिंसा। तत्र, यदुक्तम्मैनं हिंसीरित्याह हिंसन्निति, न ह्यसौ हिनस्ति। किन्तर्हि? अनुगृह्णाति यज्ञः विनियोगार्थं विधानतः छिन्दन्। तस्मादुपपन्नार्थमेवमपि। तत्र यदुक्तमनुपपन्नार्थत्वादनर्थका मन्त्रा इति, एतदयुक्तम्॥

"यथो एतत्" यत् पुनरेतदुक्तम्,—"विप्रतिषिद्धार्था भवन्तीति"। अत्र ब्रूमः,—नैष विप्रतिषिद्धोऽर्थः,—"एक एव रुद्रोऽवतस्थे" "असंख्याता सहस्राणि"—इति,—देवता हि महाभाग्ययोगादेकापि सत्यनेकधा भवति, अनेकापि चैकधा, तदुपरिष्टाद् व्याख्यास्यामः "माहाभाग्याद्देवतायाः (दै० का० ७, १, ४)" इत्यत्र॥

यत् पुनरेतदुक्तम्,—"अशत्रुरिन्द्र जज्ञिषे" "शतं सेना अजयत् साकमिन्द्रः"—इति। अत्र ब्रूमः,—"लौकिकेष्वपि" अर्थवत्सु

शब्देषु "एतत्" एवमेवोच्यमानं दृष्टम्। तद् यथा,—असपत्नोऽयं ब्राह्मणोऽनमित्रो राजेति"। न हि कश्चिदसपत्नोऽस्ति लोके। उक्तं हि,—'मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः। उत्पद्यन्ते त्रयः पक्षा मित्रोदासीनशत्रवः'—इति। तथापि स्वल्पसपत्नं दृष्ट्वा केचिदेवं वक्तारो भवन्ति,—'असपत्नोऽयं ब्राह्मणः' इति। एवमेव कस्मिंश्चिदतिप्रवृद्धे भृशं पातिते मेघेऽन्येषामसारतामभिप्रेत्येदमुक्तं स्यात्,—अशत्रुरिन्द्र जज्ञिषे यस्त्वामेतमेवमतिप्रवृद्धमहन्नहिम्—इति। यत् पुनरेतदुक्तम्,—'शतं सेना अजयत्'—इति। अत्र ब्रूमः,—कुतो हि सेनाः, या इन्द्रो जेष्यति?—न हि देवानां शत्रवः सन्ति, ये जेतव्या इति। किंकारणम्? विभवो देवा वशिनः अधिकरणधर्माश्च परेण महिम्ना युक्ताः। आह,—कथन्तर्हि 'शतं सेना अजयत्' इत्येतदुक्तम्? उच्यते,—रूपकल्पनयैवैषा युद्धप्रवादात् स्तुतिः, वक्ष्यति च "अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति (नैग० का० २, ५, २)"—इति तदेतद् भवता न सम्यग् दृश्यते, सम्यगन्विष्यतां देवतातत्त्वं नैरुक्तेभ्यः, ततो मन्त्रार्थानविरोधेन सम्यगवगमोत्स्यते। नैवमवाक्यतत्त्वज्ञेन मन्त्रार्थो विगाहितुं शक्यः। गम्भीरपदार्थो हि वेदः, कथमवगमोत्स्यते? वेदार्थविवादविभ्रान्ता एव हि प्रवादिनः स्वबुद्धिलाघवमाविर्भावयन्तो ब्राह्मणाः सन्तः सर्ववर्णसाधारणानि दर्शनान्तराणि प्रतिषेदिरे। यदुक्तं, विप्रतिषिद्धार्थत्वादनर्थका मन्त्रा इति। एतदयुक्तम्। न हीमे विप्रतिषिद्धार्थाः,—भवत एव

मतिविभ्रमो मन्दशिक्षितत्वात्। तस्मादर्थवन्त एव मन्त्रा इति ॥

"यथो एतत्" यत् पुनरुक्तम्,—जानन्तं सम्प्रेष्यतीति"। अत्र ब्रूमः,—लौकिकेष्वर्थवत्सु शब्देषु एतदेव स्वाभाव्यं द्रष्टम्। "जानन्तम्" गुरुम् "अभिवादयते" स्वगोत्रमभिवदन्। तथा च "जानते मधुपर्कं प्राह" त्रिर्मधुपर्कौं मधुपर्क्क इति। तद्वे तदर्थवत्स्वपि शब्देषु विहितार्थख्यापनार्थशब्दसामान्यादर्थवन्तो मन्त्रा इति ॥

"यथो एतत्" यत् पुनरेतदुक्तम्,—अथाप्याह "अदितिः सर्वमिति"। अत्र ब्रूमः,—द्विविधा हि शब्दप्रवृत्तिः, मुख्यार्था गौणी च। तत्रैवं सति यत्र मुख्यासम्भवस्तत्र गौण्याश्रीयते। स एष भक्तिवादोऽदितिः, यथा कश्चिद् ब्रूयात् कश्चिदनेकोपकारे प्रवृत्तम्—'त्वमेव मे माता, त्वं मे पिता' एवमेतदपि द्रष्टव्यम्। "लौकिकेष्वपि" चार्थवत्सु शब्देषु "एतत्" उच्यमानं द्रष्टम्, "यथा,—सर्वरसा अनुप्राप्ताः पानीयमिति"। ततो हि तेषां प्रभव इत्यनया गुणवृत्त्या एवमुच्यते, एवमिहापि गुणवृत्त्या कयाचिददितेः सर्वत्वमुच्यते। यदुक्तमितरेतरविरुद्धं किमपि वह्नत्रेति, एतदयुक्तम्। सर्वमेतदुपपद्यत एव गुणवृत्त्या। तस्मादर्थवन्त एव सर्वमन्त्रा इति ॥

"यथो एतत्" यत् पुनरेतदुक्तम्,—अथापि "अविस्पष्टार्था भवन्तीति"। अत्र ब्रूमः,—"नैष स्थाणोरपराधः" इति। न ह्यत्र स्थाणुरपराध्यति "यदेनं" स्थाणुम् "अन्धो न पश्यति"

यदत्रासावभिहन्यते। किन्तर्हि? "पुरुषापराध्रः स भवति" पुरुष एवापराधी तत्र, यदसावचक्षुष्मान्। एवमिहापि नैव मन्त्राणामपराधो यदशिक्षितेन भवता न विज्ञायन्ते, भवत एवापराधोऽस्ति, भो भवान् सर्वमात्मीयमपराधं मन्त्रेष्वस्मासु वा संयोजयितुमिच्छति, न तव प्रज्ञास्ति किञ्चित्॥

"यथा—जानपदीषु" कासुचित् प्रवृत्तिषु इतिकर्त्तव्यतासु कौशलशिक्षाकृतः "विघातः पुरुषविशेषो भवति"। पुरुषाणां विशेषः। एवमिहापि मन्त्रार्थशिक्षाकौशलकृतपुरुषाणां विशेषो भवत्येव। तत्रैवं सति, केचित् पुरुषा येषु विस्पष्टानपि मन्त्रान् न शक्नुवन्ति निर्वक्तुम्, अपरे पुनरविस्पष्टार्थानपि शक्नुवन्ति विस्पष्टीकर्त्तुम्। तदुक्तम् "उत त्वः (ऋ० सं० ८, २, २३, ४। नैघ० का० १, ६, ३)"—इत्यत्र॥

तत्रैवं सति, "पारोवर्य्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति"—इति। य एते पारोवर्य्यविदो ब्राह्मणाः, पारोवर्य्येण विजानन्ति आचार्य्यपरम्परया, ते पारोवर्य्यविदः, न साक्षात्कृतधर्माण इत्यभिप्रायः। तेषां किम्? तेषां य एव भूयोविद्यो भवति बहुश्रुतः क्वचित् स एव प्रशस्यते। य एव मन्त्रार्थविज्ञाता प्रशस्यो भवति, नेतरो मन्दबुद्धिरशिक्षितः स हि बहुश्रुतो बहुद्रष्टत्वादनेकविषये मन्त्रार्थे न क्वचित् प्रतिबध्यते, न हि तस्याविस्पष्टार्थो नाम कश्चिदस्ति। तस्माद्धेतोः स त्वं बहु शृणु, ततः सम्यगवभोत्स्यसे मन्त्रार्थान्। तत्र यदवोचः 'अविस्पष्टार्था मन्त्राः' न हि ते अविस्पष्टार्थाः, तांश्चोपरिष्टात् स्पष्टी-

कृत्य व्याख्यास्यामहे। तदेष मतिं भ्रमयति सम्मोहः। तस्मादर्थवन्त एव मन्त्रा इति सिद्धम्। तस्माच्चैतदपि शास्त्रं मन्त्रार्थप्रत्ययायारभ्यमाणमर्थवदेव भवतीति सिद्धः शास्त्रारम्भः। तत्र, यदुक्तं 'यदि मन्त्रार्थप्रत्ययायानर्थकं भवतीति' एतदयुक्तम्। इति प्रभिन्नेषु परस्य हेतुषु स्वपक्षसिद्धावुत्थिते च कारणे अवस्थिता मन्त्रगणस्य सार्थता, तदर्थमेतत् खलु शास्त्रमर्थवदिति ॥२॥

इति निरुक्तवृत्तौ षष्ठाध्यायस्य पञ्चमः पादः ॥ ५ ॥

षष्ठः पादः

अथापीदमन्तरेण पदविभागा न विद्यते। अवसाय पद्यते रुद्रमूलेति। पद्यदवसङ्गावः पथ्यदनमत्रतेर्गत्यर्थस्यासौ नामकरणस्तस्मान्नावगृह्णन्ति। अवसायाश्वानिति। स्यतिरुपसृष्टो विमोचने तस्मादवगृह्णन्ति। दूतो निर्ऋत्याइदमाजगामेति। पञ्चम्यर्थप्रेक्षा वा षष्ठ्यर्थप्रेक्षा वाःकारान्तम्। परो निर्ऋत्या आचक्ष्वेति। चतुर्थ्यर्थप्रेक्षैकारान्तम्परः सन्निकर्षः संहिता पदप्रकृतिः संहिता पदप्रकृतीनि सर्वचरणानां पार्षदान्यथापि याज्ञे दैवतेन बहवः

प्रदेशा भवन्ति तदेतेनोपेक्षितव्यं ते चेद् ब्रूयुर्लिङ्गज्ञा अत्र स्म इति। इन्द्रं नत्वा शवसा देवता वायुम्पृणन्तीति। वायुलिङ्गं चेन्द्रलिङ्गञ्चाग्नेये मन्त्रेऽग्निरिव मन्यो त्विषितः सहस्वेति तथाऽग्निर्मान्यवे मन्त्रे त्विषितो ज्वलितस्त्विषिरित्यप्यस्य दीप्तिर्नाम भवत्यथापि ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च ॥ १ ॥

"अथार्पादमन्तरेण पदविभागो न विद्यते"। शास्त्रारम्भप्रयोजनाधिकारे वर्त्तमाने अर्पादमन्तरेण मन्त्रेष्वर्थावधारणं नास्तीत्युक्ते यदि मन्त्रेत्यादिनानर्थक्यहेतुभिर्बहुभिरानर्थक्य उपपादिते निरुक्तशास्त्रस्य, कौत्सेन मन्त्राणामर्थवत्तां स्थापयित्वा परपक्षहेतवः प्रत्युक्ताः। तेषु स्थितमर्थवत्त्व मन्त्राणाम्। तेषामर्थ-निर्वचनायेदमारभ्य-माणमर्थवदित्युपपन्नमर्थवत्त्वं निरुक्तशास्त्रस्य। तदेतत् सर्वमपि चोदकशास्त्रकारव्याजेन प्रसक्तानुप्रसक्तमुक्तं प्रज्ञाया विवृद्धये शिष्यस्य। कथन्नामा सा विवृद्धप्रज्ञा? शब्दार्थन्यायसङ्करेषु हेतुसमयानभिज्ञः परैः प्रतिवध्यमानोऽपि पदार्थान् वाक्यार्थांश्चासम्मोहेन निर्ब्रूयादिति। एवन्तावत्, एतदन्तरेण मन्त्रार्थप्रत्ययो नास्ति। अथेदमपरमारम्भप्रयोजनमित्येवं विशेषाधिकारार्थोऽयमथशब्दः। अपि मन्त्रार्थप्रत्यय इदमन्तरेण नास्ति, नाप्यस्ति यदिदं वक्ष्यमाणम्, इत्यपिशब्दः एवं सम्भावने।

आह,—किम्पुनस्तद् वक्ष्यमाणम्? इति, उच्यते,—'पद-विभागः'। 'एवं पदानि वक्तव्यानि'—इत्येतद् विभागपरिज्ञानं नास्तीत्यर्थः। किं कारणम्? अर्थवशेन हि पदान्यवतिष्ठन्ते, न चेदमन्तरेणार्थपरिज्ञानमस्ति। तस्मादत एव पदविभागप्रसिद्धिरिति। इदमर्थवत्त्वं मन्त्राणामन्तरेण पदविभागोऽप्यकिञ्चित्करः। प्रसिद्धश्चैष सर्वशाखासु। तस्मात् पदविभागार्थवत्त्वाय चार्थवन्तो मन्त्रा इति केचिद् वर्णयन्ति॥

एवं प्रतिज्ञाय समानसंहितेषु ग्रन्थेष्वर्थहेतुकं पदविभागविशेषं दर्शयति, तद्यथा,—"अवसाय पद्वते रुद्रमूलेति"। "पद्वत्" पादवत् पादसंयुक्तम्। "अवसं गाव पश्यदनम्" इति निगमप्रसक्तस्य पर्यायवचनम्। "अवतेर्गत्यर्थस्यासौ नामकरणः" प्रत्ययः। "तस्मात्" असमासत्वादस्य "नावगृह्णन्ति" एतत्-पद्कारा इति शेषः। "मयोभूर्वातो अभिवातूस्रा ऊर्जस्वतीरोषधीरारिशन्ताम्। पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मूल॥ (ऋ० सं० ८, ८, २७, १)॥ सुचरो नाम गौतमः स मयोभूरित्यस्यास्त्रिष्टुभः पूर्वैस्त्रिभिः पादैः गवामाशिषमाशास्योत्तमेन तासामेव च रुद्रात् सुखमयाचत। गवामुपस्थाने विनियुक्ता। 'मयोभूः' मयोभावयिता पाश्चात्यः 'वातः', एताः 'ऊस्राः' 'अभिवातु' आभिमुख्येन वातु। किञ्च, तेन सुखभुवा वातेनानुद्वेजनीयेन स्पृश्यमानाः 'ऊर्जस्वतीः' प्रभूतरसाः 'ओषधीः' 'आरिशन्ताम्' आस्वादयन्तु। आस्वाद्यास्वाद्य च सलवणस्वादमात्माभिप्रेते काले उदकं 'पिबन्तु'। तच्च पीतमोषधिसहितमासां तथा

कोष्ठे विपच्यतां रसशोणितमांसमेदोमज्जाऽस्थिक्रमेण यथैताः पीवस्वत्यो भवेयुः। 'पीवस्वतीः' पीवगुणयुक्ताः स्थूला बलवत्यो बहुपयस्काः सति च बहुपयस्त्वे 'जीवधन्याः' जीवधनिन्यो रोगदुष्टमातृकाः। हे 'रुद्र!' वयम् एतासां गवाम् एताम् आशिषम् आशास्महे। त्वमप्यस्मै गोलक्षणाय 'पद्वते' 'अवसाय' पश्यदनाय 'मृल' सुखीभव। मैनां हिंसीस्त्वमासामीश्वर इत्यभिप्रायः॥

"अवसायाश्वानिति"। इदमपरमुदाहरणम्। अस्मिन् पूर्वेण रूपेण सरूपमेव पदमर्थकृताद् विशेषादवगृह्णाति। द्वयोः पदयोः बहूनां वा पदविच्छेदेनोच्चारणं स समासः। तयोरेवार्थविभागो-पदर्शनार्थमवच्छेदेन ग्रहणमवग्रहः। तदेतदवगृह्यते पदम्,—"स्यतिः" दातुः "विमोचने" अर्थे वर्त्तते, स पुनः "उपसृष्टः" उपसर्गेणावेत्यनेनोपसृष्टः संयुक्त इत्यर्थः। यतो धातूपसर्ग-विभागोपप्रदर्शनार्थमेव तत् पदमवगृह्येत अवसायेत्येतत्। "योनिष्ट इन्द्र निषदे अकारि त मा नि षीद स्वानो नार्वा। विमुच्या वयोऽवसायाश्वान् दोषा वस्तोर्वहीयसः प्रपित्वे॥ (ऋ० सं० १, ७, १८, १)। एतया त्रिष्टुभा कुत्स आङ्गिरस इन्द्रं तुष्टाव। "योनिस्ते"। हे 'इन्द्र'! 'योनिः' स्थानं 'ते' तव यदिदं 'निषदे' निषदनाय, मया 'अकारि' कृतम्, 'तं' योनिं तत् स्थानम् 'आ निषीद' एत्य निश्चयेन सीद। कथं पुनर्निषीद? 'स्वानो न' स्वन्यमान इव 'अर्वा' अश्वः। संशब्द्यमान इवाश्ववन्धेनाश्वः स यथा स्वे स्थाने निषीदेदेवं मया त्वमपि शब्द्यमानस्तुतिभिरेतस्मिन्

मया संस्कृते स्वास्तीर्णे वर्हिषि स्थाने निषीद। कथम्पुनर्निषीद ? 'विमुच्य' एतान् 'वयः अश्वान्'। कुतः ? रथात्। पुनरपि च एतान् 'अवसाय' वियोज्य रश्मिभ्योऽश्वान् लब्धोदकयवसान् कृत्वा 'दोषावस्तोर्वहीयसः' अहनि च रात्रौ च ये केचिद् वहन्ति, तेभ्योऽपि वहीयसः शीघ्रतमेन जवेन वोढृतमान् ततस्त्वं स्वस्थो भूत्वा निषीद। एतस्मिन् योनौ एतस्मिन् संस्कृते वर्हिषि 'प्रपित्वे' प्राप्ते अस्माकं त्वद्यजनकाले मा नो विघ्नं कार्षीरित्यभिप्रायः॥ एवन्तावदिदमवगृह्यमिदमनवगृह्यमित्यर्थपरिज्ञानद्वारेण "तस्मात्" एतन्निरुक्तशास्त्रात् विज्ञायते॥

यान्यपि च खल्वनवगृह्याणि पदानि समानसंहितानि, तेषामप्यर्थकृतमेव विभागवैशेष्यं भवति। तद्यथा,—"दूता निर्ऋत्या इदमाजगामेति पञ्चम्यर्थप्रेक्षा वा" अस्मिन् पदे पञ्चम्यर्थदर्शनं वेत्यर्थः, पञ्चम्यर्थोऽत्र दृश्यते ? "षष्ठ्यर्थप्रेक्षा वा" षष्ठ्यर्थदर्शनं वेत्यर्थः, षष्ठ्यर्थोऽत्र दृश्यते ? अत एतत् "आःकारान्तम्" पदं निर्ऋत्या इति। "देवाः कपोत इषितो यदिच्छन् दूतो निर्ऋत्या इदमाजगाम। तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे॥" (ऋ० स० ८, ८, २३, १)। प्रचेता नामाङ्गिरसः, तेनेयं कपोतसूक्ते दृष्टा। कपोतनिलयनशान्त्यै कपोतपदहरण एतत् सूक्तम्। त्रिष्टुबेषा। हे 'देवाः!' 'कपोतः' 'इषितः' प्रेषितः 'निर्ऋत्याः' स्वभूतः, तयैवानुप्रेषित इत्येवं षष्ठ्यर्थः। अथवा निर्ऋत्याः सकाशादित्येवं पञ्चम्यर्थः। 'यत्' कर्तुम् 'इच्छन्' 'इदम्' अस्मद्गृहम् 'आजगाम'। यस्य नः

पापस्य च पापकर्मणो जन्मान्तरकृतस्य एतत् कपोतगृहनिलयनं यत्पद्दर्शनं च कुड्यादिषु विपाकलिङ्गम्। 'तस्मै' कर्मणे तदर्थं युष्मानेव 'अर्चामि'। समर्था यूयमेतत् पापकर्म विपच्यमानमसमाकमपहर्त्तुमृजु विपाकं वा कर्त्तुं वयमपि च तस्मै पापकर्मणे 'कृणवाम' 'निष्कृतिम्' निष्क्रमणं निर्णेजनम्, तपसा एतद्भूतानुरूपेण। यतो ब्रूमः,—'शं नः' सुखं नः 'अस्तु' 'द्विपदे चतुष्पदे' युष्मत्प्रसादेन च स्वेन तपसेत्यभिप्रायः॥

"परो निर्ऋत्या आचक्ष्वेति"। एतस्मिन् पदे "चतुर्थ्यर्थप्रेक्षा" चतुर्थ्यर्थदर्शनम्। अत एतत् पदम् "ऐकारान्तम्"। "अपेहि मनसस्पतेऽपक्राम परश्चर। परो निर्ऋत्या आचक्ष्व बहुधा जीवतो मनः॥" (ऋ० सं० ८, ८, २२, १)। प्रचेता नाम आङ्गिरस एतामनुष्टुभमपश्यत्। दुःस्वप्नदर्शने विनियुक्ता। मन इति विज्ञानमुच्यते, बुद्ध्यादिः, तस्य पतिः मनसस्पतिरात्मा, इह पुनर्मृत्युर्व्याधिर्वा मनसस्पतिः। उभावपि स्वकृतकर्मापेक्षया प्राणिनां बुद्ध्यादिविज्ञानोपसंहारस्येशाते। तयोरन्यतरः सम्बोध्यते,—हे 'मनसस्पते!' 'अपेहि' अपगच्छ। अस्मत्तो गत्वा च त्वमीपदपगम्य अस्मत्तः, समीप एव मा स्था अस्माकम्। किन्तर्हि? 'अपक्राम' दूरमपेत्य क्राम, अपक्रम्य च 'परः' परतः, अन्यत्रास्मत्त. 'चर' अपुनरावर्त्तमानोऽस्मान् प्रति। किञ्च 'परः' परागत्य यस्याः त्व दूतः निर्ऋत्याः, तस्यै 'निर्ऋत्यै' 'आचक्ष्व'। किमिति? 'बहुधा जीवतो मनः'। अथवा 'परः' प्रकृष्टम् आप्तस्वं तस्याः निर्ऋत्याः' दूतो मां प्राप्तः। अविज्ञातमरणकाल एवाति

सम्मोहतो ब्रवीमि। तस्यै 'निर्ऋत्यै' गत्वा 'बहुधा' अनेकप्रकारम् 'आचक्ष्व' कथय। 'जीवतः' यादृशं मनः भवति, तादृशं मम 'मनः' बुद्ध्यादिकरणज्ञानदिनकरकिरणस्पष्टवृत्तित्वेन तावत् स मुमूर्षुरित्येतदाचक्ष्व। मुमूर्षोर्हि उपक्षीणकर्मणा नातिस्पष्टा इन्द्रियवृत्तयो भवन्ति, न च मम तथेत्यभिप्रायः॥ एवं समान-संहितानामपि पदानामर्थभेदकृतं विभागवैलक्षण्यम्। स चार्थ इदमन्तरेण न विज्ञायते। अत इदमुक्तम्,—'अथापीदमन्तरेण पदविभागो न विद्यते' इति॥

पदविभागप्रसक्तमधुना सहितालक्षणमाह,—"परः सन्निकर्षः संहिता (पा० १, ४, १०९)"—इति। परः प्रकृष्टो यः सन्निकर्षः संश्लेषः, परस्परेण स्वराणां स्वराधिरूढाणाञ्च व्यञ्जनानां सा संहितेत्युच्यते। सा च पुनरियं "पदप्रकृतिः संहिता (ऋ० प्राति० २, १)"। अत्र द्विविधा वर्णयन्ति। पदानां या प्रकृतिः, सेयं पदप्रकृतिः संहिता। किं कारणम्? संहितातो हि पदानि प्रक्रियन्ते, तस्मात् संहितैव प्रकृतिः, विकारः पदानीत्येवमेके मन्यन्ते। अपरे पुनः, पदप्रकृतिः संहितेति पदानि प्रकृतिर्यस्याः सेयं पदप्रकृतिरिति। किं कारणम्? पदान्येव हि संहत्य-मानानि संहिता भवति, तस्मात् पदान्येव प्रकृतिः, विकारः संहितेति॥

एवञ्च कृत्वा "पदप्रकृतीनि सर्वचरणानां पार्षदानि"। सर्वेषां चरणानां सर्वशाखान्तराणामित्यर्थः। किम्? पार्षदानि, स्व-चरणपर्षद्यैव यैः प्रतिशाखानियतमेव पदावग्रहप्रगृह्यक्रमसंहिता-

स्वरलक्षणमुच्यते। तानीमानि "पार्षदानि" प्रातिशाख्यानीत्यर्थः। आह,—किं तेषाम् ? इति। उच्यते,—तानि पदप्रकृतीनि। पदं येषु संहितायाः प्रकृतित्वेन चिन्त्यते, तानीमानि पदप्रकृतीनि। तेषामपि स एव समय इत्यभिप्रायः।

आह,—किम्पुनरत्र साधीयः,—पदानां प्रकृतित्वम्, संहिताया विकारत्वम्? उत वा विकारत्वं पदानाम्, प्रकृतित्वं संहितायाः ? इति। उच्यते, संहितायाः प्रकृतित्वं ज्यायः। आह,—किं कारणम् ? उच्यते,—मन्त्रोऽह्यभिव्यज्यमानः पूर्वमृषेर्मन्त्रदृशः संहितयैवाभिव्यज्यते, न पदैः, अतश्च संहितामेव पूर्वमध्यापयन्त्यनूचाना ब्राह्मणाः, अधीयते चाध्येतारः, पदैरेव विन्ययोक्ष्यन्त मन्त्राः कर्मसु। न त्वेतत् सर्वमस्ति। तस्मादेतैर्विशेषहेतुभिः संहितैव प्रकृतिर्न पदानीति पश्यामः, समयमात्रमितरत् स्वशास्त्रनियतमेव। यदुक्तं पदप्रकृतीनि सर्वचरणानां पार्षदानि, तेष्वेव हि व्याख्यायमानेषु पदानां प्रकृतित्वं भवति, न सर्वत्रैव। तस्मात् संहितैव प्रकृतिरित्येतदसाधीय इति॥

"अथापि याज्ञे दैवते न बहवः प्रदेशा भवन्ति"। अथेदमपरमारम्भप्रयोजनमस्य शास्त्रस्येत्येवं विशेषाधिकारार्थोऽयमथशब्दः। अपीदं वक्ष्यमाणमपि यान्युक्तानीत्येवमपिशब्दः सम्भावने। आह,—किम्पुनस्तत् ? इति। उच्यते,—यज्ञे कर्मणि प्रवर्त्तमाने दैवतेन बहवः प्रदेशा भवन्ति, दैवतेन लिङ्गेन बहवो विधिषु देशा भवन्ति। तद्यथा,—उपतिष्ठते व्युच्छन्त्यान्नैन्द्र्यासदः, आग्नेय्याग्नीध्रेष्णव्या हविर्द्धानमित्येवमादि। न्याय-

विदः खल्वपि याज्ञिकाः पठन्ति,—लिङ्गतो मन्त्राणां शेषभावमधिकृत्य, लिङ्गक्रमसमाख्यानात् काम्ययुक्तं समाम्नानमित्यधिकारे,—एवञ्च मन्त्रविधेरेतदाख्येयेषु शिष्टत्वादिति चैवमादि।

तत्रैवं सति "ते चेद् ब्रूयुर्लिङ्गज्ञा अत्र स्म इति"। ते यद्यप्यत्र ब्रूयुः, किमिति? लिङ्गज्ञाः, लिङ्गज्ञातारो वयमत्र एतस्मिन्नाम्नाये लिङ्गतो वयमत्र यद्यस्मिन् देवतायां तत्र विजानीमः। विज्ञाय च तद्दैवत एव कर्मणि विनियुञ्ज्महे तं मन्त्रम्। एवञ्च सति न नो निरुक्तशास्त्रेण प्रयोजनमस्तीति लिङ्गमस्माकं ज्ञापकमिति केचिद् वर्णयन्ति।

एवं ब्रुवतो वक्तव्याः,—यदि यूयं लिङ्गतो मन्त्रदेवतां विजानीध्वे, "इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति (ऋ० सं० ४, ५, ६, २)"—इत्येतस्मिन् मन्त्रे का देवता? इति।

आह,—केन पुनरभिप्रायेणास्मिन् मन्त्रे देवता पृच्छ्यते? इति। उच्यते,—"वायुलिङ्गं चेन्द्रलिङ्गं चाग्नेये मन्त्रे"। अथ तावदयमाग्नेयो मन्त्रः, अथ च तावदेतस्मिन् मन्त्रे इन्द्रवायू अपि श्रूयेते, तदेतद् दुःपरिज्ञानं लिङ्गमात्रेण, कतमदत्र प्रधानं देवताभिधानम्? कतमदत्र नैघण्टुकम्? इति। ते चेत् याज्ञिका लिङ्गमात्रान्निरुक्तमुपेक्ष्य मन्त्रान् कर्मसु विनियुञ्जाना गुणप्रधानभावमजानन्तो देवताभिधानानामेकमन्त्रगतानामन्यदेवतमन्त्रमन्यदेवते कर्मणि विनियुञ्जीरन्, ततश्चायथाकरणात् कर्मासमृद्धिः स्यात्। न च केवलं कर्मासमृद्धिरेव। किन्तर्हि? अपध्वंसोऽपि स्यादेव दुरिष्टहेतुकः। तस्मात् परिज्ञेयं निरुक्तम्। तेन हि

गुणप्रधानभावः शक्यते विज्ञातुमेकमन्त्रगतानां देवताभिधानाना-
मिति। तदेतदेवं देवतापरिज्ञानद्वारेण पुरुषस्य प्रति विशिष्टोप-
कारकारि। तस्माद् युज्यते प्रारब्धुमिति॥

"त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोप्यग्ने। इन्द्रं
न त्वा शवसा देवता वायुम्पृणन्ति राधसा नृतमाः॥" (ऋ०
सं० ४, ५, ६, २)। भरद्वाजस्यार्षम्। आग्नेयी। प्रातरनुवा-
काश्विनयोर्विनियोगः। हे 'अग्ने!' 'त्वां हि' त्वामेव 'मन्द्रतमं
मृदुतमं सुखाराध्यतमम्, त्वं हि देवेषु सर्वेषु मृदुहृदयतमो यतः,
अतस्त्वामेव 'ववृमहे' सम्भजामहे। केन? अर्कशोकैः। एक-
पदमेतत्। अर्च्यैर्मन्त्रैः शोकैर्दीप्तैः यथोक्तब्रह्मचर्य्यजनित-
वीर्य्यैः। स 'नः' त्वं भज्यमानः तैः मन्त्रैः संसेव्यमानः 'महि'
महत् स्तोत्रं तैरेव मन्त्रैर्युष्मद्गुणानुस्मृतिसन्तानगर्भैरुपग्रथितं
'श्रोपि' शृणु। किञ्च, एवं त्वं महती देवता, येन 'त्वा' त्वामेवैकं
'देवताः' अपि सर्वा 'इन्द्रं न' इन्द्रमिव च 'वायुम्' इव च 'शवसा'
बलेन बलाकृतिभिः अभ्यर्च्चन्ति। किम्पुनः स्वैः कर्मभिः? येऽपि च
केचिदन्ये त्रिलोके नृणां मध्ये बलधनश्रुतैः 'नृतमा' तेऽपि च त्वामेव
'पृणन्ति' पालयन्ति पूरयन्ति वा। 'राधसा' हविर्लक्षणेन धनेन।
एवं सदेव मनुष्यस्य जगतः पूज्यस्त्वं न केवलमस्माकमिति।

एवमयमाग्नेयो मन्त्रः, स एष लिङ्गमात्रदर्शनेनाविज्ञातप्रधान-
देवतो विनियुज्यमान ऐन्द्र्ये वायव्ये वा कर्मणि कर्त्तुरभिप्रेत-
फलसिद्धे नालं स्यात्, कर्मवैगुण्याच्च कर्त्तुरपध्वंसाय स्यात्।
तस्माद् विज्ञेयं मन्त्रदेवतानिश्चयज्ञानाय निरुक्तमिति॥

"अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि। हत्वाय शत्रून् विभजस्व वेद ओजो मिमानो विमृधा नदस्वेति" ॥ (ऋ० सं० ८, ३, १६, २)। यथा पूर्वस्मिन्नाग्नेये वायुलिङ्गमिन्द्रलिङ्गं च, "तथा" एतस्मिन्नपि "मान्यवे मन्त्रे"। "अग्निः" अग्निलिङ्गं नैघण्टुकम्। एवमनेकदेवतालिङ्गसङ्कटेषु दुरवधारं देवतातत्वमनैरुक्तेनाप्रसिद्धमन्त्रव्याख्यानसमयेन।

यदुक्तं लिङ्गज्ञातारो वयमत्र लिङ्गत एव मन्त्रान् कर्मसु विनियोक्ष्यामहे, न नो निरुक्तेन प्रयोजनमस्तीत्येतदयुक्तमिति। "त्विषिरित्यप्यस्य दीप्तिर्नाम भवति" अपठितमपि दीप्तिनामसु न केवलं यान्येव पठितानि, अन्यान्यपीति ॥

"अथापि" इदमपरमारम्भप्रयोजनमस्याः। आह,—किम्? इति। उच्यते,—"ज्ञानप्रशंसामवत्यज्ञाननिन्दा च" ज्ञानञ्च प्रशस्यते, अज्ञानञ्च निन्द्यते। तत्रैवं सति वयमनिन्द्याः स्यामः प्रशस्याश्चेति ज्ञेयं निरुक्तम्। अतो हि आध्यात्माधिदैवताधियज्ञाभिधायिनां मन्त्राणामर्थाः परिज्ञायन्ते, ते च परिज्ञाताः सन्तः पुरुषस्योत्तमाय श्रेयसे भवन्ति। तदेवमखिलपुरुषार्थोपकारसमर्थशास्त्रमिति न्याय्यमारब्धुम् ॥ १ ॥

स्थाणुरयं भारहारः किलाभूदधीत्यवेदं न विजानाति योऽर्थम्। योऽथज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा। यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते।

अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्। स्थाणु-स्तिष्ठतेरर्थोऽर्त्तेररणस्थो वा ॥ २ ॥

क्व पुनर्ज्ञानं प्रशस्यतेऽज्ञानं च निन्द्यते ? इति। उच्यते,—लोके, शास्त्रे च। लोके तावद् यः कश्चिद् विद्वान् भवति, स पूज्यते पुण्यफलैरिभिर्जनैः, तदेतत् प्रत्यक्षत एव दृष्टम्। शास्त्रेऽपि "स्थाणुरयं भारहारः"—इत्यादि। स्थाणुर्वृक्षः, स यथा पत्रपुष्पफलानामात्मीयानां धारणमात्रेणैव सम्बध्यते,—न तज्जैर्गन्धरसरूपस्पर्शोपभोगसुखैः। एवञ्च "किलासावधीत्य वेदं न विजानाति योऽर्थम्" तस्य वेदस्याध्ययनमारमात्रमेव ह्यसौ बिभर्त्ति। "योऽर्थज्ञ इत् सकलं भद्रमश्नुते" य एवार्थज्ञो भवति, न ग्रन्थमात्राध्येता, स एव सकलमनवखण्डितं भद्रम् अश्नुते, अर्थपरिज्ञानफलमश्नुते प्राप्नोति। किम्पुनस्तव ? इह लोके पूज्यतामुपेत्य शिष्टानाम्, इतो लोकादन्तकाले "नाकमेति" यत्रा-सुखं किञ्चिदपि नास्ति, आध्यात्मिकमाधिदैविकमाधिभौतिकं वा, "कमिति सुखनाम, तत् प्रतिषिद्धम्। प्रतिषिध्येत 'न वा अमुं लोक जग्मुषे किञ्च नाकम्। न वा अमुं लोकं गतवते किञ्च नासुखम्। पुण्यकृतो ह्येव तत्र गच्छन्ति"—इति नैग० का० २, ४, २। तत् स्थानमेति निरतिशयम्। कस्मात् पुनरसावीदृशं स्थानमेति ? इति। उच्यते,—इतः। यस्मादसौ "ज्ञानविधूतपाप्मा"। ये हि नाकगमनप्रतिबन्धिनः पाप्मानः,

ते तस्य ज्ञानेन विधूताः, अतोऽसावेति नाकम्। युक्तश्चान्यत्रापि,—न हि ज्ञानेन सदृशं पवित्रमिह विद्यते इति।

अथवा स्थाणुर्गर्दभः। स यथा चन्दनभारं वहत्येव, तदुपभोगैर्नाभिसम्बध्यते, एवं किलासौ या ग्रन्थमात्राध्येता, नार्थज्ञः। एवं तावदस्मिन् ज्ञानं प्रशस्तम्॥

अथैतस्मिन् अज्ञानं निन्द्यते,—"यद् गृहीतमविज्ञातम्"—इति। यद् गृहीतं गुरुमुखात्, अविज्ञातं चार्थतः। किञ्च "निगदेनैव शब्द्यते" निगदमात्रेणैव नित्यकालं शब्द्यते उच्चार्यते, न पुनरर्थतो विचार्य्यते। आह,—किं तस्य? उच्यते,—"अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्"। शुष्कं काष्ठमनग्नौ प्रदेशे नालं ज्वलनाय प्रकाशाय। एवं यो वेदार्थस्यानभिज्ञोऽध्येता स वेदाध्ययनभारमात्रेणैव सम्बध्यते, न तु तदीयेन फलेन, परिज्ञानन्तु श्रेयसा चाभ्युदयेन च युनक्तीति। तस्मादेतत्परिज्ञानाय अवश्यं निरुक्तशास्त्रमारब्धव्यमिति॥

स्थाणुशब्दमर्थशब्दञ्च उदाहरणप्रसक्तौ निर्वक्ति,—"स्थाणुस्तिष्ठतेः"। स्थितो ह्यसौ नित्यकालमेव भवति, न कदाचिदप्यासीदिति। "अर्थोऽर्तेः" गतिकर्मणः, अर्थ्यते ह्यसावर्थिभिः। "अरणस्थो वा" यदास्य स्वामी अरति गच्छति इतो लोकादमुं लोकं तदायमिहैव तिष्ठति, नानेनैव सहामुं लोकं गच्छति दीनारादिरर्थः, तत्सामान्यादितरोऽपि शब्दार्थोऽर्थ उच्यते।

एवं तावत् शिष्टानुगमस्मृतौ ज्ञानं प्रशस्यते, अज्ञानञ्च निन्द्यते॥२॥

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्। उतो त्वस्मैतन्वं१ विसस्रे जायेव पत्य उशती सुवासाः। अप्येकः पश्यन्न पश्यति वाचमपि च शृण्वन्न शृणोत्येनामित्यविद्वांसमाहार्धमप्येकस्मै तन्वं विसस्र इति स्वमात्मानं विवृणुते ज्ञानं प्रकाशनमर्थस्याहानया वाचोपमोत्तमया वाचा जायेव पत्ये कामयमाना सुवासा ऋतुकालेषु सुवासाः कल्याणवासाः कामयमाना ऋतुकालेषु। यथा स एनां पश्यति स शृणोतीत्यर्थज्ञप्रशंसा। तस्योत्तरा भूयसे निर्वचनाय ॥ २ ॥

न केवलं स्मृतावेव ज्ञानप्रशंसा अज्ञाननिन्दा च। किन्तर्हि? वेदेऽपि,—"उत त्वः पश्यन् (ऋ० सं० ८, २, २३, ४)"—इति। विद्यासूक्ते द्वे अप्येते ऋचौ बृहस्पतेरार्षम्। 'उत'-शब्दोऽपि शब्देन समानार्थः। 'त्वः' एक इत्यर्थः। बहूनामपि समानपृष्ठोदरपाणिपादानां समानमेवाध्ययनमधीयानानाम् एकः कश्चित् 'पश्यन्' अपि 'वाचं' मनसा स्वाभ्यस्ताध्ययनोऽपि तीक्ष्णविद्यः सन् 'न ददर्श' न पश्यत्येव अर्थानभिज्ञत्वात्। स हि तां सम्यक् पश्यति, यस्तस्या अर्थं विजानाति। अर्थपरिज्ञानकला हि वागित्यभिप्रायः। एवमेकः 'शृण्वन्' अपि 'न शृणोति' 'एनां' वाचम्। य एव हि अर्थमवबुध्यते वाचः, तेनैव सा सम्यक् श्रुता भवति,

नेतरेण, इतरो ह्यविद्वान् ध्वनिमात्रमेवोच्चारयति वाचम्। "अर्धम्" अनेनार्द्धर्चेन "अविद्वांसमाह" निन्दन् मन्त्रदृक्। साम्प्रतमुत्तरेणार्द्धर्चेनार्थज्ञप्रशंसनमाह,—'उतो त्वस्मै' "अप्येकस्मै" कस्मैचिदर्थज्ञाय 'तन्वं' शरीरं 'विसस्रे' विसंसयति विवृणोतीत्यर्थः। अर्थो वाचः शरीरं तं विवृणोति आत्मानं दर्शयत्येवास्मै कस्मैचिदर्थज्ञाय "प्रकाशनमर्थस्याहानया वाचा" अनेन तृतीयेन पादेनेत्यर्थः। कथन्तर्हि विवृणुते तन्वम्? इति, अतः, —"उपमोत्तमया वाचा" उत्तमेन पादेनोच्यते,—"जायेव पत्य उशती सुवासाः"—इत्यनेन। यथा हि 'जाया' विवृतसर्वाङ्गावयवा भूत्वा 'उशती' 'कामयमाना" 'पत्ये' इष्टाय भर्त्रे प्रेम्णा दर्शयेदात्मानम्। कस्मिन् काले? यदा 'सुवासाः' भवति, निर्णिक्तवासा भवति। निर्णिक्तवासा नीरजस्का "ऋतुकालेषु" तदा ह्यतितरां स्वपुरुषं प्रार्थयते। अत एतयावस्थयोपमीयते। "यथा स." पुरुषस्ताम् "एनां" यथावत् 'पश्यति" स्त्रियम्, नेतरां या ह्यनपटप्रावृतसर्वगात्रा। एवं "सः" एवैतां वाचं यथावत् "शृणोतीति"। यः पदशोऽवच्छिद्यैतां विगृह्य वार्थमस्याः पश्यति समस्तस्तमेवमस्यामृचीयम् "अर्थज्ञप्रशंसा" ॥

अर्पीयमपरा ऋक् "तस्याः" एव "उत्तरा" अस्यैवार्थस्य प्रकृतस्य ज्ञानप्रशंसाख्यस्य फलाभिधानद्वारेण "भूयसे" बहुतराय अमुना फलेनाभिसम्बन्धात् प्रतिविशिष्टज्ञानमित्येवं "निर्वचनाय" निर्विचिच्य निर्द्धार्य्य वचनं कथनं निर्वचनम्, तस्मै निर्वचनाय ॥ ३ ॥

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु। अघेन्या चरति मायया पु वाचं शुश्रुवाँ अफलाम-पुष्पाम्। अप्येकं वाक्सख्ये स्थिरपीतमाहू रममाणं विपीतार्थं देवसख्ये रमणीय स्थान इति वा विज्ञातार्थं यन्नामुवन्ति वाग्ज्ञेयेषु बलवत्स्वप्यघेन्वा ह्येष चरति मायया वाक्प्रतिरूपया नास्मै कामान् दुग्धे वाग्दोह्यान् देवमनुष्यस्थानेषु यो वाचं श्रुतवान् भवत्यफलामपुष्पामित्यफलास्मा अपुष्पा वाग् भवतीति वा किञ्चित्पुष्पफलेति वार्थं वाचः पुष्पफलमाह याज्ञदैवते पुष्पफले देवताध्यात्मे वा ॥ ४ ॥

तद्यथा,—"उत त्वं सख्ये स्थिरपीतमाहुः (ऋ० सं० ८, २, २४, ४)"—इति। "अप्येकम्" अपि बहून् विदुषः "सख्ये" सखिभावे, कतरस्मिन् "देवसख्ये" समानख्यानतायां देवसायुज्ये इत्यर्थः। वक्ष्यति हि,—"यां यां देवतां निराह, तस्यास्तस्यास्ताद्भाव्यमनुभवति (प० का० १३, १३)"—इति। अथवा, "देवसख्ये" रमणीये स्थाने। यस्मिन् देवानां सखिभावः, तद्देवसख्यं स्थानम्, तस्मिन् देवसख्ये रमणीये स्थाने, देवलोके इत्यर्थः। किम्? इति 'स्थिरम्' अविचालिनम् अप्रच्यवनधर्माणम्। कमेवमाहुः? "विपीतार्थम्", आपीतार्थं गृहीतार्थमित्यर्थः। क एवमाह? इयमेव "वाक्" ऋक्संहिता। किञ्च,

"नैनं हिन्वन्त्यपि वाजिनेषु"। 'एनं' वागर्थज्ञं 'न हिन्वन्ति' नाननुगन्तुं शक्नुवन्ति। केषु? 'वाजिनेषु' "वाग्ज्ञेयेषु" अर्थेषु बलवत्सु "अपि" दुर्ज्ञेयेषु दुरवगाहनीयेषु, समुद्रपिहितरत्नसन्निभेषु देवतापरिज्ञानादिषु व्याकर्त्तव्येषु। स हि तान् व्याकर्त्तुं शक्नोति, नेतरे मन्दबुद्धयो बहवोऽपि समागताः शक्नुवन्ति तानर्थान् व्याकर्त्तुम्, यानसौ व्याकरोति। अत एतदुक्तम्,—"नैनं हिन्वन्त्यपि वाजिनेषु"। अपि एवं तावदर्थज्ञः प्रशस्तः॥

अथेदानीमविद्वानुत्तरेणार्द्धर्चेन निन्द्यते,—"अधेन्वा चरति" "अधेन्वा हि एप चरति" न हि सा वाक् हिनोतीह न परत्र च, यस्या अर्थो न परिज्ञायते। तया गृहीतयैव तामधीयान इतश्चेतश्चरति, तत् प्रधान एव सर्वतः पर्य्यटतीत्यभिप्रायः। किञ्च, मायययैषः चरति गृहीतया। यथा हि कश्चिन्मायया सुवर्णं विभृयात्, एवमयं "वाचम्" एव एतां विभर्त्ति। सा तादृशी म्रियमाणा "वाक्" किं करोति? "नास्मै कामान् दुग्धे"। कतमान्? ये तस्या वाचो दोग्धव्याः। क्व? "देवतास्थानेषु मनुष्यस्थानेषु" च। "यः"। किं करोति? य एवं 'शुश्रुवान्' "श्रुतवान् भवति"। कथम्? "अफलामपुष्पामिति" एवं यः श्रुतवान् भवति, एभ्यः सकाशात् श्रुत्वा च दृढ़ग्राहेण गृहीत्वावस्थितो भवति, अध्ययनादृते नान्यदस्ति वाचि किञ्चित् मृग्यमिति। तस्मै किम्? इति "अफलैवासा अपुष्पा" च "वाग् भवतीति"। यथैव ह्यसौ पश्यति अफलेयमपुष्पा चेति तथैव भवतीत्यभिप्रायः। अथ "वा" "किञ्चित् पुष्पफलेति वा"।

एतदुक्तं भवति,—अल्पफलामल्पपुष्पामिति। किङ्कारणम्? अस्ति ह्यध्ययनमात्रे किञ्चिदल्पं फलम्, नासौ परिश्रमो व्यर्थ एवेति भाष्यकाराभिप्रायः। आह,—किम्पुनर्वाचः पुष्पफलम्? इति। उच्यते,—"अर्थवाचः पुष्पफलमाह" एतस्मिन् मन्त्रे मन्त्रदृगाह। कः पुनरसावर्थः? इति। याज्ञदैवतमध्यात्ममित्येष वाचः समासतोऽर्थः। स पुनरेष रूपकल्पनया पुष्पफलविभागेन द्विधा प्रविभज्यते,—"याज्ञदैवते" पुष्पफले "दैवताध्यात्मे वा" इति। यज्ञपरिज्ञानं याज्ञम्, देवतापरिज्ञानं दैवतम्, आत्मन्यधि यद् वर्त्तते तदध्यात्मम्। स एष सर्वोऽपि मन्त्रब्राह्मणराशिरेवं त्रिधा विभक्तः। तत्रैवं सति,—यदा अभ्युदयलक्षणो धर्मोऽभिप्रेयते, तदा याज्ञपुष्पं दैवतफलम्। किं कारणम्? पूर्वं हि पुष्पं भवति फलार्थम्, याज्ञमपि पूर्वं तन्यते देवतार्थम्, इत्येतस्मात् सामान्याद् याज्ञं पुष्पम्, दैवतं फलम्। यदा पुनर्निःश्रेयसलक्षणो धर्मोऽभिप्रेयते, तदोभे एव याज्ञदैवते पुष्पत्वमेव बिभृतः। दैवते हि याज्ञमन्तर्भूतमेव तदर्थत्वात्, अतो न पृथगुच्यते। यत पुनरधिदैवतं सर्वमपि प्रतिविशिष्टज्ञानेनोपासकेन मुमुक्षुणा निरूप्य चेतसा आत्मानमेव प्रतिसम्पाद्यते कार्यकारणाधिदेवताद्वारेण; सोऽयमेवमधिदैवतमधियज्ञं चोच्छिद्याध्यात्ममेवाभिसम्पादयति, तथा पुष्पभावमुच्छिद्य पुष्पं फलभावायेति। एवं सोऽयमात्मयाज्येवाभिसम्पद्यते। तत्रैवं सति,—अध्यात्मार्थत्वादधिदैवतस्य, अध्यात्मस्य च पुरुषार्थस्य निष्पन्नत्वात्, दैवतं पुष्पम्, अध्यात्मं फलमित्युक्तम्॥ ४॥

साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुरुपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि च बिल्मं भिल्मं भासनमिति वैतावन्तः समानकर्माणो धातवो धातुर्दधातेरेतावन्त्यस्य सत्त्वस्य नामधेयान्येतावतामर्थानामिदमभिधानं नैघण्टुकमिदं देवतानामप्राधान्येनेदमिति तद्यदन्यदैवते मन्त्रे निपतति नैघण्टुकं तत् ॥ ५ ॥

आह,—कुतः पुनरिदमायातं निरुक्तशास्त्रं प्रधानमितराणि चाङ्गानि ? इति । उच्यते,—"साक्षात्कृतधर्माण ऋषयो बभूवुः" । साक्षात्कृतो यैर्धर्मः साक्षाद् दृष्टः प्रतिविशिष्टेन तपसा, त इमे साक्षात्कृतधर्माणः । के पुनस्ते ? इति । उच्यते,—ऋषयः । ऋषन्ति अमुष्मात् कर्मण एवमर्थवता मन्त्रेण संयुक्तादमुना प्रकारेणैवंलक्षणं फलविपरिणामो भवतीत्यृषयः । "ऋषिर्दर्शनात् (नै० २, ३, २)"—इति वक्ष्यति । तदेतत् कर्मणः फलविपरिणामदर्शनमौपचारिक्या वृत्त्योक्तम्,—साक्षात्कृतधर्माण इति । न हि धर्मस्य दर्शनमस्ति, अत्यन्तापूर्वो हि धर्मः ।

आह,—किन्तेषाम् ? इति । उच्यते,—"तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः" । ते ये साक्षात्कृतधर्माणस्तेऽवरेभ्यः अवरकालीनेभ्यः शक्तिहीनेभ्यः श्रुतर्षिभ्यः । तेषां हि श्रुत्वा ततः पश्चाद्बुभुत्सेत्वमुपजायते, न यथा पूर्वेषां

साक्षात्कृतधर्मणां श्रवणमन्तरेणैव। आह,—किं तेभ्य ? इति। उच्यते,—ते अवरेभ्य उपदेशेन शिष्योपाधिकया वृत्त्या मन्त्रान् ग्रन्थतोऽर्थतश्च सम्प्रादुः सम्प्रदत्तवन्तः, तेऽपि चोपदेशेनैव जगृहुः।

अथ तेऽपि "उपदेशाय ग्लायन्तोऽवरे विल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि च"—इति। उपदेशाय उपदेशार्थम्। कथं नामोपदिश्यमानमर्थमेते शक्नुयुर्ग्रहीतुमित्येतमधिकृत्य ग्लायन्तः खिद्यमानास्तेष्वनुगृह्णन्ति, तदनुकम्पया तेषामायुषः सङ्कोचमवेक्ष्य कालानुरूपाञ्च ग्रहणशक्तिम्। विल्मग्रहणायेमं ग्रन्थं गवादिदेवपत्न्यन्तं समाम्नातवन्तः। किमेतमेव ? नेत्युच्यते,—वेदं वेदाङ्गानि च इतराणीति।

कथम्पुनः समाम्नासिषुः ? इति, आह,—शृणु। वेद तावदेकं सन्तमतिमहत्त्वाद् दुरध्येयमनेकशाखाभेदेन समाम्नासिषुः सुख-ग्रहणाय व्यासेन समाम्नातवन्तः। तद्यथा,—एकविंशतिधा वाह्वृच्यम्, एकशतधा आध्वर्यवम्, सहस्रधा सामवेदम्, नवधा आथर्वणम्। वेदाङ्गान्यपि। तद्यथा,—व्याकरणमष्टधा, निरुक्तं चतुर्दशधा इत्येवमादि। एवं समाम्नासिषुर्भेदेन ग्रहणार्थम्। कथं नाम ? भिन्नान्येतानि शाखान्तराणि लघूनि सुखं गृह्णीयुरेते शक्तिहीना अल्पायुषो मनुष्याः,—इत्येवमर्थं समाम्नासिषुरिति।

विल्मग्रहणं भाष्यवाक्प्रशक्तं निर्ब्रवीति,—यदेतत् "विल्मम्" इत्युक्तम्, एतद् "भिल्मम्" वेदानां भेदनम् ? भेदो व्यास इत्यर्थः। "भाषणमिति वा"। अथ वा भासनमेव बिल्म-शब्देनोच्यते।

वेदाङ्गविज्ञानेन भासते प्रकाशते वेदार्थ इति। अत इदमुक्तं विल्ममिति। एवं भिदेर्भासतेर्वा विल्मशब्दः। एवमिदमृषिभ्यो निरुक्तशास्त्रमागतमितराणि चाङ्गानीति परिशोधित आगमः॥

अथेदानीं निघण्टुसमाम्नायविरचना वक्तव्या प्रकरणत्रयविभागेन सुखव्याख्यानार्थमस्य शास्त्रस्य। सेयमुच्यते,—"एतावन्तः समानकर्माणो धातवः"—"एतावन्त्यस्य सत्त्वस्य नामधेयानि" इति। स एव पदराशिर्नैघण्टुकं नाम प्रकरणम्। एतावन्त इति या चैषु धातुषु व्याख्यातपदेषु प्रतिनियता सङ्ख्या, साभिप्रेयते। तद्यथा,—"गतिकर्माण उत्तरे धातवो द्वाविंशशतम् (नै० का० ३, २, ३)" "कान्तिकर्माण उत्तरेऽष्टादश (नै० का० ३, २, ३)—इत्येवमादि। एतावन्त्यस्य सत्त्वस्येति या नामसु प्रतिनियता सङ्ख्या, साभिप्रेयते। तद्यथा,—"पृथिवीनामधेयान्येकविंशतिः "हिरण्यनामान्युत्तराणि पञ्चदश (नै० का० २, ३, १)"—इत्येवमादि। यत्रैतावर्थौं प्रायेण चिन्त्येते, प्रसङ्गतोऽन्यद् यत् किञ्चित्। एवंलक्षणं, नैघण्टुकं नाम प्रकरणम्। गवादि, प्राक् "जहा (नैग० का० ४, १, १)"—शब्दात्।

अथ पुनर्यत्र "एतावतामर्थानामिदमभिधानम्"—इत्यर्थः प्रायेण चिन्त्यते। तद्यथा,—"आदित्योऽप्यकूपारः समुद्रोऽप्यकूपारः (नैग० का०, ३, २)"—इत्येवमादि। अनवगतसंस्काराश्च निगमाः जहादयः प्रायेण चिन्त्यन्ते, प्रसङ्गतोऽन्यद् यत् किञ्चित्। अथ पुनर्यत्र "नैघण्टुकं" "देवतानाम् अप्राधान्येन" अस्मिन् मन्त्रे "इदम्" अन्यदत्र प्राधान्येन वर्त्तत इत्ययं विभागः प्रायेण

चिन्त्यते। तदेवंलक्षणम् ऐकपदिकं नाम प्रकरणम्, जहादि, प्राक् अग्निशब्दात् (दै० का० १, ३, ६)।

दैवतं नाम प्रकरणम्, अग्निशब्दादि देवपत्न्यन्तम् (दै० का० १२, ४, १०)। तान्येतानि त्रीणि प्रकरणानि,—नैघण्टुकम्, ऐकपदिकम्, दैवतम् इति। अनेन प्रकरणत्रयविभागप्रपञ्चेनेदमवस्थितं निरुक्तशास्त्रमिति।

"तद्यदन्यदैवते मन्त्रे निपतति नैघण्टुकं तत्"। इदमुक्तं नैघण्टुकमिदं देवतानामप्राधान्येनेदमिति, तत्र न ज्ञायते किमिदमुक्तं भवति, तदेतल्लक्षणत उपदिश्यत इति पर्य्युपयुक्तस्तच्छब्दः। यत् अभिधानम् अन्यदैवते, अन्या यस्मिन् प्रधानदेवताः सोऽयमन्यदैवतः, तस्मिन् अन्यदैवते मन्त्रे। यमर्थमन्यस्यां प्रधानायां मन्त्रदेवतायां निपतति निगमयति अभिप्रयुज्यमानमङ्गभावं गच्छति मन्त्रवाक्ये नैघण्टुकं तदित्युच्यते गुणभूतमित्यर्थः। सञ्ज्ञा हि तस्येयमस्मिञ्छास्त्रे ॥ ५ ॥

अश्वन्न त्वा वारवन्तम्। अश्वमिव त्वा वालवन्तं वाला दंशवारणार्था भवन्ति दंशो दशतेः। मृगो न भीमः कुचरो गिरिष्ठाः। मृग एव भीमः कुचरो गिरिष्ठा। मृगो मार्ष्टेर्गतिकर्मणो भीमो बिभ्यत्यस्माद्भीष्मोऽप्येतस्मादेव। कुचर इति चरतिकर्म कुत्सितमथ चेद्देवताभिधानं कायं न चरतीति। गिरिष्ठा गिरिस्थायी गिरिः पर्वतः समुद्गीर्णो

भवति पर्ववान् पर्वतः पर्व पुनः पृणाते प्रीणातेर्वार्द्धमास-पर्व देवानस्मिन् प्रीणन्तीति तत् प्रकृतीतरत्सन्धिसामान्यान्मेवस्थायी मेघोऽपि गिरिरेतस्मादेव तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते तदुपरिष्टाद् व्याख्यास्यामो नैघण्टुकानि नैगमानीहेह ॥ ६ ॥

तद्यथा,—"अश्वन्न त्वा वारवन्तं वन्दध्या अग्निन्नमोभिः। सम्राजन्तमध्वराणाम् ॥" (ऋ० सं० १, २, २२, १)। अस्यामृचि अश्वो नैघण्टुकः, अग्निः प्रधानम्। शुनःशेपस्यार्षम्। गायत्री। वारवन्तीयानुशासने विनियुक्ता। साम्नश्च वारवन्तीयस्य एषा योनिः। 'अश्वं न त्वा' अश्वमिव त्वां हे अग्ने! 'अग्निम्' अग्रे नेतारं देवानां, 'वारवन्तं' वालवन्तं वृषाश्वम्। स हि अतितरां वालवान् भवति। वन्द्यते परिचर्य्यते च। न तथान्ये। तमिव त्वां 'वन्दध्यै' वन्दामहे स्तुमः। 'नमोभिः' नमस्कारैः, अन्नैर्वा हविर्भिरुद्यतैः। क्व पुनरवस्थितम्? कथं वा वन्दामहे? इति 'सम्राजन्तं' दीप्यमानम् 'अध्वराणां' यज्ञानां मध्येऽवस्थितमुत्तरवेद्यादिषु धिष्ण्येषु अभिप्रेतार्थसिद्धये वन्दामहे ॥

वालशब्दस्य निगमप्रसक्तस्य निर्वचनम्,—"वाला दंशवारणार्था भवन्ति"। तैर्हि दंशादयो निवार्य्यन्ते। दंशशब्दस्य प्रसक्तस्य निर्वचनम्,—"दंशो दशतेः" इति। दशति ह्यसौ ॥

द्वितीयमुदाहरणम्,—"प्रतद्विष्णुः स्तवते वीर्य्येण मृगो न

भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥" (ऋ० सं० २, २, २४, २)। किञ्च, "मृगो न भीमः कुचरो गिरिष्ठाः परावत आजगन्थापरस्याः। सृकं संशाय पविमिन्द्र तिग्मं वि शत्रून् ताव्हि विमृधो नुदस्व ॥" (ऋ० सं० ८, ८, ३८, २)। इति। गयो नामेन्द्रपुत्रः, तस्येयमार्षम्। त्रिष्टुप्। वैमृधस्य हविषो याज्या (आ० सू० २, १०)। इन्द्रोऽस्य प्रधानम्, मृगो नैघण्टुकः। 'मृगो न' मृग इव, व्याघ्रो वा सिंहो वा। 'भीमः' भीषणः। 'कुचरः' कुत्सित-चरणः हिंस्रः, प्राणिवधजीवनः। 'गिरिष्ठाः' पर्वताश्रयः। स यथा कञ्चिदन्यं प्राणिविशेषं हन्ति। तैरनभिभूयमान इह कर्मणि हे 'इन्द्र!' एतदस्मद्वचः कुरु। 'सृकम्' यः शत्रुकार्य्येषु सक्तुं शक्नोति। 'परावतः' परस्मात् अतिदूरस्थानात्, 'परस्याः' दिवः सम्बन्धिनः 'आजगन्थ' आगच्छ। एतदर्थमागत्य च ते 'पवि' वज्रं 'संशाय' तीक्ष्णीकृत्य 'तिग्मं' छेदनायोत्साहवन्तं सुनिशितं कृत्वा ततो 'वि ताव्हि' विताड़य, एतानस्मच्छत्रून् ('शत्रून्') एकप्रहारवर्जितदेहान् कुरुष्व। यानपि च न हि हिनस्सि कथञ्चित् तानपि 'मृधः' हिंसकान् 'विनुदस्व' नानाप्रकारं प्रेरयस्व दूरमपुनरागमनाय ॥

"अथ चेद् देवताभिधानम्" एतत् कुचर इति, ततः "क्वायं न चरतीति" सर्वत्र चरतीति। "गिरिष्ठा मेघस्थायी" इति च। [अनुपक्षीणशक्तयो हि विभवो वेदशब्दा यथाप्रज्ञं न ब्रुवन्तो, पुरुषाणामर्थाभिधानेषु विपरिणममानाः सर्व-

स्तोमुखा अनेकाथ ह्येतदनेन प्रदर्शितं भवतीत्यथ चेद् देवताभिधानमिति ॥

मृगादिशब्दान् निगमप्रसक्तान् निर्ब्रवीतीति,—"मृगो मार्ष्टेर्गतिकर्मणः" नित्यं ह्यसौ गच्छति। "भीमो बिभ्यत्यस्मात्" सर्वएव ह्यस्माद् बिभेति। भीष्मशब्दं सारूप्यप्रसक्तं निराह,—"भीष्मोऽप्येतस्मादेव" इति। "कुचर इति, चरति कर्म कुत्सितम्" चरति ह्यसौ कर्म कुत्सितम्, व्याघ्रो वा सिंहो वा। "कायं न चरतीति" देवताभिधानत्वे। "गिरिः पर्वतः"। "समुद्गीर्णो भवति" समस्तो ह्यसावुद्गीर्ण इव भूमौ भवति ॥

पर्वतशब्दं पर्य्यायाख्यानप्रसक्तं निराह,—"पर्ववान् पर्वतः" इति। शिलाशिखरसन्धिभिरसौ तद्वान् भवति। पर्वशब्दं विग्रहप्रसक्तं निराह,—"पर्व पुनः पृणातेः" पूरणार्थस्य। पूरयन्ति हि ते शिलाशिखरसन्धयोऽखिलं पर्वतम्। "प्रीणातेर्वा" तर्पणार्थस्य। तत् पुनरेतत् "अर्द्धमासपर्व"। किं कारणम्? "देवान् अस्मिन्" हविर्भिः "प्रीणन्तीति"। "तत्प्रकृतीतरत्सन्धिसामान्यात्" कालसन्धिश्च शिलासन्धिश्च समानं सन्धित्वमिति देवताभिधानपक्षे "मेघस्थायी" गिरिष्ठाः। "मेघोऽपि गिरिरेतस्मादेव" असावपि समुद्गीर्णो भवति अन्तरिक्षलोके ॥

"तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां, तद्दैवतमित्याचक्षते। तत् उपरिष्टाद्दु व्याख्यास्यामः। नैघण्टुकानि नैगमानि इह इह"। तदेतदुच्यते,—सामान्यलक्षणोपलक्षितप्रकरणत्रय-

विभागेनावस्थितो गवादिर्देवपत्न्यन्तः समाम्नायोऽयमानुपूर्व्या व्याख्यास्यत इति पर्य्युपयुक्तः तच्छब्दः। यानि नामानि प्राधान्यस्तुतीनामग्न्यादीनाम्, प्रधानभावेन याः स्तूयन्ते निपातभावेन ता एता प्राधान्यस्तुतयो देवताः तासां यानि नामान्यग्न्यादीनि देवपत्न्यन्तानि, तानि सर्वाण्यपि समुदितानि सन्ति। एतयैकया सामान्यया प्रकरणसञ्ज्ञया आचक्षते आचार्य्याः। -कतमया? उच्यते,—दैवतमित्येतया। निरूढा हीयमेतस्मिन् नैघण्टुकशब्दसमुदाये सञ्ज्ञेत्यभिप्रायः। तत् पुनरेतद् दैवतं प्रकरणमुपरिष्टाद् व्याख्यास्यामोऽस्य शास्त्रस्य। आह,—किङ्कारणम्? उच्यते,—गुणपदेषु व्याख्यातेषु प्रधानदेवतापदानि सुखं व्याख्यास्यन्त इत्यनेनाभिप्रायेण। देवतापरिज्ञानं तत्फलाभिध्याननिष्ठं च कथं नामेदं शास्त्रं स्यात्? इति,—यानि पुनर्नैघण्टुकानि गवादीनि, नैगमानि च जहादीनि, तानीह प्रकरणद्वये नैघण्टुके चैकपदिके च, व्याख्यास्याम इत्येतदेवानुवर्त्तते। त एते गवाद्यो देवपत्न्यन्ताः निघण्टवः, तदेकदेशो नैघण्टुकं प्रकरणमिति निघण्टुसञ्ज्ञया व्यवहारो लोके,—'निघण्टुमधीमहे' 'निघण्टुमध्यामहे' इति। शास्त्रे खल्वपि नैघण्टुकं प्रकरणमिति। नैगममित्यैकपदिकम्। नैघण्टुकानि नैगमानि पदानि चेह प्रकरणद्वये व्याख्यास्यामः॥

अध्यायपरिसमाप्तिलक्षणार्थः परितोषार्थो वा द्विरभ्यास इति॥६॥

इति निरुक्तवृत्तौ षष्ठाध्यायस्य षष्ठः पादः॥६॥

इति निरुक्तटीकायां जम्बूमार्गाश्रमवासिन आचार्य्यभगवद्-दुर्गस्य कृतौ षष्ठोऽध्यायः (प्रथमोऽध्यायः) समाप्तः ॥१॥

---

१ २ ३ ४ ५

(समाम्नायस्तत्रचतुष्ट्वमतोऽन्येऽथनिपातावायुर्वा-

६ ७ ८ ९ १० ११ १२

त्याननूनंनूनंसातऋचान्त्वोऽक्षण्वन्तोनिष्ट्वक्त्रासोहविर्भिरि-

१३ १४ १५ १६ १७ १८

तीमान्यथापियोयथोहिन्वथापीदमर्थवन्तोऽथापीदंस्थाणुरय-

१९ २०

मुतत्वःपश्यन्नुतत्वंसख्येविंशतिः ॥)

इति निरुक्तं पूर्वषट्के प्रथमोऽध्यायः ॥१॥

अथ द्वितीयाध्यायस्य

प्रथमः पादः ।

—:०:—

ॐ३म्। अथ निर्वचनं तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयादथानन्वितेऽर्थे प्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद् वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयान्न त्वेव न निर्ब्रूयान्न संस्कारमाद्रियेत विपयवत्यो हि वृत्तयो भवन्ति यथार्थं विभक्तीः सन्नमयेत् प्रत्तमवत्तमित्ति धात्वादी एव शिष्येते ॥१॥

"अथ निर्वचनम्" । नामाख्यातोपसर्गनिपातलक्षणमुक्त्वा शास्त्रारम्भप्रयोजनानि च वेदाङ्गव्यूहं च सप्रयोजनं निघण्टुसमाम्नायविरचनाञ्च प्रकरणत्रयविभागेनोक्त्वा दैवतमुत्कृष्य नैघण्टुकनैगमे प्रकरणे पुरस्कृते नैघण्टुकानि नैगमानीहेति। ते पुनरेते निर्वचनलक्षणमनुक्त्वा न शक्येते व्याख्यातुं यस्मात्, 'अथ' एतस्मात् कारणात् 'निर्वचनम्' लक्षणतो व्याख्यास्याम

इति शेषः। अपि हि तस्यार्थस्य परोक्षवृत्तावतिपरोक्षवृत्तौ वा शब्दे निःकृष्य विगृह्य वचनं निर्वचनम्। स एष निर्वचनाम्युपाय इत्युच्यते॥

इह द्विधा शब्दाः,—समर्थस्वरसंस्काराश्च असमर्थस्वरसंस्काराश्च। "तत्" तत्रैवं सति, "येषु" तावत् "पदेषु" "स्वरसंस्कारौ समर्थौ" अवैपरीत्येन "प्रादेशिकेन" च "गुणेनान्वितौ स्याताम्"। प्रदेशाभिधायिना धातुरूपेणान्वितौ सम्यद्भावनुगतावभिधेयस्थे धातुरूपे स्याताम्॥

"तानि" तावत् "तथा" एव यथालक्षणमेवमेषु नेरुक्तो "निर्ब्रूयात्"। तन्मा भूदित्यत इदमुच्यते,—"येषु पदेषु स्वरसंस्कारौ समर्थौ स्यातां तथा तानि निर्ब्रूयात्" इति॥

"अर्थानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येन"। अथ पुनरनन्वितेऽर्थे न्यायस्वरसंस्कारयुक्तेन शब्देन यत्र निपुणमप्यन्विष्यमाणः शब्दोऽर्थो कल्पयितुं न शक्यते, अन्यर्थंवार्थो व्यवतिष्ठते,—अन्यर्थैव शब्दः। प्रादेशिकेन विकारेण विक्रियमाणेऽपि चासौ शब्दो विपरिणम्यमानः अप्रादेशिक एव स्यादसमार्थ एव। तां प्रदेशाख्यामभिधेयसत्त्वस्थां क्रियामभिधातुमाह। तत्र किं कर्त्तव्यम्? इति। उच्यते,—तत्रैवं सति अर्थनित्यो भूत्वा, अर्थप्रधानः। तद्यथा, —मुद्गानित्यमेवास्य भोजनमित्युक्ते मुद्गप्रधानमिति गम्यते, एवमिहापि अर्थनित्य इत्युक्ते अर्थप्रधान इति गम्यते, अर्थप्राधान्येनानादृत्य स्वरसंस्कारौ परीक्षेत। ततस्तदभिधानं बुद्ध्वा

केनचिदर्थवृत्तिसामान्येन क्रियागुणसामान्येनेत्यर्थः। कतमस्य धातोरर्थसामान्यमत्रास्तीति ? ततस्तर्कयित्वा सामान्यं तेन निर्ब्रूयात्। अर्थो हि प्रधानम्, तद्गुणभूतं शब्दः। तस्मात् अर्थसामान्यं बलीयः शब्दसामान्यात्॥

अथ पुनर्यत्रार्थसामान्यमपि नास्ति, तत्र ? "अविद्यमाने(ऽर्थ)सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयात्, न त्वेव न निर्ब्रूयात्, न संस्कारमादद्रियेत, विषयवत्यो हि वृत्तयो भवन्ति, यथार्थं विभक्तीः सन्नमयेत्"। स्वरवर्णं सामान्येनापि निर्ब्रूयादेव,—अमुष्मिन् धातावयं स्वरो वर्णो वा मया दृष्टः, स एव यस्मिन्नभिधाने लक्ष्यते इत्येवमुत्प्रेक्ष्य स धात्वर्थः सूत्रबद्ध इव तस्मिन्नभिधाने आहृत्य स्फारीकृत्य कृत्स्नः प्रकाशयितव्यः। एवमविद्यमाने अर्थसामान्ये स्वरवर्णसामान्यमात्रेणापि निर्ब्रूयादेव। नत्वेव निर्ब्रूयात्, इतरथा ह्यनर्थकमेव निरुक्तशास्त्रं स्यात्। तन्मा भूदित्यत इदमुच्यते लक्षणपराङ्मुखेषु शब्देषु न संस्कारमादद्रियेत।

कन्तर्हि अर्थसामान्यमादद्रियेत, शब्दसामान्यं वा ? तद्यथा,—प्रवीणोदारनिस्त्रिंशशब्दा उत्सृष्टस्वार्थाभिधेयसम्बन्धाः सन्तः क्रियागुणं सामान्यं हेतुमात्रमाश्रित्यान्येष्वेवार्थान्तरेषु वर्त्तन्ते।

तद्यथा,—प्रकृष्टो वीणायां प्रवीणो गान्धर्वे, अत्र ह्यस्य मुख्या वृत्तिः। स एव स्वमर्थमभिधेयमुत्सृज्यैव गान्धर्वमभ्यासपाटवमात्रसामान्यमाश्रित्य सर्वत्रैवाभिप्रवृत्तः, यो हि यस्मिन् कृतयत्न उत्पन्नकौशलो भवति, स तत्रोच्यते प्रवीण इति। तद्यथा,—'प्रवीणो व्याकरणे', 'प्रवीणो निरुक्ते' इति।

एवमेवोदार इति। प्रागारसन्निपातात् आकृतेनैव सारथेर्यो वहत्यश्वोऽनड्वान् वा स उद्गतारत्वादुदारः। तत्र हि समञ्जसा वृत्तिरस्य शब्दस्य। स एष उत्सृज्यैव स्वमर्थमाकृतानुविधायित्वमात्रमेव सामान्यमाश्रित्य प्रवृत्तो यो हि कश्चित् कस्मैचिदाकूतं लक्षयित्वा प्रागेव प्रार्थनात् ददाति, स उदार इत्युच्यते।

एवमेव निस्त्रिंशः। त्रिभिः प्रदेशैर्द्वाभ्यां धाराभ्यामग्रेण च निशितः श्यतीति निस्त्रिंशः खड्गः, मुख्यग्रहणात्, तत्र ह्यस्य शब्दस्य समञ्जसा वृत्तिः। स एष छेदनसमानरूपं क्रौर्य्यसामान्यमाश्रित्य सर्वत्रैव प्रवृत्तः। यो हि लोके क्रूरो भवति, स निस्त्रिंश इत्युच्यते। एवमेते क्रियागुणसामान्यमात्रेण वर्त्तन्ते।

यथैते, एवमन्येऽप्यभ्यूहितव्याः। अभ्यूह्य च एवमर्थसामान्येन निर्वक्तव्याः। स्वरवर्णसामान्ये तु प्रचुराण्येवोदाहरणानि। सर्व एव हि नैगमाः शब्दा जहादयः स्वरवर्णसामान्यमात्रेणैव निरुच्यन्ते॥

न च निरुक्ते कारकहारकलावकादिशब्दा व्युत्पाद्यन्ते, सुवोधैव हि तेषां व्युत्पत्तिः प्रसिद्धैव च व्याकरणे इति। य एव दुर्बोधाः परोक्षातिपरोक्षवृत्तयः वित्मक्रुदरोदारवैतसपर्वशब्दादयः, त एव हि व्युत्पाद्य निरुच्यन्ते। तेषु हि विशेषेणार्थवत्ता निरुक्तस्य। तान्येव अर्थसामान्येन वा शब्दसामान्येन वा निर्ब्रूयात्, न तेषु संस्कारमाद्रियेतेति।

आह,—किं कारणम्? इति। उच्यते,—"विषयवत्यो हि वृत्तयो भवन्ति"। हिरयं हेत्वर्थे। तस्माद्विषयवत्यो बहुसंशयचत्यः शब्दानामर्थेषु वृत्तयो भवन्ति, नानाभावेनार्थेषु अवस्थिता प्रवृत्तिरिति एवं स्यान्नैवं स्यादिति विचारयन्तः सन्तः प्रतिपक्षसम्मोहाच्छेरत इवास्मिन्निति विषयः संशय इति।

अत्र,—केचिद्र्थसामान्येन क्वचिद्वर्त्तन्ते शब्दाः, केचित् स्वरसामान्येन, केचिद्वर्णसामान्येन, यत एवम्, अतो विभक्तीरपि यथार्थमेव सन्नमयेत् विपरिणमयेत्, पूर्वोत्तरपदप्रकरणाविरोधेन। किं कारणम्? तासामपि हि व्यत्ययो भवत्येव,—सुपां स्थाने सुपो भवन्ति इति हि वैयाकरणा पठन्ति। दर्शयिष्यति चायमपि विभक्तिविपरिणामम्। तद्यथा,—"हृत्सु शोको ०—०हृद्यानि शोकैः (द्वै० का० ६, ३, १२)" —इत्येवमादि।

अथुनैवमुक्त्वा विषयवत्यो भवन्तीति, अर्थवशेन व्याकरणेऽपि शब्दविपरिणामो भवतीत्येवं दर्शयति,—"प्रत्तमवत्तमिति धात्वादी एव शिष्येते" इत्येवमादि। 'डु दाञ् दाने (जु० उ०)' तस्य प्रपूर्वस्य प्रत्तमिति। अत्र दकार आकारश्च धातुः, परो निष्ठाप्रत्ययस्तकारः, तत्रैवं सति 'दो दद् घोः (पा० ७, ४, ४६)' —इति वर्त्तमाने 'अच्च उपसर्गात् तः (पा० ७, ४, ४७)'—इति आकारस्य तकारो भवति, 'झरो झरि सवर्णे (पा० ८, ४, ६५)' —इति धात्वन्तस्य तकारस्य लोपे कृते, 'खरि च (पा० ८, ४, ५५)'—इति तकारस्य चर्त्वे कृते 'परः सन्निकर्षः संहिता (पा० २, ४, १६)'—इति धातुतकारः प्रत्ययतकारेण संयोगतामपैति

'हलोऽनन्तराः संयोगः (पा० १, १, ७)'—इति, ततः प्रादिसमासे कृते 'प्रत्तम्'—इति भवति। एवमेव 'दो अवखण्डने (दि० प०)'—इत्यस्यावपूर्वस्य 'अवत्तम्'—इति। अत्रापि दकार ओकारश्च धातुः, परो निष्ठातकारः। अत्र 'आदे च उपदेशोऽशिति (पा० ६, १, ४५)'—इत्योकारस्याकारे कृते तभावलोपचर्त्वपरगमनप्रादिसमासाः पूर्ववदेव। एवमनयोर्द्धात्वोरादी एव शिष्येते। यथानयोरेवमन्येषामपि दृष्ट्वा यथासम्भवमनुविधेयम्॥ १॥

अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति स्तः सन्तीत्यथाप्यन्तलोपो भवति गत्वा गतमित्यथाप्युपधालोपो भवति जग्मतुर्जग्मुरित्यथाप्युपधाविकारो भवति राजा दण्डीत्यथापि वर्णलोपो भवति तत्त्वा यामित्यथापि द्विवर्णलोपस्तूच इत्यथाप्यादिविपर्य्ययो भवति ज्योतिर्घनो विन्दुर्वाट्य इत्यथाप्याद्यन्तविपर्य्ययो भवति स्तोका रज्जुः सिकतास्तर्किंत्यथाप्यन्तव्यापत्तिर्भवति॥ २॥

"अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति, स्तः सन्तीति"। 'अस् भुवि (अदा० प०)'—इत्यस्य निवृत्तिस्थानेषु गुणवृद्धि-निवृत्तिस्थानेषु क्ङिति वर्त्तमाने 'असोरल्लोपः (पा० ६, ४, १११)'—इत्यादिलोपो भवति। योऽयं धात्वादावकार एवं लुप्यते,

तस्मिन् लुप्ते प्रयोगः स्तः सन्तीति। एवमन्येषामपि दृष्ट्वानुविधेयं यथासम्भवम्॥

"अथाप्यन्तलोपो भवति, गत्वा गतमिति"। अत्र, गमेः (भू० प०) क्त्वाप्रत्यये, निष्ठाप्रत्यये च परतोऽनुनासिकलोपो भवति, अनुदात्तोपदेशेत्यधिकृत्य कृङितीति। एवमन्येष्वपि द्रष्टव्यमनुविधेयं च यथासम्भवम्॥

"अथाप्युपधालोपो भवति, जग्मतुर्जग्मुरिति"। अत्र, गमेः (भू० प०) अलोपः। 'अलोन्त्यात् पूर्व उपधा (पा० १, १, ६५)'—इत्युपधा सञ्ज्ञा, तस्य 'गमहनजनखनघसां (पा० ६, ४, ६८)'—इत्युपधालोपः। एवमन्येषामपि द्रष्टव्यमनुविधेयं यथासम्भवम्॥

"अथाप्युपधाविकारो भवति, राजा दण्डीति"। राजन्, दण्डिन् इति स्थिते 'नोपधायाः (पा० ६, ४, ७,)'—'सर्वनामस्थाने चासम्बुद्धौ (पा० ६, ४, ८)'—इति दीर्घत्वम्,—दण्डिन्नित्यत्रापि 'इन्हन्पूषार्य्यम्णां शौ (पा० ६, ४, १२)'—'सौ च (पा० ६, ४, १३)'—इति दीर्घत्वम्, 'नलोपः प्रातिपदिकान्तस्य (पा० ८, २, ७)'—इत्युभयोरपि नकारलोपे कृते राजा दण्डीति। एवमुपधाविकारो भवति॥

"अथापि वर्णलोपो भवति, तत्त्वा यामीति"। अत्र चकारलोपः। याचामीत्येवमेतद् द्रष्टव्यम्। अयञ्च छान्दस एव। अत एव च छान्दसत्वादेवमेव याच्ञाकर्मण्यं पठितः "यामि" (३५४ पृ०) "मन्महे" (३५४ पृ०) इति। भाषायां याचे इति भवति॥

"तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः॥" (ऋ० सं० १. २. १५. १)। किञ्च "तत्त्वा यामि सुवीर्यं तद् ब्रह्म पूर्वचित्तये। येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ॥" (ऋ० सं० ५. ७. २६. ४)।—इत्यनया त्रिष्टुभा उपाहृतः शुनःशेपो वरुणं तुष्टाव। आज्याहुतिरनया साग्निकेषु क्रतुषु समिष्टयजुष उत्तरकालं हूयते। चतुर्मास्येषु च वरुणप्रघासेषु वारुणस्य हविषो याज्यैषा। हे 'वरुण!' 'तत्' अहं 'त्वा' वरुणं 'यामि' याचे इत्यर्थः। किम्? यत् ममाभिप्रेतम्। कथं पुनर्याचे? 'ब्रह्मणा' ऋग्यजुःसामाख्येन 'वन्दमानः' स्तुवन्। किञ्च यदेव त्वं मया याच्यसे, 'तत्' एव अयमपि 'यजमानः' 'हविर्भिः' संस्कृतैः साम्नाय्यादिभिः 'आशास्ते'। तावावां भवन्तमेकमेवार्थं याचावहे, स्तुतिभिर्हविर्भिश्च। स त्वम् 'अहेळमानः' अक्रुध्यन्। सर्वो हि याच्यमानः क्रुध्यतीत्यत एवमुच्यते॥ हे 'वरुण!' 'बोधि' बुध्यस्व। बुद्ध्वा चैतमावयोरभिप्रेतार्थं कुरु। उरुशंसेत्येकं पदं सम्बोधनञ्च। हे 'उरुशंस' बहुस्तुत्य! वरुण! 'मा' 'नः' अस्माकं याचमानानाम् 'आयुः' 'प्रमोषीः'। कुरु नोऽभिप्रायसिद्धिमित्यभिप्रायः॥

"अथापि द्विवर्णलोपस्तृच इति". अत्र ऋवर्णरेफयोर्लोपः। स लुप्यते ऋवर्णेन साकम्॥

"अथाप्यादिविपर्ययो भवति. ज्योतिर्घनो विन्दुर्वाट्य इति"। 'द्युत दीप्तौ (भू० आ०)' तस्यादिव्यापत्त्या ज्योतिः। 'हन हिंसा-

गत्योः (अदा० प०) तस्य घन इति। 'भिदिर विदारणे (रु० उ०)' तस्य विन्दुः। 'भट भृतौ (भू० प०)'। तस्य वाट्यः॥

"अथाप्याद्यन्तविपर्य्ययो भवति, स्तोका रज्जुः सिकतास्तर्किति"। 'श्रुतिर् क्षरणे (भू० प०)' तस्याद्यन्तविपर्य्ययेण स्तोकाः। 'सृज विसर्गे (दि० आ, तु० प०)' तस्य रज्जुः। 'कस विकसने (भू० प०)' तस्य सिकता। 'कृती छेदने (तु० प०), तस्य तर्कु॥

"अथाप्यन्तव्यापत्तिर्भवति" ॥ २ ॥

ओघो मेघो नाधो गाधो वधूर्मध्वित्यथापि वर्णोपजन आस्थद्वारो भरूजेति तद्यत्र स्वरादनन्तरान्तस्थान्तर्द्धातु भवति तद्विप्रकृतीनां स्थानमिति प्रदिशन्ति तत्र सिद्धायामनुपपद्यमानायामितरयोपपिपादयिषेत्तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति तद्यथैतद्भूतिर्मृदुः पृथुः पृपतः कुणारुमित्यथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते दमूनाः क्षेत्रसाधा इत्यथापि नैगमेभ्यो भाषिका उष्णं घृतमित्यथापि प्रकृतय एवैकेषु भाष्यन्ते विकृतय एकेषु ॥ ३ ॥

"ओघो मेघो नाधो गाधो वधूर्मध्विति"। 'वह प्रापणे (भू० प०)' तस्यान्तव्यापत्त्या ओघः। 'मिह सेचने (भू० प०)' तस्य मेवः। 'णह बन्धने (दि० उ०)' तस्य नाधः। 'गाहू

विलोड़ने (भू० आ०)' तस्य गाधः। 'वह प्रापणे (भू० उ०)' तस्य वधूः। 'मद तृप्तौ (चु० आ०)' तस्य मधु॥

"अथापि वर्णोपजनः, आस्थद्वारो भरूजेति"। 'अस क्षेपणे (दि० प०)' तस्य आस्थत्। 'वृङ् सम्भक्तौ (क्र्या० आ०)' तस्य वारः। 'भ्रस्ज पाके (तु० उ०)' तस्य भरूजः॥

एवं व्याकरणेऽपि लक्षणप्रधाने सति अर्थवशेन लोपागमौ विपरिणामश्च शब्दानां दृष्टः, किमुत निरुक्ते यदर्थप्रधानमेव। तस्मात् साधूक्तम्,—"अथानन्विते ऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद् वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्ण-सामान्यान्निर्ब्रूयात्" "विभक्तीः" अपि "यथार्थं" "सन्नमयेत्" इति॥ एवमयमादिमध्यान्तलोप आदिमध्यान्तविकारो वर्णलोपो द्विवर्णलोप आदिविपर्य्यय आद्यन्तविपर्य्ययो वर्णोपजनश्छन्दसि भाषायाञ्च द्रष्टव्याः, दृष्ट्वा च यथासम्भवमनुविधेयम्॥

अतः परं सम्प्रसारणचिन्ता वर्त्तिष्यते, तदर्थमिदमारभ्यते—"तद्यत्र स्वरादनन्तरान्तस्थान्तर्धातु भवति, तद्विप्रकृतीनां स्थान-मिति प्रदिशन्ति"। सम्प्रसार्य्यप्रकृतयश्चासम्प्रसार्य्यप्रकृतयश्चो-भयप्रकृतयश्च धातवः। तत्रैवं सत्युभयप्रकृतिषु शास्त्राविषयगतं यद्वक्तव्यं 'तत्' इदमुच्यत इति पर्य्युपयुक्तस्तच्छब्दः।

आह,—इदमेव तावदुच्यतामुभयप्रकृतीनां किंलक्षणम्? इति। उच्यते,—'यत्र' यस्मिन् धातौ 'स्वरात्' अकारादेः 'अनन्तरा' अनन्तर्हिता अन्येन व्यञ्जनेन परा वा पूर्वा वा 'अन्तस्था' यरलवा-नामन्यतमो वर्णः 'अन्तर्धातु' धातुमध्ये भवति। किं तत्र?

'तत्' एतदेव लक्षणं धातुरूपं हि 'द्विप्रकृतीनां' द्विस्वभावानां शब्दानां 'स्थानम्' आश्रयः 'इति' एवमाचार्य्याः 'प्रदिशन्ति' प्रविभागेनोपदिशन्ति।

तद्यथा,—'यज देवपूजासङ्गतिकरणदानेषु (भू० उ०)'—इति। अत्र द्वे शब्दप्रकृती भवतः। सम्प्रसारणपक्षे तावत्,—इष्टवान्, इष्टः, इष्ट्वा, एताः शब्दप्रकृतयो भवन्ति। असम्प्रसारणपक्षे पुनः,—यष्ट्वा, यष्टुं, यष्टव्यमित्येताः॥

"तत्र सिद्धायामनुपपद्यमानायामितरयोपपिपादयिषेत्"। 'तत्र' एवं सति एकप्रकारेण 'सिद्धायाम्' अर्थसिद्धौ 'अनुपपद्यमानायाम्', 'इतरथा' 'उपपिपादयिषेत्' उपपादयितुमिच्छेत्। अर्थे द्वयोः सम्प्रसारणासम्प्रसारणप्रकृत्योर्यथैवोपपद्यतेऽर्थतस्तथैवोपपादयेत्। अथवोभयथाप्यनुपपद्यमानेऽर्थे स्वयमुत्पाद्य निर्द्धार्य्य यथा यथोपपद्येतार्थः तथा तथोपपादयेत्, अपि तल्लक्षणशास्त्रविहितेनार्थसाधनोपायेन, अर्थस्य प्रधानत्वात्।

"तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति"। 'तत्रापि' एतस्मिन्नपि सम्प्रसारणलक्षणे सति "एके" धातवः 'अल्पनिष्पत्तयो भवन्ति' अल्पेषु शब्दरूपेषु सम्प्रसारणप्रकृतिरभिनिष्पद्यते तदप्युपेक्षितव्यम्॥

"तद्यथैतदूतिर्मृदुः पृथुः पृषतः कुणारुमिति"। 'तद्यथा' एतदुदाहरणजातम्,—ऊतिः, मृदुः, पृथुः, पृषतः, कुणारुम् इति। अवतेर्गत्यर्थस्य (भू० प०) क्तिप्रत्यये परतः 'च्छ्वोः शूडनुनासिके च (६, ४, २० १९)"—इति वर्त्तमाने 'ज्वरत्वश्रिव्यवि-

मवामुपधायाश्च (६, ४, २०)"—इत्यूङ्भावः क्रियते, तत ऊतिरिति भवति। 'म्रद मर्दने (भू० आ०)', तस्य मृदुः, रैफः सम्प्रसार्य्यमाण ऋकारो भवति? एवमेव 'प्रथ प्रख्याने (भू० आ०)', तस्य पृथुः। 'पुष दाहे (भू० प०)', तस्य पृषतः। 'कणः शब्दार्थः (भू० प०)', कुणारुः॥

एवमपि सम्प्रसार्य्यासम्प्रसार्य्यविशेषपरिज्ञेयशब्दान् निर्ब्रुवता पुंसा "अथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते"। 'अथा'पि' इदमपरमुपेक्षितव्यमागमशब्दान् निर्ब्रुवता। आह,—किम्? इति। उच्यते,—'भाषिकेभ्यो धातुभ्यः' भाषायां ये प्रायेण प्रसिद्धप्रयोगास्ते भाषिकास्तेभ्यः। 'नैगमाः' छन्दोविषयाः। 'कृतः' कृत्प्रत्ययान्ताः शब्दाः। भाष्यन्ते' विक्रियन्ते निरुच्यन्त इत्यर्थः॥

तद्यथा,—"दमूनाः क्षेत्रसाधा इति"। 'दम उपशमे (दि० प०)' "तस्य, भाषायां दाम्यति अनड्वान्, दमयति अनड्वाहम् दान्तः अनड्वान् इत्येवमादयः प्रयोगा भवन्ति, छन्दसि पुनः दमूना अग्निरुच्यते स भाषासामान्ये न केनचिन्निर्वक्तव्यं दममना इत्येवमादिना। एवमेव साध्यतेर्भाषाप्रायोवृत्तेः साधा इति। "मित्रं न क्षेत्रसाधसम् (ऋ० सं० ३, २, ४)"—इत्येवमादयो मित्रमिव क्षेत्रसाधस मित्येवमादिना प्रकारेण निर्वक्तव्याः॥

"अथापि नैगमेभ्यो भाषिकाः"। निगमे छन्दसि ये प्रायो वृत्त्या प्रसिद्धाः, तेभ्यः सामान्यं गृहीत्वा 'भाषिकाः, कृत्प्रत्ययान्ता भाष्यन्ते विक्रियन्ते।

तद्यथा,—"उष्णं घृतमिति"। 'उष दाहे (भू० प०)' एष प्रायेण छन्दसि प्रसिद्धः,—"प्रत्युष्ट रक्षः प्रत्युष्टा अरातयः (य० वा० सं० १, ७)"—इत्येवमादि। भाषायां पुनरुष्णमिति श्रूयते। स एषो नैगमशब्दसामान्येन निर्वक्तव्यः। एवमेव 'घृ क्षरणदीप्त्योः (भू० प०)' तस्य, छन्दसि "आ त्वा जिघर्मि (य० वा० सं० ११, २३)"—इत्यादिषु सिद्धः प्रयोगः, भाषायां पुनर्घृतमिति श्रूयते। स एवं जिघर्त्तेरेव छान्दसस्य सामान्ये निर्वक्तव्यः। एवं भाषाविषयेभ्यश्छन्दोविषया निर्वक्तव्याः, छन्दोविषयेभ्यश्च भाषाविषयाः॥

अथापीदमपरमुपेक्षितव्यमनेन शब्दान् निर्ब्रुवता। आह,—किम्? इति। उच्यते,—"अथापि प्रकृतय एवैकेषु भाष्यन्ते, विकृतय एकेषु"। एकेषु प्रदेशेषु प्रकृतय एव धातुशब्दानां भाष्यन्ते, विकृतय एकेषु। धातोराख्यातपदभावेन यः प्रयोगः, सा प्रकृतिः। नामीभूतस्य तस्यैव यः प्रयोगः, सा विकृतिः॥३॥

शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते कम्बोजाः कम्बलभोजाः कमनीयभोजा वा कम्बलः कमनीयो भवति विकारमस्यार्य्येषु भाषन्ते शव इति दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येष्वेवमेकपदानि निर्ब्रूयादथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयाद् दण्ड्यः पुरुषो दण्डमर्हतीति वा दण्डेन सम्पद्यत इति

चा दण्डो ददतेर्द्धारयतिकर्मणोऽक्रूरो ददते मणिमित्यभि-भाषन्ते दमनादित्यौपमन्यवो दण्डमस्याकर्षतेति गर्हा-याम् ॥ ४ ॥

"शवतिर्गतिकर्मा" गत्यर्थो धातुः "कम्बोजेष्वेव भाष्यते" म्लेच्छेषु प्रकृत्या प्रयुज्यते, आख्यातपदभावेन। शवति गच्छ-तीत्यर्थः। उदाहरणविशेषप्रसक्तः कम्बोजशब्दो निरुच्यते,—"कम्बोजाः कम्बलभोजाः" ते हि प्रायेण कम्बलानुपभुजन्ते, हिमप्रायत्वात्तस्य देशस्य। "कमनीयभोजा वा" कमनीयानि प्रार्थनीयानि चैते हि द्रव्याणि उपभुजन्ते प्रचुररत्नो हि स देश इति। कम्बलशब्दं विग्रहप्रसक्तं निर्ब्रवीति,—"कम्बलः कमनीयो भवति" प्रार्थनीयो हि स शीतात्त्रैर्भवति। "विकारमस्यार्य्येषु भाषन्ते शव इति" आर्य्येषु जनपदेषु अस्यैव शवतेर्विकारं भाषन्ते, मृतकनामधेयभूतमेवं प्रयुञ्जते, कथम्? शव इति। एवमेकेष्वाख्या-तस्थ एव प्रयुज्यते, नामीभूतएकेषु,—इत्येतत् प्रकृतित्वं विकारत्वं च। अथवा चेतनावत्येकेषु गमनक्रियायोगिनि द्रव्ये प्रयुज्यते, एकेषु पुनश्चेतनारहित एव,—इत्येतत् प्रकृतित्वं विकारत्वञ्च ॥

द्वितीयमुदाहरणम्।—"दातिर्लवनार्थे प्राच्येषु"। दाति-र्धातुराख्यातस्थो लवनार्थे प्राच्येषु जनपदेषु प्रयुज्यते। तद्यथा, —व्रीहीन् दाति, यवान् दाति। अयमेव नामीभूतः "उदीच्येषु" जनपदेषु प्रयुज्यते 'दात्रम्" इति। दीयते अनेनेति दात्रम्, लूयत इत्यर्थः ॥

"एवमेकपदानि निर्ब्रूयात्" अनेन प्रकारेण एकपदानि निर्ब्रूयात्,—भाषानिगमव्यवस्थया, देशभाषाप्रसिद्धिविभागेन च ॥

आह,—एवं तावदतद्धितयुक्तेषु पदेष असमासयुक्तेषु च निर्वचनम्। अथ पुनर्यानि तद्धितयुक्तानि समासयुक्तानि च पदानि तानि कथं निर्वक्तव्यानि?—तानि किं तद्धितयुक्तेषु पदेषु पूर्वपदार्थो निर्वक्तव्यः उत तद्धितार्थसमासयुक्तेष्वपि? किं पदार्थः पूर्वम् उत समासार्थो वा पूर्वम्? इति। उच्यते,—"अथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात्"। अथशब्दो विशेषाधिकारार्थः। 'तद्धिताः (पा० ४, १, ७६)'—इत्यधिकृत्य ये प्रत्यया विहिताः, ते तद्धिताः, 'समर्थः पदविधिः (पा० २, १, १)'—इत्यधिकृत्य ये विहिताः, ते समासाः। तेषूभयेष्वपि तद्धितसमासेषु अविशेषेण एकपर्वसु चानेकपर्वसु च एकपदेषु चानेकपदेषु च। तद्यथा,—दण्ड्यः इत्येकपदस्तद्धितः, वार्ष्यायणिरित्यनेकपदः। अनेकानि ह्येष पदानि स्वात्मन्यन्तर्णीय प्रवर्त्तते। तद्यथा,—वृषस्यापत्यं वार्ष्यः, वार्ष्यस्यापत्यं वार्ष्यायणः, तस्यापि वार्ष्यायणिरिति। एवं समासेष्वप्येकपदेषु चैवं निर्ब्रूयात्। यथा वक्ष्यामः,—एकशेषः एकपदः समासः। 'सरूपाणामेकशेष एकविभक्तौ (पा० १, २, ६४)'—इति। तद्यथा,—पुरुषश्च पुरुषश्च पुरुषौ, पुरुषश्च पुरुषश्च पुरुषश्च पुरुषाः इत्येवम्।

"द्विगुर्द्वन्द्वोऽव्ययीभावः कर्मधारय एव च।
षष्ठस्तत्पुरुषः स्मृतः ॥"

एतेऽनेकपदाः समासाः। पाणिनेः सूत्रम्,—'सङ्ख्यापूर्वो द्विगुः (पा० २, १, ५२)'। पञ्चमूली, पञ्चरथी, दशरथी इत्येवमादि। सूत्रम्,—'चार्थे द्वन्द्वः (पा० २, १, २९)'। स च पुनर्विभाषयैकवद् भवति। तद्यथा,—प्लक्षन्यग्रोधौ, अहिनकुलम्, भीमार्जुनवासुदेवाः इत्यादि। उपसर्गनिपातपूर्वकोऽव्ययीभावः। तद्यथा,—उपमणिकम्, अनुसमुद्रम्, व्यभ्रम्, इत्येवमादि। तुल्यविभक्तिलिङ्ग्योरुभयोः पदयोः समानाधिकरणः कर्मधारयः। तद्यथा,—कृष्णमृगः, रक्तोऽश्वः, श्वेतपताका इत्येवमादि। एतेष्वेकपर्वसु चानेकपर्वसु च तद्धितसमासेषु पूर्वं पूर्वमेव निर्ब्रूयादपरमपरमेव प्रविभज्य विगृह्येत्यर्थः। पूर्वं तद्धितार्थं निर्ब्रूयात्, पश्चात् पदार्थम्। समासेष्वपि,—पूर्वं समासार्थम्, पश्चात् पदार्थम्॥

तदेतत् उदाहरणैरेव दर्शयति, तद्यथा,—"दण्ड्यः पुरुषो दण्डमर्हतीति वा दण्डेन सम्पद्यत इति वा"। दण्ड्य इत्येष तद्धितः, पुरुषशब्दविशेषणम्। पूर्वं तावत् तद्धितार्थं निर्वक्षति,—कस्मिंश्चिदपराधे दण्डमर्हतीति दण्ड्यः दण्डेन वा कार्षापणादिना यः सम्पद्यते संयुज्यते स दण्ड्यः।

अधुना पदार्थनिर्वचनम्,—"दण्डो ददतेर्द्धारयतिकर्मणः"। ददतेः धारयत्यर्थे वर्त्तमानस्य, धार्य्यते ह्येषोऽपराधेषु राजभिः।

आह,—दृष्टः पुनः क्वचित् ददतेः धारयत्यर्थे? इति। उच्यते, —दृष्टो वेदे लोके च। वेदे तावत्,—विश्वेदेवाः पुष्करे त्वा ददन्त (ऋ० सं० ५, ३, २४, १)"—इति। "अक्रूरो ददते मणि-

मित्यभिभाषन्ते" । तथा लोके,—'अक्रूरो ददते मणिम्' । अक्रूरो नाम राजा वृष्ण्यन्धकाधिपतिः, स ददते मणिं स्यमन्तकनामानं शिरसा । लोकेऽप्येवं ददतिर्द्धारणार्थे भाष्यते ।

"दमनादित्यौपमन्यवः" आचार्य्यो मन्यते । तेन हि अदान्तो दम्यते राजभिः, तेनादान्तान् दमयेदित्युक्तम्, लोके हि प्रसिद्धो यः कश्चिददान्तो भवति तमधिकृत्य वक्तारो भवन्ति ।—"दण्डमस्याकर्षत हे सभासदः ! तेन सम्पद्यतामयं ततो दान्तो भविष्यति.—इत्येवमयं गर्हायां दृष्टः । एवं दमनाद् दण्डः, इत्यौपमन्यव आचार्य्यो मन्यते ॥ ४ ॥

कक्ष्या रज्जुरश्वस्य कक्षं सेवते कक्षो गाहतेः कृस इति नामकरणः ख्यातेर्वानर्थको ऽभ्यासः किमस्मिन् ख्यानमिति कपतेर्वा तत्सामान्यान्मनुष्यकक्षो बाहुमूलसामान्यदश्वस्य राज्ञः पुरुषो राजपुरुषो राजा राजतेः पुरुषः पुरिषादः पुरिशयः पूरयतेर्वा पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्य । यस्मात् परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायो ऽस्ति किञ्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् । इत्यपि निगमो भवति ॥ ५ ॥

तद्धितस्यैव द्वितीयमुदाहरणम्,—"कक्ष्या रज्जुरश्वस्य"—इति । कक्ष्या इत्येष तद्धितः । आह,—कः पुनरियं कक्ष्या ? इति । उच्यते,—या अश्वस्य सन्नाहरज्जुः सा कक्ष्येत्युच्यते ।

एवं कक्ष्याशब्दस्य तत्त्वमुक्त्वाधुना तद्धितार्थं ब्रवीति,—"कक्षं सेवते"। सा हि कक्षं सेवते, कक्षसंयुक्ता भवति। कक्षे भवा वा कक्ष्या।

अधुना पदार्थं निर्वक्ति,—"कक्षो गाहतेः" विलोडनार्थस्य (भू० आ०)। कक्षयोरेव हि विलोडयति, द्रष्टव्यम्। अत्र पुनः,—"क्स इति नामकरणः। सर्वमन्यदाद्यन्तविपर्य्ययादि यथोपदर्शितं यथासम्भवं योज्यं तत्र तत्र। "ख्यातेर्वानर्थकोऽभ्यासः" ककारः, कख्यः सन् कक्ष इत्युच्यते। "अर्थवानेव वा ककारः। कख्यः सन् कक्ष इत्युच्यते। अर्थवानेव वा ककारः। कथम्? "किमस्मिन् ख्यानमिति"। एवं किमस्मिन् ख्यापनीयमस्ति? न किञ्चिदपि, अदर्शनीयत्वात्, गूहनीयोऽयमित्यर्थः। स एष एवं कृत्वा किं ख्यः सन् कक्ष इत्युच्यते? "कपतेर्वा (भू० प०)" नित्यकालं ह्यसौ खेदशीलत्वात् कण्डूं ददाति, ततो नखैः कप्यते यत', तस्मात् कषणक्रियायोगात् कक्ष इत्युच्यते। "तत्सामान्यान्मनुष्यकक्षः"। स्त्रीकक्षस्य सामान्यात् मनुष्यकक्षोऽपि कक्ष इत्युच्यते? "बाहुमूलसामान्यादश्वस्य"। अश्वस्यापि यो बाहुमूलप्रदेशः, स कक्ष इत्युच्यते। तं सेवत इति कक्ष्या।

अन्ये तु ब्रुवते,—"पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात्" पूर्वं पदं पूर्वमेव प्रविभज्य निर्ब्रूयात्, अपरं पदमपरमेवेति। एतस्मिन् अर्थे कल्प्यमाने पदानामेव पौर्वापर्य्ये निर्वचने तद्धितसमासयोस्त्वनियमः पूर्वं पश्चाद्वेति। पूर्व एव त्वर्थः साधीयान्॥ उक्तं तद्धितनिर्वचनलक्षणं सोदाहरणम्॥

अधुना समासोदाहरणमुच्यते,—"राज्ञः पुरुषो राजपुरुषः"। राज इत्युक्ते सर्वं स्वं गम्यते, षष्ठीसामर्थ्यात्। तथा पुरुष इत्युक्ते सर्वः स्वामी गम्यते, निर्देशसामर्थ्यात्। अथेदानीं राजपुरुष इत्युक्ते, राजा पुरुषमन्येभ्यः स्वामिभ्यो विनिवर्त्त्य स्वात्मनि संयुनक्ति, पुरुषोऽपि राजानमन्येभ्यः स्त्रेभ्यो विनिवर्त्त्य स्वात्मना संयुनक्ति। तावुभावप्यन्योन्यविमिश्रपदार्थकौ मिथः संसृष्टपदार्थौ समस्येते। अथेदानीं राजपुरुष आनीयतामित्युक्त न राजानमानयन्ति, नापि पुरुषमात्रम्, नाप्युभयम्, किन्तु राजस्वामिकं पुरुषमानयन्ति। एवं समासार्थः। कुतः पुनरेतत् राजस्वामिकमिति? प्रधानोपसर्जने हि सहभूते विवक्षितमेकमर्थं ब्रूतः॥

"राजा राजतेः"। राजतेर्दीप्त्यर्थस्य (भू० उ०)। दीप्यते ह्यसौ पञ्चानां लोकपालानां वपुषा "पुरुषः पुरिषादः"। पूः शरीरं बुद्धिर्वा, तयोरसौ विषयोपलब्ध्यर्थं सीदतीति पुरिषादः, पुरुषः। "पुरिशयः" अथवा तयोरसौ शेते विशेषेणास्ते इति पुरिशयः सन् पुरुष इत्युच्यते। "पूरयतेर्वा" पूर्णमनेन पुरुषेण सर्वगतत्वात् जगदिति पुरुषः। "पूरयत्यन्तरित्यन्तरपुरुषममिप्रेत्य"। अन्तरित्यन्तरपुरुषाभिप्रायेणैवमुच्यते प्रासङ्गिकम्।

निगमश्च भवति,—"यस्मात् परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति किञ्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्"। यस्मात् परमपरं वा न किञ्चिदस्ति, यस्माच्च न किञ्चिदप्यणीयो नापि ज्यायोऽन्यदस्ति, स

एव सर्वमित्यभिप्रायः। वृक्ष इव स्तब्धो नित्यसङ्कोचविकाश-धर्मादिविद्योतनवति स्वात्मनि सर्वविभागेन तिष्ठति यः तेन पुरुषेणेदं पूर्णं सर्वं जगदिति ॥ ५ ॥

विश्वकद्राकर्षीं वीति चकद्र इति श्वगतौ भाष्यते द्रातीति गतिकुत्सना कद्रातीति द्रातिकुत्सना चकद्राति कद्रातीति सतोऽनर्थकोऽभ्यासस्तदस्मिन्नस्तीति विश्वकद्रः कल्याणवर्णरूपः कल्याणवर्णस्येवास्य रूपं कल्याणं कमनीयं भवति वर्णो वृणोते रूपं रोचतेरेवं तद्धितसमासान्निर्ब्रूयान्नै-कपदानि निर्ब्रूयान्नावैयाकरणाय नानुपसन्नायानिदंविदे वा नित्यं ह्यविज्ञातुर्विज्ञानेऽस्त्र्योपसन्नाय तु निर्ब्रूयाद्यो वालं विज्ञातुं स्यान्मेधाविने तपस्विने वा ॥ ६ ॥

समासस्यैव द्वितीयमुदाहरणम्,—"विश्वकद्राकर्षः" इति। विश्वकद्रमाकर्षतीति विश्वकद्राकर्षः।

आह,—कः पुनरयं विश्वकद्र इति? "वीति चकद्र इति श्वगतौ भाष्यते"। वीति चकद्र इति शब्दद्वयं श्वगतौ भाष्यते श्वभिः साकं यो गच्छति मनुष्यः, तस्मिन् भाष्यते। "द्रातीति गतिकुत्सना"। अत्र पुनः द्रातीति गतिकुत्सना। 'द्रा कुत्सायाम् (अदा० प०)'—इत्युक्तम्, इदं हि तस्य कुत्सितगतित्वम्, यदस्य श्वभिः सह राति। "कद्रातीति द्रातिकुत्सना"। इदानीं कद्रातीति द्रातिकुत्सना कुत्सितकुत्सनेत्यर्थः। इदमपरं कुत्सिततरम्, यद्

गत्वा श्वभिः सह निहन्ति, तस्मात् कद्रातीति कुत्सितकुत्सनेत्यु-पपद्यते। "चकद्राति कद्रातीति सतोऽनर्थकोऽभ्यासः"। अथेदानीं च इत्येष कद्रातीति एवमेव सतः शब्दस्वरूपस्यानर्थक एवा-भ्यासः। यदेवोक्तं भवति कद्रातीति तदेव चकद्रातीति। "तदस्मिन्नस्तीति विश्वकद्रः"। तदस्मिन् द्वितयमप्यस्ति,—कुगतित्वं, कुत्सिततरगतित्वञ्च, नानाप्रकारमिति विश्वकद्रः श्वजीवनः पुरुषः। तमपराधे कस्मिंश्चित् वर्त्तमानमन्योन्य आकर्षति, स विश्वकद्राकर्षः॥

अन्ये तु ब्रुवते,—श्वैव विश्वकद्रः, अस्यैव हि स्वभावत एव हिंसत्वाद् गतिः कुत्सिता, स च पुनः पादविकलः, अतस्तस्य कुत्सितकुत्सितत्वम्। वीत्युभयोरर्थयोर्मत्वर्थः, तमाकर्षति यः पुरुषः, स विश्वकद्राकर्षः॥

अधुना रूपसमासं दर्शयति,—"कल्याणवर्णरूपः, कल्याण-वर्णस्येवास्य रूपम्"। कल्याणवर्णं सुवर्णम्, तस्येव यस्य रूपं स कल्याणवर्णरूपः। अग्निरन्यो वा कश्चित्।

कल्याणादिशब्दान् विग्रहप्रसक्तान् निर्ब्रूयादिति,—"कल्याणं कमनीयं भवति"। प्रार्थ्यते तत् सर्वैरेव। "वर्णो वृणोतेः"। आवृणोति हि स आश्रयम्। "रूपं रोचतेः"। तद्धि रोचते, तद्धि रोचिष्णुः भवति।

"एवं तद्धितसमासान्निर्ब्रूयात्"—इत्युपसंहारवचनम्॥

"नैकपदानि निर्ब्रूयात्" प्रकरणोपपदविहितानि सन्ति तानि, केवलान्येव परेणाभिद्रोहबुद्ध्या पृच्छमानानि न निर्ब्रूयात्, न

निर्वक्तव्यानीति। किङ्कारणम्? तेषां प्रकरणादुपपदाद्वा अर्थः शक्यतेऽवधारयितुम्, सोऽसौ प्रकरणानभिज्ञोऽन्यथैव निर्ब्रूयात्, ततश्च प्रत्यवायेन योगादपहारश्च स्यात्। तद्यथा,—'जहा' —इत्येकं पदं प्रकरणोपपदरहितम्, न विज्ञायते, किं हन्ते' (अदा० प०) उत "ओ हाक् त्यागे (जु० प०)'—इत्यस्य धातोः स्यात्? इति। तत् पुनरेतत्—"मा न एकस्मिन्नागसि मा द्वयोरुत त्रिषु। वधीर्मा शूर भूरिषु॥ (ऋ० सं० ६, ३, ४८, ४)"—इत्येतस्यामृचि यदेतन्मा वधीरिति पदम्, एतस्माद् गम्यते हन्तेः स्यादिति। किङ्कारणम्? विज्ञातप्रकरणोपपदस्य हि समञ्जसं ह्यर्थकरणं न्याय्यमित्येवमनवगतसंस्काराणामेकपदानां प्रकरणादर्थावधारणमुपपदाद्वा शक्यते कर्त्तुम्। अत इदमुक्तम्,—"नैकपदानि निर्ब्रूयात्"—इति॥

नावैयाकरणायेति। उक्तं निर्वचनलक्षणम्, अधुना यस्मै निर्वक्तव्योऽयमुक्तनिर्वचनलक्षणः समाम्नायः, तस्य लक्षणं वक्तव्यमिति तदर्थमिदमारभ्यते,—"नावैयाकरणाय"। यस्तावद-वैयाकरणः, तस्मै न निर्वक्तव्योऽयं समाम्नायो न ह्यसावलक्षणज्ञत्वात् व्युत्पाद्य निरुच्यमानमेतद् बुध्येत, ततो व्यर्थ एव श्रमः स्यादिति।

किञ्च "नानुपसन्नाय"। किमिति महदद्भुतमनेन कृतं यत् व्याकरणमधीतमिति,—एतावता गौरवेण वैयाकरणायापि न निर्ब्रूयात्, धर्मो हि सर्वथैवापरित्याज्यः, तस्माद् वैयाकरणायापि सम्यगुपसन्नाय परां शिष्यवृत्तिमास्थितायैव निर्ब्रूयात्।

नैवमेव, किञ्च "अनिदंविदे वा",। अवैयाकरणोऽपि जडः कश्चिदसमर्थ एव वेदितुं स्यात्, बहु वेदितव्यमत्रास्ति, देवतादि किञ्चित् तस्मै वैयाकरणायापि इदं वेदितुमसमर्थाय अनिदंविदे नैव निर्ब्रूयात्। अथवा। इदमित्यात्मपर्य्यायवाचि। इदंविदे आत्मविदे, योगिने। स ह्यात्मज्ञानविधूतकल्मषोऽल्पेनैव यत्नेन वोद्धुं सूक्ष्मानर्थान् शक्त इति इदंविदे निर्ब्रूयात्। अथवा। यत्किञ्चिच्छास्त्रमिदमिति निर्दिश्यते। येन ह्यन्यत् किञ्चिदश्रुतं पूर्वशास्त्रम्, तस्मै न निर्ब्रूयादिदं निरुक्तशास्त्रमनास्फालितहृदयकुड्मलाय॥

किङ्कारणम्? "नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया"। यो हि न विजानाति नावबुध्यते, तस्याविज्ञातुर्नित्यकालमेव विज्ञाने असूया, स ह्यनवबुध्यमान आत्मीयं दोषमाचार्य्य एवावसृजति,—स्वयमेव तावदयं न बुध्यते किमस्मान् बोधयिष्यतीति। एतस्मात् कारणादश्रुतपूर्वान्यशास्त्राय अखिन्नमनसे नेदं निर्ब्रूयात्॥

"उपसन्नाय तु निर्ब्रूयात्, यो वालं विज्ञातुं स्यान्मेधाविने तपस्विने वा"। य एव तु मेधावी स्यात्,—अन्यजन्मान्तरानुभावितया प्रज्ञया युक्तः, यो वा तपस्वी, कामं ताभ्यामवैयाकरणाभ्यामपि निर्ब्रूयादेव,—न हि तयोरसाध्यं किञ्चिदस्ति, —तपसा हि स्वयमपि वेदार्थः प्रादुर्भवेदेव। पूर्वेषामृषीणां मेधाव्यपि च स्वयमुत्प्रेक्षितुं शक्नुयात्, किमुतोच्यमानमवबोद्धुम्। यो वान्यः कश्चिदलं पर्य्याप्तो विज्ञातुमेतच्छास्त्रं भवेत्, दृढग्राही स्थिरबुद्धिः, तस्मै निर्ब्रूयादेव सर्वथा। अनुपसन्नाय नैव निर्ब्रूयात्, यद्यपि तपस्वी, मेधावी, दृढग्राही वा।

उक्तं हि,—"यश्चान्यायेन निर्ब्रूयाद्यश्चान्यायेन पृच्छति। तयोरन्यतरो मृत्युं विद्वेषं वाधिगच्छति" ॥ ६ ॥

विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि। असूयकायानृजवेऽयताय न मा ब्रूया वीर्य्यवती तथा स्याम् ॥ य आतृणत्त्यवितथेन कर्णावदुःखं कुर्वन्नमृतं सम्प्रयच्छन्। तं मन्येत पितरं मातरञ्च तस्मै न द्रुह्येत् कतमच्चनाह ॥ अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा। यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत् ॥ यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्य्योपपन्नम्। यस्ते न द्रुह्येत् कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्निति निधिः शेवधिरिति ॥ ७ ॥

इति द्वितीयाध्यायस्य प्रथमः पादः ॥ २, १ ॥

अथाप्येतमर्थमधिकृत्योदाहरन्ति,—"विद्या ह वै ब्राह्मणमाजगाम"—इति। विद्या किल कामरूपिणी भूत्वा विद्याधिदेवता संयतात्मानं विदितवेदाङ्गवेदार्थं ब्राह्मणं प्रति कञ्चिदाजगाम। तमेत्य प्रह्वीभूतोवाच,—किम्? इति। "गोपाय मा" रक्ष माम्। ततः "ते" "अहं" गुप्ता सती "शेवधि" भविष्यामि, सुखनिधान-

मित्यर्थः। आह,—कुतः पुनस्त्वां रक्षामि ? "असूयकायानृज-वेऽयताय"। असूयकः, परापवादशीलः। अनृजुः, यस्य मनो-वाग्देहेषु असमाः प्रवृत्तयः। अयतः, विप्रकीर्णेन्द्रियः,—यत्किञ्चन कायाशुचिः। एवंलक्षणाय "न मा ब्रूयाः" त्वम्। किन्तथा भविष्यति ? "वीर्य्यवती तथा" अहं तव "स्यां" भवेय-मित्यर्थः॥

"य आतृणत्त्यवितथेन कर्णौ"। अधुना शिष्योपदेशमाह, —य आतृणत्ति, आभिनत्ति, अपिहिताविव सन्तौ कर्णौ विवृ-णोति। अवितथेन, सत्येन ब्रह्मणा। कथम्पुनरातृणत्ति ? "अदुःखं कुर्वन्नमृतं सम्प्रयच्छन्"। यो हि किञ्चिदातृणत्ति, स दुःखयति, अयं पुनः सुखमातृणत्ति। किञ्च अमृतत्वप्राप्तिहेतु-ज्ञानं सम्प्रयच्छन्। य आतृणत्ति तस्मै किम् ? इति। उच्यते, —"तं मन्येत पितरं मातरञ्च" नेतरौ मातापितरावित्यभिप्रायः। उक्तञ्च,—"उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता। ब्रह्म-जन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् (म० सं० २, १४६)"। "तस्मै" मातापितृभूताय गुरवे "न द्रुह्येत्"। "कतमच्चनाह"— कदाचिदपि आपद्यपि कष्टायामित्यभिप्रायः॥

अधुना इतरान् दुष्टशिष्यान् अभिशपन्ती विद्या इदमाह,— "अध्यापिता ये गुरुं नाद्रियन्ते" इत्यादि। अध्यापिताः सन्तो ये गुरुं प्रति नाद्रियन्ते, नादरं कुर्वन्ति। के पुनस्ते ? इति। उच्यते,—"विप्राः" मेधाविनः सन्तो गृहीतविद्याः। कथम्पुनर्नाद्रियन्ते ? "वाचा मनसा कर्मणा वा"। आह,—

किं तेषाम् ? इति । उच्यते,—"यथैव" "ते" तस्य "गुरोः" "न" "भोजनीयाः" न भोज्याः, न भोजनार्हाः, "तथैव" "तान्" "तत्" "श्रुतम्" अपि "न भुनक्ति" न पालयन्ति, श्रुतफलेन न संयुनक्तीत्यर्थः ॥

अधुना यस्मै वक्तव्या, तस्य लक्षणं ब्रवीति,—"यमेव" "विद्याः" जानीयाः तम् । "शुचिमप्रमत्तम्" यमनियमेषु । "मेधाविनं" च "ब्रह्मचर्य्येणोपपन्नम्" । किञ्च, यः ते न "द्रुह्येत्" न द्रोहमुपगच्छेत् । "कतमच्चनाह" कदाचिदपि सर्वास्वप्यापत्सु "तस्मै मा ब्रूयाः" "त्वम्" "निधिपाय" गोप्त्रे "ब्रह्मन् !" ॥

आह,—"निधिः" कः ? इति । उच्यते,—"शेवधिः" इति । शेव इति सुखनाम, सुखनिधानमित्यर्थः । ब्रह्मलोको हि निधिः सुखानां कृत्स्नस्य जगतो यज्ञद्वारेण, अत इदमुक्तं "निधिः शेवधिरिति" ॥७॥

इति जम्बूमार्गाश्रमवासिन आचार्य्यभगवद्दुर्गस्य कृतौ निरुक्तव्याख्यायां [द्वितीयाध्यायस्य] सप्तमस्याध्यायस्य प्रथमः पादः ॥१॥

द्वितीयः पादः

अथातोऽनुक्रमिष्यामो गौरिति पृथिव्या नामधेयं यद् दूरङ्गता भवति यच्चास्याम्भूतानि गच्छन्ति गातेर्वौकारो नामकरणोऽथापि पशुनामेह भवत्येतस्मादेवाथाप्यस्यान्ताद्धितेन कृत्स्नवन्निगमा भवन्ति गोभिः श्रीणीत मत्सरमिति पयसो मत्सरः सोमो मन्दतेस्तृप्तिकर्मणो मत्सर इति लोभनामाभिमत्त एनेन धनं भवति पयः पिबतेर्वा प्यायतेर्वा क्षीरं क्षरतेर्घसेर्वैरोनामकरण उशीरमिति यथा। अंशुं दुहन्तो अध्यासते गवीत्यधिषवणचर्मणोऽशुः शमष्टमात्रो भवत्यननाय शम्भवतीति वा चर्म चरतेर्वोच्चृत्तं भवतीति वाथापि चर्म च श्लेष्मा च। गोभिः सन्नद्धो असि वीलयस्वेति रथस्तुतावथापि स्नाव च श्लेष्मा च। गोभिः सन्नद्धा पतति प्रसूतेतीषुस्तुतौ। ज्यापि गौरुच्यते गव्या चेत्ताद्धितमथ चेन्न गव्या गमयतीषूनिति ॥ १ ॥

"समाम्नायः समाम्नातः, स व्याख्यातव्यः"—इति प्रतिज्ञातम् (२ पृ०)। सा च पुनरियं व्याख्या सामान्या वैशेषिकी

च। तत्र सामान्या,—सर्वेषां नाम्नामिदं सामान्यलक्षणम्, इदमाख्यातानाम्, इदमुपसर्गाणाम् इदं निपातानाम् इति। सोऽयमनयैव प्रकारया व्याख्यया कृत्स्नः समाम्नायो व्याख्यातः, तदनुषक्तान्येव च शास्त्रारम्भप्रयोजनान्युक्तानि, आगमश्च परिशोधितः, वेदो वेदाङ्गव्यूहश्च सप्रयोजन उक्तः, निघण्टुसमाम्नायविरचना चोपदिष्टा प्रकरणत्रयविभागेन, निर्वचनलक्षणश्चानेकप्रपञ्चमुक्तम्।

अथेदानीं विशेषव्याख्यया प्रतिपदमयं समाम्नायो व्याख्यातव्यः, तदधिकारार्थोऽयम् "अथ" शब्दः। "अतः" शब्दः क्रमे हेतौ वा। सामान्यव्याख्यानादनन्तरं विशेषव्याख्यानमेवावसरप्राप्तमित्येवं क्रमे। अथवा हेतौ। यस्मात् सामान्यतः समाम्नायो व्याख्यातः अत इदानीं विशेषतः "अनुक्रमिष्यामः" आनुपूर्व्येण क्रमिष्यामो वर्णयिष्यामः, व्याख्यायेति शेषः।

आह,—किंलक्षणा पुनरसौ व्याख्या? इति। उच्यते,—तत्त्वपर्य्यायभेदसङ्ख्यासन्दिग्धसन्दिग्धोदाहरणतन्निर्वचनविभागेन यदाख्यानं सा व्याख्या निघण्टुप्रकरणे। तद्यथा। तत्त्वम्, —"गौरिति पृथिव्या नामधेयम्"—इत्येवमादि। पर्य्यायवचनम्, प्रसिद्धेनाभिधानेनाप्रसिद्धस्यार्थस्य ख्यापनम्, तद्यथा,—पृथिव्या नामधेयं गौरिति। भेदो व्युत्पत्तिरिति समानार्थः, तद्यथा,—"यद्दूरं गता भवति"—इत्येवमादि। सङ्ख्या, तद्यथा,—"पृथिवीनामधेयान्येकविंशतिः"। सन्दिग्धम्,—"तत्र निर्ऋतिर्निरमणाद्वृच्छतेः कृच्छ्रापत्तिरितरा सा पृथिव्या सन्दिह्यते"

इत्येवमादि। सन्दिग्धोदाहरणम्,—"य ईं चकार"—इत्येवमादि। तन्निर्वचनम्,—"बहुप्रजाः कृच्छ्रमापद्यत इति परिव्राजकाः"—इत्येवमादि। एवम्प्रकारया व्याख्यया इदं नैघण्टुकप्रकरणं व्याख्यास्यते॥

"गौरिति पृथिव्या नामधेयम्"। आह,—यस्मात् कारणात् द्रव्ये शब्दोनिवेशो नैरुक्तानां, तदुच्यतां कारणं, केन कारणेन गोशब्दः पृथिव्यां सन्निविष्टः? इति। उच्यते,—"यत्" तस्मात् इयं "दूरम्" अध्वानं प्रति "गता भवति" न ह्यस्या अन्त उपलभ्यते, "यत्" यस्मात् "च" "अस्यां भूतानि गच्छन्ति" आधारभूतायाम्। एवं कर्तृकारकमधिकरणं वा योज्यम्। "गातेर्वा" 'गाङ्गातौ (भू० आ०)'—इत्यस्य धातोः "ओकारो नामकरणः" प्रत्ययः।

"अथापि" गौरित्येतत् "पशुनाम" "भवति" "इह" एव कारकद्वये, "एतस्मादेव" धातुद्वयाद् गमेर्गातेर्वा। "अथाप्यस्याम्" एव पशुगवि "तद्धितेन" प्रयोगेनाकृत्स्नायां सत्यां "कृत्स्नवच्चिगमा भवन्ति"। तद्यथा,—"गोभिः श्रीणीत मत्सरमिति" गोरेकदेशस्य "पयसः" कृत्स्नवत् प्रयोगः। तदेतच्छब्दबुद्धिव्युत्पादनार्थमनेकप्रकारं शब्दवृत्तिविषयोपप्रदर्शनं क्रियते, कथन्नामोपप्रदर्शितशब्दवृत्तिविषयोऽसंमुह्य न मन्त्रार्थान् निब्रूयादिति॥

आधावत, सुहस्त्यः शुक्रा गृभ्णीत मन्थिना। गोभिः श्रीणीत मत्सरम्॥" (ऋ० सं० ७, १, ३, ४)। इमां गायत्री-

मयास्य आङ्गिरसोऽपश्यन्। ग्रावस्तुतौ विनियुक्ता। हे अध्वर्यवः! एभिः ग्रावभिः संस्कृत एष सोमः। ते यूयं हे 'सुहस्त्यः' सुवर्णेनालङ्कृतहस्ताः किम्? 'आधावत'। 'गृभ्णीत' गृह्णीत, एतौ 'शुक्रा' 'मन्थिना ग्रहावनतिक्रान्तकालम्। किञ्च, 'गोभिः' गोभ्योऽभिनिष्पन्नेन रसेन 'श्रीणीत' एनम् 'मत्सरं' मादयितारं सोमं मैत्रावरुणग्रहाणामुपगतम्। "श्रृतशीतेन तृतीयसवने वा पूतभृत्याशिरेण ततोऽनतिक्रान्तकालं जुह्वत" एवं मन्त्रविधानादशक्यत्वाच्च गोभिः श्रपणस्य गव्येन पयसेति गम्यते॥

"मत्सरः सोमो मन्दतेस्तृप्तिकर्मणः" तृप्यन्ति हि अनेन देवताः॥

शब्दसामान्यप्रसङ्गप्रसक्तमुच्यते,—"मत्सर इति लोभनामाभिमत्त एनेन धनं भवति"। तेन ह्याविष्टो धनाभिमुख्येन मत्तो भवति॥

पर्य्यायाख्यानप्रसक्तं निरुच्यते,—"पयः पिवतेर्वा पानार्थस्य (अदा० प०), पीयते हि तत्। "प्यायतेर्वा" वृद्ध्यर्थस्य (भू० आ०), तेन हि वर्द्धन्ते प्राणिनः॥

प्रसक्तानुप्रसक्तं निरुच्यते,—"क्षीरं क्षरतेः" श्र्योतनार्थस्य (भू० आ०), श्र्योतते हि तदूधसः। "घसेर्वैरो नामकरणः" अदेर्घस आदेशः क्रियते, अतस्तेनैव सिद्धरूपेण निर्दिश्यते। धात्वन्तरमिति वा केचित्। ज्ञापकञ्च ददाति,—"उशीरमिति यथा"। 'वश कान्तौ (अदा० प०)' तस्य कृतसम्प्र-

सारणस्य ईरप्रत्ययेनोशीरमिति भवति। तद्धि सौगन्ध्याक्रान्तं भवति॥

"अंशुं दुहन्तो अध्यासते गवीत्यधिषवणचर्मणः"। कृत्नवद्भिधायकः। "ते सोमादो हरी इन्द्रस्य निंसतेऽंशुं दुहन्तो अध्यासते गवि। तेमिर्दुग्धं पपिवान् सोम्यं मध्विन्द्रो वर्द्धते प्रथते वृषायते॥" (ऋ० सं० ८, ४, ३०, ४)। एषा जगती। अर्बुदो नाम काद्रवेय ऋषिः तस्यार्षम्। आवस्तुतौ विनियुक्ता। 'ते' एते आचार्याः 'सोमादः' सोमभक्षयितारः यदाभिषवकर्मणि प्रवर्त्तन्ते, अथ तदा 'हरी इन्द्रस्य' अश्वौ, यज्ञागमनार्थमेतेषां शब्दमुपश्रुत्य संस्कृतं सोमं मन्वानौ, रथे योगमिच्छन्तौ, आत्मना ऋजीषं भक्षयिष्यन्तौ, इन्द्रञ्च सोमं पाययिष्यन्तौ, स्वयमेव 'निंसते, नीचैर्नामेते युक्तौ आवाहे,—इन्द्र! गच्छ यज्ञायतनं संस्कृतः सोमः' इति। तद्वैव च ऋत्विजोऽपि त्वरमाणा इन्द्रो—स्थानकालमस्यर्णमन्वानाः 'अंशुं' सोमांशम् अभिषुत्य 'दुहन्तः' प्रपूरयन्तः। 'गवि अधि' गोरुपरि गोरवयवे अधिषवणचर्मणि। एतत् कर्मकुर्वाणा इदं प्रतीक्षमाणा 'आसते'। अथ स 'इन्द्रः' एत्य 'तेमिः दुग्धम्' ऋत्विग्भिः प्रचारितं 'पपिवान्' पीतवान् 'सोम्यं मधु' सोममयं तेन तृप्तः। ततोऽनन्तर 'वर्द्धते' वीर्य्येण। अथ तेन च शरीरेण 'प्रथते' विस्तीर्य्यते, विस्तीर्णश्च स्वेन वीर्य्येण मेघं विदार्य्य 'वृषायते' वर्षं प्रवर्त्तयते। तदिदं सर्वमपि वर्षादि जगदनुग्राहकमैन्द्रं कर्म। अभिषवद्वारेण, सोमाभिषवो ग्रावाधीनमित्येवं ग्रावस्तुतिः॥

निगमप्रसक्तं निरुच्यते,—"अंशुः शमष्टमात्रो भवति"। व्याप्तमात्रो हि यजमानेन तस्यैव शं भवति, सुखी भवति। इष्टसोमो ह्यनृणोऽहमिति विगतमनोदुःखो भवति "अननाय शं भवतीति वा"। अननाय जीवनाय शं सर्वेषां भूतानां भवति, सुखो भवतीति वा। यज्ञो हि वर्षे प्रवृत्तिहेतुस्ततश्च सर्वभूतानि सुखं जीवन्ति॥

व्याख्यानप्रसक्तं निरुच्यते,—चर्म चरतेर्वा" चरितं हि तत्सर्वस्मिन् शरीरे गतमित्यर्थः। "उच्चृतं भवतीति वा" उच्चृत्तम् उत्कर्त्तितं शरीरादिति।

"अथापि चर्म च श्लेष्मा च" गोशब्देनोच्यत इति शेषः। "गोभिः सन्नद्धो असि वीलयस्वेति स्तुतौ" "वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः। गोभिः सन्नद्धो असि वीलयस्वास्थाता ते जयतु जेत्वानि॥" (ऋ० सं० ४, ७, ३५, १)। (य० वा० सं० २९, ५२)। (अथ० सं० ६, १२५, १)। स हि चर्मणावनद्धो भवति, श्लेष्मणा च तस्यारादयः संश्लेषिता भवति॥

"अथापि स्नाव च श्लेष्मा च" गोशब्देनोच्यत इति शेषः। "गोभिः सन्नद्धा पतति प्रसूतेतीषुस्तुतौ" सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता। यत्रा नरः सञ्च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन्॥ (ऋ० सं० ५, १, २१, १)। (य० वा० सं० २९, ४७)। सा हि स्नाव्ना वेष्टिता भवति, श्लेष्मणा च संश्लेषिता॥

"ज्यापि गौरुच्यते" । सा पुनः "चेत्" यदि "गव्या तद्धितम्" अभिधानम्, "अथ" पुनः "न चेत् गव्या, गमयतीषू-निति" गौरन्यद्द्रव्यमपि,—॥ १ ॥

वृक्षे वृक्षे नियतामीमयद्गौस्ततो वयः प्रपतान् पूरुषादः । वृक्षे वृक्षे धनुषि धनुषि वृक्षो व्रश्चनान्नियतामीमयद्गौः शब्दं करोति मीमयतिः शब्दकर्मा ततो वयः प्रपतन्ति पुरुषानदनाय विरिति शकुनिनाम वेतेर्गतिकर्मणोऽथापीपुनामेह भवत्येतस्मादेवादित्योऽपि गौरुच्यते । उतादः परुषि गावि । पर्ववति भास्वतीत्यौपमन्यवोऽथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते तदेतेनोपेक्षितव्यमादित्यतोऽस्य दीप्तिर्भवतीति । सुपुमूणः सूर्य्य रश्मिश्चन्द्रमा गन्धव इत्यपि निगमो भवति । सोऽपि गौरुच्यते । अत्राहगोरमन्वतेति तदुपरिष्टाद् व्याख्यास्यामः सर्वेऽपि रश्मयो गाव उच्यन्ते ॥ २ ॥

"वृक्षे वृक्षे नियतामीमयद् गौस्ततो वयः प्रपतान् पूरुषादः । अथेदं विश्वं भुवनं भयात इन्द्राय सुन्वदृषये च शिक्षत् ॥" (ऋ० सं० ७, ७, १६, २) । वसुक्रस्येन्द्रपुत्रस्येदमार्षम् । त्रिष्टुवैन्द्री । महाव्रते मरुत्वतीये शस्यते । इन्द्रो भगवानैश्वर्य्ययोगात् संग्रामेष्वनेकवाहुर्भूत्वानेकानि धनूंष्यादत्ते, तानि मन्त्रकृद्दृष्ट्वैवमाह,

—"वृक्षे वृक्षे" वृक्षावयवे "धनुषि धनुषि" यावन्तोन्द्रेण गृहीतानि धनूंषि, तेषु सर्वेषु, प्रत्येकं "नियता" निबद्धा, "गौः" गव्या, गमयित्री वा शराणाम्, इन्द्रवाह्याकृष्टा "अमीमयत्" मीमयति "शब्दं करोति"। जात्यभिप्रायेणैकवचनम्। "ततः" शब्दकरणानन्तरमेव "प्रपतान्" "प्रपतन्ति" "वयः" अथवा 'ततः' तनो धनुषः 'वयः' पक्ष्यवयवपत्रसम्बन्धात् इषवोऽपि 'वयः' पक्षिणः। अथवा "वेतेर्गतिकर्मणः। साक्षादेव इषवः 'वयः' न गुणवृत्त्या। ते 'प्रपतान्' प्रपतन्ति 'पुरुषानदनाय" भक्षणाय, ते हि शत्रूणां प्राणान् भक्षयन्ति। अथ अयमेवमतिप्रभाव इन्द्र इति ज्ञात्वा 'विश्वं' सर्वं 'भुवनं' भूतजातं यावत् किञ्चिदविकृतं कर्मणि 'भयते' बिभेति। अथ विस्मयत् किं करोति? 'इन्द्राय' इन्द्रार्थं 'सुन्वत्' अभिषवम् उचिते काले कुर्वत् 'ऋषये च' ऋत्विजे 'शिक्षत्' दक्षिणां ददते। इन्द्रोन्मुखमादरवदास्ते। सर्वमन्यत् परिहाय य एवम्प्रभाव इन्द्रः, तं वयमभिप्रेतार्थसिद्धये स्तुमः॥

निगमप्रसक्तं निराह,—"वृक्षो व्रश्चनात्" इति। स हि वृश्च्यते छिद्यते इन्धनार्थम्।

अत्र व्याख्याने गतार्थत्वात् न शेषो विव्रियते। एवं तावदेकदेशो कृत्स्नवदभिधानं भवतीति प्रदर्शितम्॥

अथेदानीमन्येष्वर्थान्तरेषु गोशब्दोऽभिप्रसृतो बहुप्वित्येतत् प्रसङ्गतो दर्शयति। एतद्ध्यैकपदिके वक्तव्यमिह तु गोशब्दप्रसक्तमुच्यते,—"आदित्योऽपिगौरुच्यते" एतस्मिन् मन्त्रे।—

उताद:, पऱुषे गवि सूरश्चक्रं हिरण्ययम्। न्यैरयद्रथीतम:" (ऋ० सं० ४, ८, २२, ३)। भरद्वाजस्येयमार्षम्। गायत्री। पौष्णी। पूषा पुनरादित्यो नैरुक्तानां दृष्ट्या, अन्यत्र इयं वै पूषेति भूमिरुच्यते। "उताद:" 'उत' अपि, अथ इति छन्दसि समानार्थाः। अपि त्वक्रमीरपः, अपि रसानादत्ते, अपि तमांस्यपहन्ति। 'अद:' अमुष्मिन् आदित्यमण्डले 'परुषि' पर्वभिस्तद्वति। अथवा भास्वति, भासा तद्वतीति। अहोरात्रादि पर्व तद्वतीत्यौपमन्यवः। 'गवि' गमनशीले मुहूर्त्तमप्यनवस्थायिनि 'सूरः' सूर्य्यः अवस्थितः। पूषा आदित्यमण्डलान्तः पुरुषः, तदेव पर्ववत् भास्वद् वा। 'चक्रं' चकनं क्रमणं वा गमनशीलं मण्डलं 'हिरण्ययं' तेजोमयं चक्रं चक्राकृतिः। 'न्यैरयत्' नियतगमनवृत्तिना मार्गेण नित्यकालमीरयति। उदयास्तमयमध्यन्दिनकालोपलक्षणार्थम्। अथवा अमुष्मिन् मण्डलेऽवस्थितः, पर्ववति मण्डलान्तःपुरुषः सूर्य्यो भगवान्। 'चक्रं' लवक्षणनिमेषत्रुटिमुहूर्त्ताहोरात्रार्द्धमासमासर्त्वयनसंवत्सरलक्षणं कालं चक्रं सर्वभूतहारि 'हिरण्ययं' हिरण्मयं सर्वभूतविनाशस्थितिहेतुं 'न्यैरयत्' नित्यमीरयति। कीदृशः पुनः स सूर्य्याय ईरयति? रथीतमः अन्येऽपि रथिनः सन्ति, अयन्तु मुहूर्त्तमप्यनवस्थितरथ इत्यतो रथीतमः। स एवङ्गुणयुक्तः पूषा, तं वयमभिप्रेतार्थसिद्धये स्तुमः॥

"अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते"। एको रश्मिरादित्यस्य सुषुम्णो नाम, चन्द्रमसं प्रत्यवस्थितो दीप्यते। "तदे-

तेन" मन्त्रार्थविदा मन्त्रानुपेत्य "ईक्षितव्यम्" द्रष्टव्यम्। सेयमस्य चन्द्रमसो "दीप्तिः" ज्योत्स्ना इत्ययम् "आदित्यतः" आदित्यस्य अनुग्रहादेव "अस्य भवतीति"। अस्मदुपरि यच्चन्द्रमसो मण्डलं तत्तेजः सम्बन्धाद् दीप्तिमद् भवति, ततः सर्वा दिशः प्रकाशयति।

यथा चैतदेवं तथा "सुषुम्णः सूर्य्यरश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमो भवति" राष्ट्रभृत्सु। "सुषुम्णः सूर्य्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम। स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा॥" (य० वा० सं० १८, ४०)। अप्ययमप्यन्ये बहव इत्यपिशब्दः। 'सुषुम्णः' सुष्ठु सुख इत्यर्थः। सर्वाणि भूतानि नित्यमसौ ह्लादयति। कोऽसौ ? इति। 'सूर्य्यरश्मिः' सूर्य्यान्निःसृत्य चन्द्रमसं प्रति गतः 'चन्द्रमाः'। 'गन्धर्वः' सति सुषुम्णगमने गोशब्दवाच्यता। 'तस्य' गन्धर्वस्य सतः चन्द्रो धारयिता गन्धर्वसहितस्य प्रतिष्ठा। 'स न इदं' सोऽस्माकमिदं 'ब्रह्म क्षत्रं च' 'पातु' रक्षतु। किञ्च 'तस्मै' सुषुम्णाय सूर्य्यरश्मये 'स्वाहा' सु शोभनमिदमाभिमुख्येनाह, हविराज्यलक्षणमस्तु। स चेदं 'वाट्' वेतु पिवत्वित्यर्थः॥

"सोऽपि" सुषुम्णो रश्मिरेक एव "गौः"—इति "उच्यते" यथासौ गौस्तथेदमुदाहरणम्,—"अत्राह गोरमन्वतेति"। "तत्" पुनरेतत् "उपरिष्टात्" ऐकपदिके "व्याख्यास्यामः"।

"सर्वेऽपि रश्मयो गाव उच्यन्ते"। यथैतदेव तथेयमृगुदाहरणम्, ॥२॥

ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः। अत्राह तदुरुगायस्य वृष्णः परम पदमवभाति भूरि। तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो बहुशृङ्गा भूरीति बहुनो नामधेयं प्रभवतीति सतः शृङ्गं श्रयतेर्वा शृणातेर्वा शमातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वायासोऽयनास्तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्द्ध्यस्थमवभाति भूरि पादः पद्यतेस्तन्निधानात्पदं पशुपादप्रकृतिः प्रभागपादः प्रभागपादसामान्यादितराणि पदान्येवमन्येषामपि सत्त्वानां सन्देहा विद्यन्ते तानि चेत् समानकर्माणि समाननिर्वचनानि नानाकर्माणि चेन्नानानिर्वचनानि यथार्थं निर्वक्तव्यानीतीमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रान्तानि तत्र निर्ऋतिर्निरमणाद्दच्छतेः कृच्छ्रापत्तिरितरा सा पृथिव्या सन्दिह्यते तयोर्विभागस्तस्या एषा भवति ॥ २ ॥

"ता वां वास्तूनि"—इति। दीर्घतमस आर्षम्। वैष्णवी। त्रिष्टुप्। यूपावघाने विनियुक्ता, सोमातिरेकशस्त्रे च। वामिति दम्पतीत्यभिप्रेत्य द्विर्वचनम्। 'ता' "तानि" "वां" युवाभ्यामर्थाय "वास्तूनि" निवासस्थानानि 'उश्मसि' "कामयामहे"।

'गमध्यौ' "गमनाय" "यत्र" येषु स्थानेषु। किम्? "गावः" रश्मयः। 'भूरिशृङ्गाः' "बहुशृङ्गाः" बहुदीप्तयः 'अयासः' अयनाः मुहूर्त्तमप्यनवस्थायिनः। किञ्च, 'अत्राह' तेषु स्थानेषु 'तत्' पदम् 'उरुगायस्य' उरुगमनस्य महागतेः भगवतो 'वृष्णः' "विष्णोः" 'परमं पदम्' आदित्यमण्डलं स्थानम्। स्थाने हि पदसञ्ज्ञा, पदस्थ इति लोकेऽपि वक्तारो भवन्ति। 'अवभाति' अर्वागिदं सर्वं कृत्वा भाति दीप्यते भूरि बह्वित्यर्थः। इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"भूरीति" एतत् "बहुनो नामधेयम्"। "प्रभवति" हि तद् बहुधापि दीयमानम्। "शृङ्गं श्रयतेः" तद्धि याश्रितं भवति शिरसि। "शृणातेर्वा" हिंसार्थस्य। तेन हि हिनस्ति। "शिरसो निर्गतमिति वा" शृङ्गं परमेऽर्द्धे स्थितं परार्द्ध्यस्थम्। अथवा परमर्द्ध्यां युक्ते स्थाने स्थितं परार्द्ध्यस्थम्। "पादः पद्यतेः" गत्यर्थस्य। पद्यते हि तेन। "तन्निधानात् पदम्" यदुत्पद्यते, तत् सरूपमेव पांसौ अन्यत्र वा तत् पदमित्युच्यते पशोर्मनुष्यस्य वा। "पशुवादप्रकृतिः" चतुर्भागसामान्यात्। "प्रभागपादः" दीनारादिपादः। "प्रभागपादसामान्यादितराणि पदानि" ग्रन्थपदानि क्षेत्रपदानि वा। विभागो हि तेष्वपि समान एव॥ प्रसक्तानुप्रसक्तमिदमुक्तम्॥

अधुनोपसंहरति,—"एवमन्येषामपि सत्त्वानां सन्देहा विद्यन्ते" न केवलं गोशब्दे पदशब्दे वा। तेषु हि त्वेतदौत्सर्गिकं निर्वचनं लक्षणं द्रष्टव्यम्,—"तानि" "चेत् समानकर्माणि" यदि

सामान्यक्रियया युक्तानि, ततः "समाननिर्वचनानि" एव कर्त्तव्यानि। अथ पुनः "नानाकर्माणि" ततो "नानानिर्वचनानि"। एवं "यथार्थं निर्वक्तव्यानीति" ॥

अधुनैवमुक्त्वोदाहरणैरेव तत्र सन्देहपदान्यनुक्रम्य मन्त्रेष्वेव दर्शयन्नाह,—"इमान्येकर्विंशतिः पृथिवीनामधेयान्यनुक्रान्तानि"। 'तत्र निर्ऋतिर्निरमणाद्वृच्छतेः कृच्छ्रापत्तिरितरा"। लोके हीदं सर्वभूतजातमन्तर्भूतं यदभिधानानि यदाश्रयक्रियावचनाश्च शब्दा निघण्टव उच्यन्ते, तेषाञ्च पृथिवी प्रथमा, तस्मात् तत आरम्भः। एकविंशतिरिति संख्या (२१)। पृथिवीनामधेयानि, स्वार्थे धेयप्रत्ययः, नामैव नामधेयम्। अनुक्रान्तानि, आनुपूर्व्वेण पठितानीत्यर्थः। एकविंशतिर्यान्यनुक्रान्तानि, एभ्योऽन्यान्यपि यानि कानिचित् स्युः, तान्युपलभ्य निर्वक्तव्यानि। तद्यथा,—कु इत्येतदसमाम्नातम् पृथिव्या नामधेयम्। उक्तं हि,—"नाग्निचिन्नरकं याति न सत्पुत्रो न कुप्रदः'—इति। तत्रैतस्मिन्नेकर्विंशके गणे "निर्ऋतिः" इत्येतदभिधानम्। "निरमणात्" निविष्टानि रमन्तेऽस्यां भूतानीति निर्ऋतिः पृथिवी। रमेर्धातोः (भू० आ०)। "ऋच्छतेः (तु० प०)" "इतरा" "कृच्छ्रापत्तिः" दुःखसञ्ज्ञका, निर्ऋतिः पाप्मा। "सा" पुनरियं समाननामधेयत्वात् समानश्रुतित्वात् "पृथिव्या सन्दिह्यते"। "तयोः" समाननामधेयत्वेऽपि सति एष कर्मकृतो "विभागः"—एका निविष्टानां भूतानां रमयित्री, एका पुनः कुच्छ्रमापादयित्री। एवं नानाकर्माण्यभिधानानि निर्वक्तव्यानि ॥

"तस्याः" कृच्छ्रापत्तेः पृथिव्या अपि "एषा" निर्वाच्चिका ऋग् "भवति"—॥ ३ ॥

य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् । स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमाविवेश । बहुप्रजाः कृच्छ्रमापद्यत इति परिव्राजका वर्षकर्मेति नैरुक्ता त ईं चकारेति करोतिकिरती सन्दिग्धौ वर्षकर्मणा न सो अस्य वेद मध्यमः स एवास्य वेद मध्यमो यो ददर्शादित्योपहितं स मातुर्योनौ मातान्तरिक्षं निर्मीयन्तेऽस्मिन् भूतानि योनिरन्तरिक्षं महानवयवः परिवीतो वायुनायमपीतरो योनिरेतस्मादेव परियुतो भवति बहुप्रजा भूमिमापद्यते वर्षकर्मणा शाकपूणिः सङ्कल्पयाञ्चक्रे सर्वा देवता जानामीति तस्मै देवतोभयलिङ्गा प्रादुर्बभूव तान्न जज्ञे तां पप्रच्छ विविदिषाणि त्वेति सास्मा एतामृचमादिदेशैषा मद्रेवतेति ॥ ४ ॥

"य ईं चकार"—इति । दीर्घतमस आर्षम् । त्रिष्टुप् । महाव्रते वैश्वदेवे शस्त्रे शस्यते । "अयं स शिङ्क्ते"—इतीयमपि तथैव समानार्षविनियोगा । जगती । द्वे अप्येते अश्ववामीये । कश्चित् "बहुप्रजाः" बह्वपत्यो दरिद्रः पुरुषः स दुष्पोषत्वादपत्यानां व्यापन्नत्वात् "कृच्छ्रं" दुखम् "आपद्यते" । सा या तस्य

कृच्छ्र पत्तिः, सैवैतस्यामृचि निर्ऋतिशब्देनोच्यते "इति" एव "परिव्राजकाः" परिव्राजकानामस्यामृचि सञ्ज्ञेयोऽर्थः ॥

स एप विस्तरेण प्रदर्श्यते ।—'यः' 'चकार' करोति 'ईं' गर्भं 'न सः' 'अस्य' गर्भस्य तत्त्वं 'वेद' केवलं त्वसौ कामार्त्तः पुत्रार्थी वा करोत्येव गर्भम् । 'यः ईं' ददर्श' यश्चैनं पश्यति 'हिरुग्' अन्तर्हितमेतस्मिन् जठरे, एतस्मिन् वा शरीरे । 'ईं नु' जन्तुम् । 'तस्मात्' तस्यैव एप गर्भो याथात्म्यतः प्रत्यक्षो भवत्यध्यात्मशास्त्रदृष्ट्या, नेतरस्य गर्भकर्त्तुः । 'सः' पुनरेप गर्भो 'मातुर्य्योनौ' गर्भाशयस्थाने 'अन्तः' उदरे पुष्यति, स मातुरशितपीतलीढभक्षितेन चतुर्विधाहारपरिणामे ततः 'परिवीत' जरायुणा परिवेष्टितो यथाकालं जायते । अथैवं 'वहुप्रजाः' वहुशः प्रजायमानः स गर्भकर्त्ता गर्भतत्त्वमजानानः 'निर्ऋतिं' दुःखम् 'आविवेश' आविशतीत्यर्थः । एवं गर्भतत्त्वापरिज्ञानात् यो गर्भं करोति स दुःखमापद्यते, यस्तु अध्यात्मदृष्ट्या गर्भतत्त्वं वेद, स गर्भकर्मणो निवर्त्तते, स निर्ऋतिं नापद्यते । एवमस्यामृचि निर्ऋतिर्देवतेत्येप परिव्राजकार्थः ॥

अन्ये तु ब्रुवते,—यः करोति गर्भं स गर्भभूतो जन्मान्तरेषु वहुपु प्रजायमानो जन्ममरणसन्तानानुभवविद्धां निर्ऋतिमाविशति । यो रेतः सिञ्चति, तद्रूपो भूयो जन्मान्तरेषु वहुशः प्रजायमानो जन्ममरणसन्तानाननुभवतीत्युक्तम् ।

"वर्षकर्मेति नैरुक्ताः" वर्षकर्मैतदुच्यते । निर्ऋतिश्चात्र भूमिरुच्यते । एवं नैरुक्ता मन्यन्ते । यः करोति वर्षं, यो वा

किरति क्षिपति। कः पुनरसौ? मेघः। स हि वर्षस्य कर्त्ता विक्षेप्ता वा। मेघाद्धि वर्षं प्रवर्त्तते। किं तस्य? न सोऽस्य वर्णस्य तत्त्वं "वेद" यो ददर्श यः पश्यति "आदित्योपहितम्" आदित्यस्य रश्म्यन्तर्गतं वर्षमनभिव्यक्तम्। कश्चासौ अन्तर्गतः? प्रावृट्काले वर्षभावेनाभिव्यक्तो बहुप्रजाः बहुशः प्रजायमाना निर्ऋतिं भूमिमाविशतीति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"करोतिकिरती सन्दिग्धौ" धातू "वर्षकर्मणा" समभ्येते। उभयथा ह्युपपद्यते,—यः करोति यो वा क्षिपति। "मातान्तरिक्षम्" एतस्मिन् हि "भूतानि" "निर्मीयन्ते"। एतद्ध्यवकाशदानेन विशिष्टमुपकारं करोति। भूतानां जायमानानां "योनिरन्तरिक्षम्" आकाशस्यैव प्रदेशविशेषः कश्चित्। स वायुसंयुतः सन् उदकयोनिभावं पुष्णाति। तदेतत् "वायुना" तस्य सङ्गवन्तं दृष्ट्वोक्तम्,—"परिवीतः" भवति। इति शब्दसारूप्यप्रसक्तमुच्यते,—"अयमपीतरः" स्त्रीयोनिः "एतस्मादेव"। असावपि "परिप्लुतः" एव "भवति" स्नावणा मांसेन च॥

एवमेतस्मिम् मन्त्रे, नैरुक्तानां निर्ऋतिशब्देन भूमिरुच्यते, परिव्राजकानां कृच्छ्रापत्तिः। तदेवं मन्त्रेषु शब्दगतिविभुत्वाद्दुभयमप्युपपद्यत एव। तद्यथा,—"दधिक्रावणो अकारिषम् (ऋ० सं० ३, ७, १३, ६)"—इत्येष मन्त्रः, अग्न्युपस्थाने अग्निहोत्रे, अयमेव चाग्निष्टोमे "दधिक्रावणोअकारिषमित्याग्नीध्रे दधि भक्षयन्ति (आ० सू० ६, १३)"—इति दधिभक्षणे, तथाचाश्वमेधे

"दधिक्रावणो अकारिषमित्युत्थितायां सर्वा जपन्ति"—इत्यश्व-सन्निधावेनं पत्न्यो जपन्ति महिष्यामुत्थितायाम्। तत्रैवं सति प्रतिविनियोगमस्यान्येनार्थेन भवितव्यम्। त एते वक्तुरभिप्राय-वशादन्यत्वमपि भजन्ते मन्त्राः, न हि एतेषु अर्थस्येयत्तावधारण-मस्ति, महार्था ह्येते दुःपरिज्ञानाश्च। यथाश्वारोहवैशिष्ट्यादश्वः साधुः साधुतरश्च वहति, एवमेते वक्तृवैशिष्ट्यात् साधून् साधु-तरांश्चार्थान् स्रवन्ति।

तत्रैवं सति लक्षणोद्देशमात्रमेवैतस्मिञ्छास्त्रे निर्वचनमेकै-कस्य क्रियते। क्वचिच्च आध्यात्माधिदैवाधियज्ञोपदर्शनार्थः। तस्मादेतेषु यावन्तोऽर्था उपपद्येरन्—आधिदैवाध्यात्माधियज्ञा-श्रयाः सर्व एव ते योज्याः, नात्रापराधोऽस्ति॥

'एवमेव सन्देहाधिकारमुपजीवन्नाह'—"शाकपूणिः सङ्कल्प-याञ्चक्रे,—सर्वा देवता जानामीति"। शाकानि यः पूणयति संहन्ति, स शाकपूणः, तस्यापत्यं शाकपूणिः आचार्य्यः। स सङ्कल्पयाञ्चक्रे, सङ्कल्पं कृतवान्। किम्? इति। सर्वा देवता जानामीति। "तस्मै" सङ्कल्पमेवं कृतवते "देवतोभयलिङ्गा" स्त्रीपुंलिङ्गा, अथवा मध्यस्थानलिङ्गा द्युस्थानलिङ्गा च "प्रादुर्ब-भूव"। "तां" पुरतोऽवस्थितां सतीं "न जज्ञे" न ज्ञातवान्,—किमियं स्त्री स्यादथवा पुरुष इति, अथवा किमियं मध्यस्थाना अथवा द्युस्थानेति। "ताम्" अजानन् "पप्रच्छ" "विविदिषाणि त्वा"। वेदितुमिच्छामि त्वाम्,—किमसि पुरुषः अथवा स्त्री? इति, अथवा किमस्यन्तरिक्षस्थानाथवा द्युस्थाना? इति।

"सा" एवं पृष्ठा सती "अस्मै" शाकपूणये "एतामृचम्" "आदिदेश" आदिष्टवती। किम्? इति। "एषा मह्देवतेति" अस्यामृचि अहं देवतेति, त्वञ्च नैरुक्तः मामेतस्या ऋचः सकाशादर्थावगत्यावधारयेति—॥४॥

अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वंसनावधिश्रिता। सा चित्तिभिर्नि हि चकारमर्त्यं विद्युद्भवन्ती प्रति वव्रिमौ हत॥ अयं स शृन्द्दायते येन गौरभिप्रवृत्ता मिमाति मायुं शब्दङ्करोति मायुमिवादित्यमिति वा वागेषा माध्यमिका ध्वंसने मेघेऽधिश्रिता सा चित्तिभिर्निकरोति मर्त्यं विद्युद्भवन्ती प्रत्यूहते वव्रिं वव्रिरिति रूपनाम वृणोतीति सतो वर्षेण प्रच्छाद्य पृथिवीं तत् पुनरादत्ते ॥५॥

इति द्वितीयाध्यायस्य द्वितीयःपादः॥ २, २॥

कतमा पुनरसावृग्? इति। उच्यते,—"अयं स शिङ्क्ते"—इति। "अयं स शब्दायते" स एव मेघः शब्दं करोति। येन मेघेन किं कृतम्? इति। 'येन गौरभीवृता' येन माध्यमिका वागभिप्रच्छादिता सती "मिमाति मायु" निर्मिमीते निर्वर्त्तयति मायुम्, "शब्दं करोति" इत्यर्थः। "मायुः, काकुत्"—इति च वाङ्नामसु पठितम्। अथवा मायुरादित्यो भवति, सर्वभूतनिर्माता। तमिवात्मानं निर्मिमीते। कावस्थितः? "ध्वसने"

उदकध्वंसने उदकस्रंसने मेघे "अधिश्रिता"। अयं तावदर्द्धर्चो मेघान्तर्वर्त्तिन्या वाचो व्यक्तविद्युद्रूपाया अभिधायकः, मेघरूपत्वात् पुरुषत्वाभिप्रायः। अथवायमुत्तरस्त्रीत्वाभिप्रायः। यैवं-लक्षणा वा कर्मस्वरूपा, मेघशरीरा वा। 'सा चित्तिभिः' चट-चटाशब्दकर्मभिः 'नि हि चकार' नीचैः करोति 'मर्त्यं' मनुष्यम्। सर्वो हि विभ्यत्तस्या आसीदिति अवनमति च। कदा पुनर्नि-करोति मर्त्यम्? इति, उच्यते,—"विद्यद् भवन्ती" इति, विद्यु-दात्मना स्व्याख्येनाभिनिर्वर्त्तमाना, तदा हि दारुणश्चटचटाशब्दो भवतीति विशेषेण भयङ्करम्, न तथा विद्युद्रहितः। सैवमात्मान माविष्कृत्य विद्युद्रूपेण विक्षिप्य सर्वासु दिक्ष्वात्मानं वर्षेण प्रच्छाद्य पृथिवीम्। ततो वर्षव्युपरमे "प्रति" 'औहत' "ऊहते" "वव्रिम्" प्रत्युपसंहरति रूपमात्मीयमदृश्यं करोतीत्यर्थः। "वव्रि-रिति रूपनाम" तद्व्यावृत्त्या स्वमाश्रयं वर्त्तते। यस्मिंस्तु पक्षे मध्यस्थानलिङ्गा द्युस्थानलिङ्गा वेति तस्मिन् पक्षे मेघरूपत्वमवि-वक्षितम्, मेघवाचो विद्युद्रूपत्वञ्च। किन्तु एतावद्विवक्षितम्,—मेघाश्रया शब्दवती भूत्वा माध्यमिका वाक् विद्युदात्मना स्थित्वा वर्षेण प्रच्छाद्य पृथिवीं तद्वर्षमुदकरूपभूतं जलाशयेभ्यश्चादित्या-त्मना स्थित्वा पुनरादत्ते, विद्युदात्मना मध्यस्थाने स्थित्वा वर्षति, आदित्यात्मना द्युस्थाने स्थित्वा पुनरादत्त इत्यभिप्रायः। वक्ष्यति हि,—"त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवि (दै० १२, २, ८)" —इति॥

सेयमेकैव देवता मध्यस्थाना विद्युद्रूपा, मध्यस्थाना चाऽऽदि-

त्यरूपा, इत्ययमेवंलक्षणो देवतातत्त्वसन्देह उपेक्षितव्यो मन्त्रदर्शनाच्च निर्वक्तव्य इत्ययं मन्त्रसङ्क्षेपार्थः ॥

सा पृथिव्या सन्दिह्यत इत्यनेन सन्देहसामान्येनोदाहृतमिदमत्र मतं शाकपूणेरित्येवमादि ॥

अनुक्रमणं त्वधिकृतम्। तस्मिन् गोशब्द एको निरुक्तः प्रकारोपदर्शनार्थम्, इतराण्यभ्यूह्य निर्वक्तव्यानि। तद्यथा,—'गमा' गमनात्, अस्यां गच्छन्ति भूतानि, 'जमा' जमनात्, जमन्ति गच्छन्ति अस्यां भूतानि,—इत्येवमादि ॥

नैघण्टुकांस्तु याञ्छब्दान् प्रत्यर्थंगणसंस्थितान्।
छन्दोभ्योऽन्विष्य तत्त्वार्थान् निर्ब्रूयाद् योगतस्तु तान् ॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य द्वितीयः पादः ॥ २ ॥

तृतीयः पादः

हिरण्यनामान्युत्तराणि पञ्चदश हिरण्यं कस्माद्ध्रियत आयम्यमानमिति वा ह्रियते जनाज्जनमिति वा हितरमणं भवतीति वा हर्यतेर्वा स्यात् प्रेप्साकर्मणोऽन्तरिक्षनामान्युत्तराणि षोड़शान्तरिक्षं कस्मादन्तरा क्षान्तं भवत्यन्तरेमे इति वा शरीरेष्वन्तरक्षयमिति वा तत्र समुद्र इत्येतत्पार्थिवेन समुद्रेण सन्दिह्यते समुद्रः

कस्मात्समुद्द्रवन्त्यस्मादापः समभिद्रवन्त्येनमापः सम्मोदन्तेऽस्मिन् भूतानि समुदको भवति समुनत्तीति वा तयोर्विभागस्तत्रेतिहासमाचक्षते देवापिश्चार्ष्टिषेणः शन्तनुश्च क्रौरव्यौ भ्रातरौ बभूवतुः स शन्तनुः कनीयानभिषेचयाञ्चक्रे देवापिस्तपः प्रतिपेदे ततः शान्तनो राज्ये द्वादश वर्षाणि देवो न ववर्ष तमूचुर्ब्राह्मणा अधर्मस्त्वया चरितो ज्येष्ठं भ्रातरमन्तरित्याभिषेचितं तस्मात्ते देवो न वर्षतीति स शन्तनुर्देवार्षिं शिशिक्ष राज्येन तमुवाच देवापिः पुरोहितस्तेऽसानि याजयानि च त्वेति तस्यैतद्वर्षकामसूक्तं तस्यैषा भवति ॥ १ ॥

"हिरण्यनामान्युत्तराणि पञ्चदश"। हिरण्यस्य नामान्युत्तराणि। कुतः? प्रकृतेभ्यः पृथिवीनामभ्यः, पृथिव्यामेव हिरण्यमुत्पद्यत इत्यतः पृथिव्यभिधानानन्तरं हिरण्यनामानि समाम्नातानि। कियन्ति पुनस्तानि? पञ्चदश, पञ्च च दश च पञ्चदश। यानि समाम्नातानि। असमाम्नातान्यपि सन्ति,—हाटकसुवर्णचामीकरणशातकुम्भादीनि। कतमानि पुनस्तानि समाम्नातानि? इति। उच्यते,—"हेम, चन्द्रं, रुक्मम्"—इत्येवमादीनि। हितं ममेदमिति सर्व एवैतन्मन्यते, तस्माद्धेम। चन्द्रम्, चदतेः कान्तिकर्मणः, सर्व एव ह्येतत् कामयते। रुक्मम्, रोचतेर्ज्वलनार्थस्य,तद्धि रोचिष्णुर्भवतीति। एवमूहितव्यं सर्वत्र निर्वचनम्॥

आह,—"हिरण्यं कस्मात्" ? उच्यते,—"ह्रियते आयस्यमानमिति वा" । आयस्यमानं ह्रियत एव शिल्पिभिः, कटकरुचकस्वस्तिकादिभावेन विस्तीर्य्यमाणम् । "ह्रियते जनाज्जनमिति वा" । तेन हि व्यवहारः क्रियते । ततस्तन्नैकत्रावतिष्ठते, ह्रियत एव सर्वदा । "ह्रितरमणं भवतीति, वा" । यस्य हि तद् भवति, तस्य हितञ्च दुर्भिक्षादिषु, तद् भवति रमणञ्चेति । तेन गृहीतेन मूषिकोऽपि रमते, किमुत मनुष्यः । "हर्य्यतेर्वा स्यात् प्रेप्साकर्मणः" तद्धि सर्वैरेव प्रार्थ्यते लोकानुक्रमेणैव ॥

"अन्तरिक्षनामान्युत्तराणि षोड़श" । षट् च दश च षोड़श कतमानि पुनस्तानि ? "अम्बरं, वियद्, व्योम"—इत्येवमादीनि । अम्बरमम्बुमद्भवति । नानाभावेन सर्वतो वियतमिति वियत् । नानाप्रकारमेतद्भवति भूतानीति व्योम । एवमाद्यभ्यूह्तिव्यम् ॥

आह,—"अन्तरिक्षम्" एव तावत् "कस्मात्" ? उच्यते,—"अन्तरा" हीदं द्यावापृथिव्योरवस्थितम्, "क्षान्तं" च "भवति" पृथिव्यन्तमित्यर्थः । अथ "वा" "अन्तरा" "इमे" द्यावापृथिव्यौ क्षियति निवसति "इति" अन्तरिक्षम् । अथ "वा" "शरीरेषु" एतदेव "अन्तर्" मध्येऽवस्थितम् "अक्षयम्" । इतराणि पृथिव्यादीनि भूतानि क्षीयन्ते तस्मादक्षयत्वादन्तरिक्षम् ॥

"तत्र" तस्मिन् षोड़शके अन्तरिक्षनामसमुदाये "समुद्रः इत्येतत्" अभिधानमुभयाभिधानम् । उभयाभिधायित्वात् "पार्थिवेन समुद्रेण" एतेन जलाशयेन "सन्दिह्यते" एतदत्र सन्देहपदम् ।

आह,—"समुद्रः कस्मात्" ? इति। उच्यते,—"समुद्द्रवन्त्यस्मादापः" घीचितरङ्गशीकरादिभावेन। "समभिद्रवन्त्येनमापः" सर्वा एव ह्यापो निम्नानुसारित्वात् समुद्रमेवाभिमुख्येन द्रवन्ति, स हि निम्नो भवति। "सम्मोदन्तेऽस्मिन् भूतानि" संहृष्यन्ति जलचराणि सत्त्वानि, बहूदकत्वात्। "समुदको भवति"। उद्र इत्युदकनाम, तदस्मिन् संहतमिति समुद्रः। "समुनत्तीति वा" सङ्क्लेदयतीत्यर्थः। अतो हि प्रसृतैरम्भोभिः सर्वमिदं सङ्क्लिद्यते। "तयोर्विभागः" ॥

यस्मिन्नुदाहरणो लक्ष्यते, "तत्र" "इतिहासमाचक्षते" आचार्य्याः। निदानभूतः 'इति हैवमासीत्'—इति य उच्यते स इतिहासः। कतमः पुनरसौ ? इति। उच्यते,—"देवापिश्चार्ष्टिषेणः" इत्येवमादीनि। देवापिश्चार्ष्टिषेणः, "शन्तनुश्च" आर्ष्टिषेण एव "कौरव्यौ" कुरुवंशप्रभवौ "भ्रातरौ बभूवतुः"। तयोरेको यः "कनीयान्" "शन्तनुः" नाम, "सः" आत्मानम् "अभिषेचयाञ्चक्रे अभिषेचितवानित्यर्थः। सोऽभिषिक्तः सन् राजा बभूव, इतरः पुनर्ज्येष्ठः "देवापिस्तपः प्रतिपेदे"। स किल तीव्रेण तपसा ब्राह्मण्यमापेदे, विश्वामित्रवत्। "ततः" तेनापचारेण ज्येष्ठातिक्रमजेन "शन्तनोः" "राज्ये" राष्ट्रे "द्वादश वर्षाणि देवो न ववर्ष"। अवर्षति देवे "तं" शन्तनुम् "ऊचुः" उक्तवन्तः "ब्राह्मणाः"—"अधर्मस्त्वया चरितः"—"ज्येष्ठं भ्रातरम्" "अन्तरित्य" अतिक्रम्य "अभिषेचितम्" अभिषेक आत्मनः कारितो यतस्त्वया, "तस्मात्" तेन मर्य्यादातिक्रमेण "ते" तव राज्ये "देवो न वर्षति"

प्राप्तकालं प्रतिपद्यस्व—"इति"। "सः" एवमुक्तः "शन्तनुः" "देवापिं" "शिशिक्ष" पुनः पुनः शशास अभिगमितवानित्यर्थः। कथम्? "राज्येन" अभ्युद्यतेन। अर्थ्यमानः "देवापिरुवाच" काममहं "पुरोहितस्ते" "असानि" भवानि "याजयानि च" "त्वां" त्वां वार्षिकेण कर्मणा। न च राजा भविष्यामि, भवानेवास्तु राजेत्यभिप्रायः॥

"तस्य" देवापेः "एतद् वर्षकामसूक्तम्" आविरभूत्। तत्र "तस्य" समुद्राभिधानसन्दिग्धस्य प्रविभागोपदर्शनाय "एषा" निर्वाचिका ऋग् "भवति" ॥ १ ॥

आर्ष्टिषेणो होत्रमृषिर्निपीदन्देवापिर्देवसुमतिं चिकित्वान्।
स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि।

आर्ष्टिषेण ऋष्टिषेणस्य पुत्र इषितसेनस्येति वा सेना सेश्वरा समानगतिर्वा पुत्रः पुरु त्रायते निपरणाद्वा पुं नरकं ततस्त्रायत इति वा होत्रमृषिर्निपीदन्नृषिर्दर्शनात् स्तोमान् ददर्शेत्यौपमन्यवस्तद्यदेनांस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्तद्दृषीणामृषित्वमिति विज्ञायते देवाषिर्देवानामाप्त्या स्तुत्या च प्रदानेन च देवसुमतिं देवानां कल्याणीं मतिं चिकित्वांश्चेतनावान्। स उत्तरस्मादधरं समुद्रमुत्तर उद्धततरो भवत्यधरोऽधोरोऽधो न धावतीत्यूर्ध्वगतिः प्रतिषिद्धा तस्योत्तरा भूयसे निर्वचनाय ॥ २ ॥

"आर्ष्टिषेणः ऋष्टिषेणस्य पुत्रः, इषितसेनस्येति वा"। अन्यकल्पान्तरीणोऽन्यकल्पान्तरीणस्यैव शन्तनोर्वर्षार्थीये कर्मणि होतृत्वे वृतः 'होत्रं' कर्म प्रति 'निषीदन्' उपविष्टवान्। ततोऽपि "देवापिः" नाम नाम्ना "देवसुमतिं" देवानां कल्याणीं मतिमुदकसम्प्रदानाभिमुखीं कर्तुं "चिकित्वान्" जानानः। स हि तथाऽस्तौत्, यथा देवानामुदकसम्प्रदानाभिमुखी मतिरभूत्। ततः परितुष्टेषु देवेषु 'सः' देवापिः 'उत्तरस्मात्' अन्तरिक्षात् समुद्रात् 'अधरं' समुद्रं पार्थिवं प्रति। एष विभागः समुद्रयोः। 'अपो दिव्याः' प्रशस्ताः शस्यसम्पत्करीः 'असृजत्' अक्षारयत्। किंलक्षणाः? 'वर्ष्याः' वर्षभूताः 'अभि' सर्वभूतानामुपरि। स देवाप्यधिकारे वर्त्तमान एतदकरोत्। अन्यस्मिन् कल्पेऽपि देवापिर्ममाप्येतद्देवास्तिवत्येव वर्त्तमानेनाभिसम्बध्यत इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—ऋष्टिरायुधविशेषः, तद्बहुला सेना यस्य, सोऽयमृष्टिषेणः। इषितसेनो वा नित्यमेव प्रेषितसेनः शत्रून् प्रति। "सेना, सेश्वरा"। इनेतीश्वरनाम, तेन हि सा नित्यमेव संयुक्ता भवति। "समानगतिर्वा" समानमेकमर्थमुद्दिश्य जयाख्यमेतीति सेना। "पुत्रः, पुरु त्रायते" बह्वपि यत् पित्रा पापं कृतं भवति, ततोऽयं त्रायति पुत्रः। "निपरणाद्वा" निपृणाति निर्ददाति ह्यसौ पिण्डान् पितृभ्यः इति पुत्रः। अथवा "पुम्" इति "नरकं" नरकस्थानमुच्यते, "ततस्त्रायत इति वा" पुत्रः। "ऋषिर्दर्शनात्" पश्यति ह्यसौ सूक्ष्मानर्थान्। "स्तोमान्

कृपायमाणोऽन्वध्यायद् देवश्रुतं देवा एनं शृण्वन्ति वृष्टियाचिनं रराणो रातिरभ्यस्तो बृहस्पतिर्ब्रह्मासीत् सोऽस्मै वाचमयच्छद् बृहदुपव्याख्यातम् ॥ ३ ॥

इति द्वितीयाध्यायस्य तृतीयः पादः ॥२, ३॥

यद्देवापिरिति। 'यत्' यस्मात् 'देवापिः' 'शान्तनवे' राज्ञे "पुरोहितः" पुरोहितो ह्येवाग्निकर्मणि व्याप्रियते, स पुरोहितः सन् देवापिः "होत्राय" होतृकर्मणे वर्षार्थीये कर्मणि "वृतः" सन् 'कृपयन्' "कृपायमाणः" राज्ञः 'अदीध्येत्' "अन्वध्यायत्" वृष्टिर्भवेदिति। तं "देवश्रुतं" देवापिमेनं 'वृष्टिवनिं' "वृष्टियाचिन" "रराणः" अददत्। "वृहस्पतिः" तस्मिन्नेव कर्मणि "ब्रह्मा आसीत्" ब्रह्मत्वेऽवस्थितः। "सः" "अस्मै" वर्षसाधिकां "वाचम्" "अयच्छत्" अददादित्यर्थः। तया वाचा तदनुगृहीतया देवान् स्तुत्वा तेभ्यो वर्षमलभतेति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"शन्तनुः" कस्मात्? इति। उच्यते—स हि कश्चिद्रोगार्त्तं दृष्ट्वा ब्रवीति हि "तनोः शं" तव "अस्तु इति" तनोऽसावगदो भवति। अथ"वा" "शमस्मै तन्वा अस्त्विति" एवमसावाशास्ते। शमिति सुखनाम। तनुः शरीरं तदसौ नित्यं शरीरायाशास्ते। "पुरोहितः" शान्तिकपौष्टिकाभिचारिकेषु कर्मसु "पुर एनं दधति" राजानः पुरस्कुर्वन्तीत्यर्थः। "देवश्रुतं" "देवा" हि "एनं" स्तुतीरुच्चारयन्तं "शृण्वन्ति" इति देवश्रुत्, तं देवश्रुतम्। "रराणः" इति "रातिः" दानार्थः "अभ्यस्तः"॥

"वृहदुपव्याख्यातम्"। "वृहदिति महतो नामधेयम्, परिवृढं भवति" इति। मन्त्रनिदानद्वारेण धर्मोऽयमत्र दर्शितः। ज्येष्ठे तिष्ठति कनीयसो राज्यप्राप्तिर्धर्मातिक्रमः। धर्मातिक्रमे च देवो न वर्षतीति। निरुक्तपक्षे,—ऋष्टिषेणो मध्यमः, तदपत्यमयमग्निः पार्थिव आर्ष्टिषेणो देवापिः, स शन्तनवे सर्वस्मै यजमानायेति योज्यम्। वृहस्पतिरिति मध्यमः। स्तनयित्नुलक्षणां वाचमित्यर्थः ॥ ३ ॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य तृतीयः पादः ॥ ३ ॥

—०—

॥ चतुर्थः पादः ॥

साधारणान्युत्तराणि षड् दिवश्चादित्यस्य च यानि त्वस्य प्राधान्येनोपरिष्टात्तानि व्याख्यास्याम आदित्यः कस्मादादत्ते रसानादत्ते भासं ज्योतिषामादीप्तो भासेति वादितेः पुत्रः इति वाल्पप्रयोगं त्वस्यैतदार्चाभ्याम्नाये सूक्तभाक् सूर्य्यमादितेयमन्यासामपि देवतानामादित्यप्रवादाः स्तुतयो भवन्ति तद्यथैतन्मित्रस्य वरुणस्यार्यम्णोदक्षस्य भगस्यांशस्येत्यथापि मित्रावरुणयोः। आदित्या दानुनस्पती

दानपतौ। अथापि मित्रस्यैकस्य। प्र स मित्र मर्त्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेनेत्यपि निगमो भवत्यथापि वरुणस्यैकस्य। अथा वयमादित्य व्रते तव। व्रतमिति कर्मनाम वृणोतीति सत इदमपीतरद्व्रतमेतस्मादेव निवृत्तिकर्म वारयतीति सतोऽन्नमपि व्रतमुच्यते यदावृणोति शरीरम् ॥ १ ॥

लोकाभिधानाधिकारेणेदमुच्यते,—"साधारणान्युत्तराणि षट्, दिवश्चादित्यस्य च" इति। समानं ध्रियन्ते इति 'साधारणानि' नामानीत्यकारो वर्त्तते। अतएव 'उत्तराणि' प्रकृतमपेक्ष्य। किञ्चात्र प्रकृतम्? अन्तरिक्षनामानि (४४ पृ०)। तेभ्य इमान्युत्तराणि (५० पृ०)। कियन्ति पुनस्तानि? 'षट्' (६)। कयोः पुनः साधारणानि? 'दिवश्चादित्यस्य च'। कतमानि पुनस्तानि? "स्वः, पृश्निः, नाकः"—इत्येवमादीनि। "यानि त्वस्य" आदित्यस्य "प्राधान्येन" वर्त्तन्ते प्रधानस्तुतिभाञ्जि नामानि,—"सविता" भगः, सूर्य्यः, पूषा"—इत्येवमादीनि (४८३ पृ०), "तानि उपरिष्टात् (दै० का० ६, २, १—३, ६) व्याख्यास्यामः" समदृशोऽध्याये। इमानि तु नैघण्टुकानि संसृष्टरूपाणि च द्युनामभिः साकमित्यत इह नैघण्टुकप्रपणे निरुच्यन्ते ॥

आह,—"आदित्य" एव तावत् "कस्मात्?" इति। उच्यते, —शृणु। "आदत्ते" ह्यसौ "रसान्" रश्मिभिरित्यादित्यः।

"आदत्ते भासं ज्योतिषाम्" तदुदये हि चन्द्रादीनां प्रभानाशो भवत्येव, ग्रहापेक्षमेतत्। "आदीप्तो भासेति वा" सर्वतो ह्येष भासा आदीप्त आवृतो भवति। "अदितेः पुत्र इति वा" अदितिर्देव-माता, तस्याः पुत्रः, सोऽयमादितेयः सन्नादित्य इत्युच्यते।

"अल्पप्रयोगं त्वस्यैतदार्चाभ्याम्नाये सूक्तभाक् सूर्य्यमादितेयम्" इति। 'अल्पप्रयोगम्' अल्पविषयम्। 'तु' शब्दो विशेषणार्थः, एतदेवाल्पप्रयोगविषयम्, इतराणि सवितृभगपूषादीनि बहुप्रयोगविषयाणि 'अस्य' आदित्यस्य। कालपप्रयोगविषयम्? 'आर्चाभ्याम्नाये' ऋचो यस्मिन्नभ्युपर्य्युपर्य्याम्नाताः, सोऽयमार्चाभ्याम्नायो दाशतयः, तस्मिन्नल्पप्रयोगविषयम्। एतददितेः पुत्रत्वाभिप्रायमभिधानम्। आदितेय इति 'सूक्तभाक्' एव चैतदभिधानम्, न हविर्भाक्, न ह्यादितेय इत्यनेन नाम्ना हविराध्वर्य्यवे चोदितपूर्वमस्ति। यथा त्वेतत् सूक्तमेव नैघण्टुकवृत्त्या भजते, तथेदमुदाहरणम्,—'सूर्य्यमादितेयम्' इति "यदेदेन मद्धुर्यञ्जियासः (ऋ० सं० ८, ४, १२, १)"—इत्यस्यामृचि। अन्ये तु मन्यन्ते,—आदित्य इत्येतदेवाल्पप्रयोगमिति। तत्र त्वेतद् विरुद्ध्यते,—सूक्तभागिति। हविरपि ह्यनेनाभिधानेन चोद्यते,—"आदित्यं बहुरूपमालभत"—इति। "तस्य च पशोरेतत् षलर्वमादित्यो देव उदगात् पुरस्तात्"—इति। अथ चैवमन्यथा वाक्यद्वयविभागेन स्यात्,—अल्पप्रयोगं त्वस्यैतदार्चाभ्याम्नाये आदित्य इति हविर्भाक्, न सूक्तभाक्, अल्पं हविः, सूक्तभागविषयमित्यर्थः। इदन्त्वन्यत्,—सूक्तमेव नैघण्टुकवृत्त्या भजते, कदाचिदपि हविः।

तद्यथा—"सूर्य्यमादित्येयम् (ऋ० सं० ८, ४, १२, १)"—इति ॥

आदित्यशब्दप्रसक्तमाह,—एवम् "अन्यासामपि देवतानाम्" इति। देवता यज्ञमपेक्ष्येदमुच्यते,—"आदित्याभिधानप्रवादाः स्तुतयो भवन्ति"। "तद्यथा एतत्" उदाहरणजातम्,—"मित्रस्य वरुणस्यार्य्यम्णो दक्षस्य भगस्यांशस्य इति"। "इमा गिर आदित्येभ्यो घृतस्नूः मनाद्राजभ्यो जुह्वा जुहोमि। शृणोतु मित्रो अर्य्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः" ॥ (ऋ० सं० २, ७, ६, १)।—इत्यस्यास्मृचि सर्व एवादित्यप्रवादाः स्तुत्या स्तूयन्ते ॥

"अथापि मित्रावरुणयोः" आदित्यप्रवादाः स्तुतयो भवन्ति। तद्यथा,—"आदित्या दानुनस्पती। दानपती"। "ता सम्राजा घृतासुती आदित्या दानुनस्पती। सचेते अनवह्वरम् ॥" (ऋ० सं० २, ८, ८, १)। गायत्रीयं गृत्समदेन दृष्टा। अभिप्लवस्य षड़हस्य द्वितीयेऽहनि प्रउगं नाम शस्त्रम्, तत्र "अयं वां मित्रावरुणा सुतः सोमः (ऋ० सं० २, ८, ७, ४)"—इत्येष तृचः शस्यते, तस्योत्तमा एषा। 'ता सम्राजा' तौ सन्दीप्तौ "घृतासुती" तौ हि घृतमुदकमासुवाते, घर्मकर्मणा जनयतः। 'आदित्या' अदितेः पुत्रौ 'दानुनस्पती' दानानामीशाते तौ यजमानैः सम्यक् स्तुतिभिर्हविभिश्च संसेवितौ सन्तौ 'सचेते' प्रतिसंसेवेते यजमानमभिमतैर्दानैः। 'अनवह्वरम्' अनवरुध्यमानावित्यर्थः। यजमानविशेषणं वा युक्तम्। न कृतघ्नौ, शक्तौ च दातुमित्येवं मित्रावरुणावत्र स्तूयेते ॥

"अथापि मित्रस्यैकस्य" आदित्यप्रवादा स्तुतिर्भवति। तद्यथा,—"प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन। न हन्यत न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात्॥" (ऋ० सं० ३, ४, ५, २)। अयमप्यन्ये बहवो निगमा इत्यपिशब्दः। प्र स मित्रेति विश्वामित्रेण दृष्टा, त्रिष्टुप्। मैत्रस्य चरोः पुरोऽनुवाक्या। 'प्र अस्तु' प्रकर्षेणास्तु भवतु। हे 'मित्र!' 'आदित्य' अदितेः पुत्र। 'स मर्त्तः' स मनुष्यः 'प्रयस्वान्' अन्नवान्। यः किं करोति? 'यः' 'ते' तुभ्यं 'शिक्षति' ददाति 'व्रतेन' कर्मणा, निर्वपणप्रोक्षणादिना संस्कृत्येदं हविश्चरुलक्षणम्। किञ्च; एवमतिप्रभावस्त्वं येन स मर्त्तो यस्तव यष्टा 'त्वोतः' त्वत्परिग्रहे वर्त्तमानः, त्वया रक्षितः 'न' केनचित् प्रत्यनीकभूतेनातिबलेनापि शत्रुणा 'हन्यते' हिंस्यते। 'न' चाहतोऽपि स च 'जीयते' वशीक्रियते केनचित्। न च केवलं शत्रूणामनाधृष्यः? 'न' 'एनं' त्वोतं सन्तम् 'अंहः' अपि पापमपि 'अश्नोति' व्याप्नोति यत् 'अन्तितः' 'अन्तिकात् समीपात्, यत् स्वशरीरादेव वाङ्मनश्चेष्टानिमित्तमुत्पद्यते पापम्, तदुत्पत्तिसमकालमेव त्वदनुग्रहादपध्वस्यते, ततस्त्वैनं न व्याप्नोति। न च केवलं यदन्तिके उत्पद्यते, तेदेवैनं न व्याप्नोति, किन्तर्हि? यद्यपि 'दूरात्' पुत्रभ्रातृजायादिद्वारेणैवमास्कन्दति, तदपि 'न' एनम् अभिव्याप्तुं शक्नोति त्वोतं सन्तम्। एवं महानुभावस्त्वम्, ततस्त्वां स्तुमः इत्यभिप्रायः॥

"अथापि वरुणस्यैकस्य" आदित्यप्रवादा स्तुतिर्भवति।

तद्यथा,—'अथा वयमादित्य व्रते तव" इति। "उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं अथाय। अथावयमादित्य व्रते तवानागसो, अदितये स्याम॥" (ऋ० सं० १, २, १५, ५)। अनया त्रिष्टुभोपाकृतः शुनःशेपो वरुणं स्तुतवान्, आत्मानं मोचयिष्यन्। वरुणप्रघासेष्ववभृथेष्ट्यौ वारुण्यामिष्ट्यां हविषः पुरोऽनुवाक्येयम्। हे 'वरुण!' त्रिषु स्थानेषु—अधो मध्ये उपरिष्टाच्च, 'वयम् आवद्धाः स्वैः पाशैर्यतोऽतो ब्रूमः।—स्तुत्या हविषा चोपसृप्तस्त्वमस्माभिरतस्तावत् 'उत्तमं' 'पाशम्' उपरिष्टादवस्थितम् 'अस्मत्' अस्मत्तः 'उत् अथाय' ऊर्द्ध्वं श्लथय। उच्छृत्य च विमुञ्चास्मानपीड़यन्। योऽपि चायं 'अधमः' ते पाशः अस्मासु वर्त्तते, एनम् अर्वाञ्चम् 'अव' श्रथय अवमुञ्च। तथाच योऽप्ययं 'मध्यमः' ते पाशोऽस्मन्मध्ये वर्त्तते, एनमपि तथैवावस्थितस्तमभिसर्जयन् ऊर्द्ध्वमधो वा अदुःखयन्नस्मान् 'वि' श्रथय विमुञ्च। अथैवं त्वया 'वयं' सर्वविमुक्तपाशाः सन्तो हे 'आदित्य'! अदितेः पुत्र! वरुण! 'अनागसः' अपापाः संशुद्धसर्वकिल्बिषाः। एतदेव हि यौष्माकीणं पाशत्रयमागः, तेनावमुक्ताः सन्तः 'तव' एव 'व्रते' तवैव परिचरणकर्मणि 'अदितये' चात्मनोऽदीनत्वाय अनुपक्षयाय आदरवन्तः स्थिताः 'स्याम' इत्याशीः॥

निगमप्रसक्तमुच्यते।—"व्रतमिति कर्मनाम (१८१ पृ०), "वृणोतीति"। एवं कर्त्तरि कारके "सतः" वृणोतेः, तद्धि कर्म शुभञ्च कृतं सदावृणोति कर्त्तारम्। "इदमपीतरद्व व्रतमेतस्मादेव"

"निवृत्तिकर्म" यमनियमाख्यं बहिर्वेदिकमान्तर्वेदिकं वा, यदग्नि-सन्निधावुपेयते, तत् पुनः "वारयतीति" एवं "सतः" तद्विषयेषु प्रवर्त्तमानं पुरुषं स्त्र्यादिषु वारयति, तदनुसृत्य स पुरुषो निवर्त्तेऽवकीर्णी, भविष्यामीत्येतस्माद् भयात्। "अन्नमपि व्रतमुच्यते, यदावृणोति शरीरम्"। रसशोणितमांसमेदोमज्जास्थिभावेन विपरिणममानम् ॥ आदित्यशब्दप्रसक्तानुप्रसक्तमिदमुक्तम् ॥ १ ॥

स्वरादित्यो भवति सु अरणः सु ईरणः स्वृतो रसान् स्वृतो भासं ज्योतिषां स्वृतो भासेति वैतेन द्यौर्व्याख्याता। पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण इति नैरुक्ताः संस्प्रष्टा रसान् संस्प्रष्टा भासं ज्योतिषां संस्पृष्टो भासेति वाथ द्यौः संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च। नाक आदित्यो भवति नेता भासां ज्योतिषां प्रणयोऽथ द्यौः कमिति सुखनाम तत् प्रतिषिद्धं प्रतिषिध्येत। न वा अमुं लोकं जग्मुषे किञ्च नाकम्। नवा अमुं लोकं जग्मुषे किञ्च नासुखं पुण्यकृतो ह्येव तत्र गच्छन्ति गौरादित्यो भवति गमयति रसान् गच्छत्यन्तरिक्षेऽथ द्यौर्यत् पृथिव्या अधि दूरङ्गता भवति यच्चास्यां ज्योतींषि गच्छन्ति। विष्टबादित्यो भवत्याविष्टो रसानाविष्टो भासं ज्योतिषामाविष्टो भासेति

वाथ द्यौराविष्टा ज्योतिर्भिः पुण्यकृद्भिश्च । नभ आदित्यो भवतिं नेतां भासां ज्योतिषां प्रणयोऽपि वा भन एव स्याद्विपरीतो न न भातीति वैतेन द्यौर्व्याख्याता ॥ २ ॥

इति द्वितीयाध्यायस्य चतुर्थः पादः ॥२, ४॥

अधुना प्रकृतमेवोच्यते,—"स्वरादित्यो भवति"। "सु अरणः" सुगमन इत्यर्थः। अथवा सुष्ठु तमांसि ईरयतीत्यर्थः। अथवा विशेषणविशेष्यभावेन एते वाक्ये स्याताम्। किमुक्तं भवति—सु अरणः? इति। उच्यते, "सु ईरणः" इत्येव। "स्वृतो रसान्" सुष्ठु रसानादातुमृतो भौमान् आन्तरिक्षांश्च। "स्वृतो भासं ज्योतिषाम्" सुष्ठु ग्रहनक्षत्रादीनां ज्योतिषां भासमादातुमृतो गतः। "स्वृतो भासेति वा" सुष्ठु परिगतो भासेति वा, सर्वतो ह्येष परिगतो दीप्त्या भवति ॥

"एतेन द्यौर्व्याख्याता"। उक्तं हि 'तानि चेत् समानकर्माणि समाननिर्वचनानि'—इति। सापि हि सु अरणा शोभनगमना भवति, शोभनं वा अस्यामर्य्यत इत्येवमादि यथासम्भवं योज्यम् ॥

"पृश्निरादित्यो भवति"। आह,—कस्मात्? उच्यते,—"प्राश्नुत एनं वर्ण इति नैरुक्ताः"। 'प्राश्नुते' प्रकर्षेण व्याप्नोति 'एनम्' आदित्यं 'वर्णः' प्रोज्ज्वलः 'इति' 'नैरुक्ताः' मन्यन्ते। "संस्प्रष्टा रसान्" स हि नित्यकालमेव रसानां, संस्प्रष्टा भवति। तस्य तदेव कर्म, वक्ष्यति,—"अथास्य कर्म रसादानम् (दै० का० ७, ३, ४)"—इति। "संस्प्रष्टा भासं ज्योतिषाम्"। आदित्य-

संस्पर्शादेव ग्रहनक्षत्रचन्द्रमसां भासो : नश्यन्ति। "संस्पृष्टो भासेति वा" दीप्त्या ह्येष सर्वतः संस्पृष्टो भवति॥

आह,—"द्यौः" कस्मात् पृश्निः? उच्यते,—सापि हि "संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च"॥

"नाक आदित्यो भवति"। आह,—कस्मात्? उच्यते,—"नेता भासां" सर्वासु दिक्षु। "ज्योतिषां" च "प्रणयः" अस्यैव हि भगवतो रश्मिजालप्रान्तोपलग्न ज्योतिश्चक्रं बभ्रमीति॥

"अथ द्यौः" कस्मान्नाकः? इति। उच्यते,—"कमिति सुखनाम (३२४ पृ०)"। आह, ततः किम्? इति। शृणु,—"तत्प्रतिषिद्धं सत् पुनरपि "प्रतिषिध्येत"। किम्? इति। उच्यते,—तत्प्रतिषिध्यमानम् 'अकम्' भवति, असुखमित्यर्थः, पुनरपि च प्रतिषिध्यमानं 'नाकम्' भवति। ततो हिः प्रतिषेधः प्रकृतमापादयति, नाकमित्युक्ते सुखमिति प्रतीयते। ब्राह्मणमपि चैतस्मिन्नर्थे भवति;—"न वा अमुं लोकं जग्मुषे किञ्च नाकम्" —इति। आह,—किमुक्तं भवति? "अमुम्" एव "लोकं" द्युलोकं "जग्मुषे" गतवते "न" "किञ्च" किञ्चित्" नाकं "नासुखम्" इत्यर्थः। किङ्कारणम्? य एव हि "पुण्यकृतः" भवन्ति, ते "एव हि" "तत्र गच्छन्ति" न च पुण्यकृतां दुःखन भवितुं न्याय्यम्॥

"गौरादित्यो भवति"। आह,—कस्मात्? उच्यते,—"गमयति" ह्यसौ "रसान्" आत्मानं प्रति, उपक्षयं वा गमयति। किञ्च "गच्छत्यन्तरिक्षे" स एवात्मना॥

"अथ द्यौः, कस्माद् गौः ? इति। उच्यते,—"यत्" यस्मादियं गौः "पृथिव्याः" "अधि" उपरि "दूरम्" अध्वानं "गता भवति"। किञ्च, "यत्" यस्मात् "च" "अस्यां" "ज्योतींषि" ग्रहनक्षत्रतारकादीनि "गच्छन्ति" तस्माद् गौः ॥

"विष्टवादित्यो भवति"। आह,—कस्मात् ? उच्यते,—आभिमुख्येन हि एषः "रसान्" भौमानान्तरिक्षांश्च "आविष्टः" प्रविष्टो रश्मिभिरादातुम्। किञ्च, आभिमुख्येन "आविष्टो भासं" "ज्योतिषां" ग्रहादीनाम्। अथवा अयमेवाभिमुख्येन "आविष्टो भासेति वा" सर्वतो ह्येष सन्दीप्तो भवति ॥

"अथ द्यौः" कस्माद् विष्टप् ? इति। उच्यते,—इयमपि हि "आविष्टा" "ज्योतिर्भिः" ग्रहनक्षत्रादिभिः ये चान्ये पुण्यकृतस्तैश्च तस्माद् विष्टविति ॥

"नभ आदित्यो भवति"। आह,—कस्मात् ? उच्यते,—"नेता" ह्येष "भासां" सर्वासु दिक्षु, "ज्योतिषां" च "प्रणयः" व्याख्यातमेतत्। "अपि वा भन एव स्याद्विपरीतः" भासनः सन् नभ इत्युक्तो विपर्य्ययेण। "न भातीति वा" न न भाति भात्येवेति नभः ॥

"एतेन द्यौर्व्याख्याता" सापि ह्यादित्यघन्नेत्री भासामित्यादि योज्यम् ॥ २ ॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य [द्वितीयाध्यायस्य]

चतुर्थः पादः ॥ २, ४ ॥

———

पञ्चमः पादः ॥

रश्मिनामान्युत्तराणि पञ्चदश रश्मिर्यमनात्तेषामादितः साधारणानि पञ्चाश्वरश्मिभिर्दिङ्नामान्युत्तराण्यष्टौ दिशः कस्माद्दिशतेरासदनादपि वाभ्यशनात् तत्र काष्ठा इत्येतदनेकस्यापि सत्त्वस्य भवति काष्ठा दिशो भवन्ति क्रान्त्वा स्थिता भवन्ति काष्ठा उपदिशो भवन्तीतरेतरं क्रान्त्वा स्थिता भवन्त्यादित्योऽपि काष्ठोच्यन्ते क्रान्त्वा स्थितो भवत्याज्यन्तोऽपि काष्ठोच्यन्ते क्रान्त्वा स्थितो भवत्यापोऽपि काष्ठा उच्यन्ते क्रान्त्वा स्थिता भवन्तीति स्थावराणाम् ॥ १ ॥

आदित्यसम्बन्धेनैव "रश्मिनामान्युत्तराणि पञ्चदश"। "रश्मिर्यमनात्" उदकस्य अश्वानां वा। "तेषां" "पञ्च" यानि "आदितः", तानि "साधारणानि" "अश्वरश्मिभिः"। कतमानि पुनस्तानि ? "खेदयः, किरणाः"—इत्येवमादीनि। खे दयन्ते खे गच्छन्ति इति खेदयः, किरणा विक्षिप्ता भवन्ति।

"दिङ्नामान्युत्तराण्यष्टौ"। आदित्योपलक्षणा एते हि दिश इत्यादित्यनामभ्यः उत्तराणि दिङ्नामानि। कियन्ति पुनस्तानि ? अष्टौ। कानि पुनस्तानि ? "आताः, आशाः, उपराः"—इत्येवमादीनि। आताः, आगता ह्येतास्तं तमर्थं प्रति भवन्ति। आशाः,

अभ्यश्नुवते ह्येताः सर्वमेव यदस्ति किञ्चित्। उपराः, सर्वमेव ह्येता उपरम्य रता भवन्तीत्युपराः॥

आह,—"दिशः कस्मात्"? "दिशतेः" अतिसर्जनार्थस्य (तु० उ०), अतिसृज्यन्ते ह्यासु हविरादीनि देवतानाम्। अथवा "आसदनात्" तं तमर्थं प्रत्येता आसन्ना भवन्ति। "अपि वाभ्यशनात्" अभ्यश्नुवते ह्येतास्तं तमर्थम्॥

"तत्र काष्ठा इत्येतदनेकस्यापि सत्त्वस्य भवति"। तद्यथा,—"काष्ठा दिशो भवन्ति"। आह,—किङ्कारणम्? इति। उच्यते, "क्रान्त्वा स्थिता भवन्ति"। क्रान्त्वा ह्येतास्तं तमर्थं प्रति गत्वा स्थिता भवन्ति, न हि तदस्ति, यत्रेमा न सन्ति। "काष्ठा उपदिशो भवन्ति"। "इतरेतरं क्रान्त्वा स्थिता भवन्ति" ता अपि ह्येतरेतरं क्रान्त्वा दिग्भिः साकं स्थिता भवन्ति। "आदित्योऽपि काष्ठोच्यते"। "क्रान्त्वा स्थितो भवति" असावपि स्वस्थानं क्रान्त्वा गत्वा स्थितो भवति। "आज्यन्तोऽपि काष्ठोच्यते, क्रान्त्वा स्थितो भवति"। आज्यन्तोऽपि शरपथान्तः काष्ठोच्यते, असावपि स्वप्रदेशं क्रान्त्वा गत्वा स्थितो भवति। "आपोऽपि काष्ठा उच्यन्ते"। ता पुनर्द्वैध्यः, स्थावराश्चास्थावराश्च। तत्र, "क्रान्त्वा" गत्वा जलाशयमेताः "स्थिता भवन्तीति स्थावराणाम्" काष्ठात्वम्। अस्थावराणां पुनः क्रामन्ते चैताः, न क्वचित् तिष्ठन्तीति काष्ठा मेध्या आपः॥ १॥

मन्त्रोऽपि चैतस्मिन्नेवार्थे भवति,—

१४—

अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम्। वृत्रस्य निण्यं विचरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः। अतिष्ठन्तीनामनिविशमानानामित्यस्थावराणां काष्ठानां मध्ये निहितं शरीरं मेघः शरीरं शृणातेः शम्नातेर्वा वृत्रस्य निण्यं निर्णामं विचरन्ति विजानन्त्याप इति दीर्घं द्राघतेस्तमस्तनोतेराशयदा शेतेरिन्द्रशत्रुरिन्द्रोऽस्य शमयिता वा शातयिता वा तस्मादिन्द्रशत्रुस्तत्को वृत्रो मेघ इति नैरुक्तास्त्वाष्ट्रोऽसुर इत्यैतिहासिका अपाञ्चज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्त्यहिवत् तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च विवृद्ध्या स्रोतांसि निवारयाञ्चकार तस्मिन् हते प्रशस्यन्दिर आपस्तदभिवादिन्येषर्ग् भवति ॥ २ ॥

अतिष्ठन्तीनामिति। हिरण्यस्तूपस्येयमार्षम्, दासपत्नीरिति च। त्रिष्टुभावेते। अग्निष्टोमे निष्केवल्यं नाम शस्त्रम्, तत्र निविद्धानीयमेतत् सूक्तम्, तत्र द्वे अपि शस्येते। न तिष्ठन्तीत्यतिष्ठन्त्यः, तासाम् "अतिष्ठन्तीनाम्" मेघोदरान्तर्गतानामपाम्, ता हि मेघे गच्छन्त्येव तदाधारत्वात्। 'अनिवेशनानाम्' "अनिविशमानानाम्" न हि ताः क्वचिन्निविशन्ते, यावज्जलाशयं नाप्नुवन्ति। तासामेवंविधानां "काष्ठानां मध्ये" अवस्थि-

तानां वाह्यतो मेघाख्यं "निहितम्" अवस्थापितं धात्रा "शरीरम्" आवृत्य अपः, तासामेव गुप्तये। ताः पुनः 'आपः' तस्य "वृत्रस्य" मेघस्य "निण्यं निर्णामं" येनासौ नीचैर्नमति नं प्रदेशं "विजानन्ति" इव। यतस्तेन प्रदेशेन "विचरन्ति" प्रचरन्ति निम्नानुसारिण्यो हि ताः। असावपि वृत्रस्तासु प्रचरन्तीषु तत्प्रचरणनिरोधं चिकीर्षुः स्वशरीरविवृद्ध्या दीर्घं तमः' स हि तमः स्वत एव, धूमादिप्रभवत्वात्। यावन्तं प्रदेशं निम्नमनुसरन्त्यो मेघस्य ताः स्तुता भवन्ति, निपित्स्यन्त्यस्ततो बहुतरमसौ वर्द्धते। तदवरुत्सया एव दीर्घं तम आवृत्य 'आशयत्' आशेत इत्यर्थः। कः पुनरेवमाशयत्? 'इन्द्रशत्रुः' इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"शरीरं शृणातेः (२८३ पृ०)" हिंसार्थस्य, हिंस्यते हि तत्। "शम्नातेर्वा (२८३ पृ०)" हिंसार्थस्य "दीर्घं द्राघतेः (भू० अ०)" वृद्ध्यर्थस्य, वृद्धं तद्धु भवति। "तमः तनोतेः (तना० उ०)" तेन हि सर्वमेव ततं भवति। "आ शयत्" "आङ्" पूर्वस्य "शेतेः"। 'इन्द्रशत्रुः, इन्द्रोऽस्य शमयिता वा" हन्तेत्यर्थः "शातयिता वा" हन्ता वा, धात्वन्यत्वमर्थैकत्वम्॥

इह मन्त्रे वृत्र इत्येतच्छ्रुतं तदेतत् नैगमानुप्रसक्तं विचार्यते इत्युपयुक्तस्तच्छब्दः। आह,—"को वृत्रः?" उच्यते,—"मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिकाः"। निरुक्तमधीयते नैरुक्ताः। आह,—यदि मेघो वृत्रो य एष मन्त्रेषु यत्र सङ्ग्रामे श्रयते तत्र कः समाधिः? इति। उच्यते,—"अपाञ्च ज्योतिषश्च

मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति"। 'अपाञ्च' मेघोदरान्तर्गतानां 'ज्योतिषश्च' वैद्युतस्य उद्भूतवृत्तेः 'मिश्रीभावकर्मणो वर्षकर्म जायते' तेन हि वैद्युतेन ज्योतिषा वायुना वेष्टितेन इन्द्राख्येनोपताड्यमाना आपः प्रस्यन्दते—वर्षभावाय कल्प्यन्ते। 'तत्र' एवं सत्युदकतेजसोरितरेतरप्रतिद्वन्द्वभूतयोः 'उपमार्थेन' रूपकल्पनया 'युद्धवर्णा भवन्ति'—इति युद्धे रूपकाणीत्यर्थः। न ह्यत्र यथाभूतं युद्धमस्ति, न हीन्द्रस्य शत्रवः केचन सन्ति। मन्त्रोऽपि चैतस्मिन्नर्थे अस्ति नेन्द्रस्य शत्रवः,—"यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु। मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं न नु पुरा विवित्से॥" (ऋ० सं० ८, १, १५, २)। वामदेवपुत्रस्य बृहदुक्थस्यार्षम्। त्रिष्टुप्। व्यूढस्याष्टमेऽहनि निष्केवल्ये शस्यते। 'यत्' 'अचरः' त्वं नानाप्रकारं 'तन्वा वावृधानः' शरीरेण विग्रहवान् भूत्वा वावृधानः पुनः पुनः वर्द्धमानः। कथं पुनरचरः? "बलानीन्द्र प्रब्रुवाणो जनेषु"। 'बलानि' आत्मीयानि वीर्य्याणि, हे 'इन्द्र!' 'प्रब्रुवाणः' इव। क? 'जनेषु'। किं त्वं तथैव? न। "मायेत्सा ते यानि युद्धान्याहुः"। 'यानि युद्धान्याहुः' ऐतिहासिकाः, नानारूपाण्युपप्रदर्शयन्तः, 'सा' अपि च 'ते' तव 'माया इत्' मायैव। किं कारणम्? 'नाद्य' शत्रुः तवास्ति प्रत्यनीकभूतः, 'न नु पुरा' नापि पुरा कश्चिदासीत्, यावद् वीर्य्यं किञ्चित् क्वचिदस्ति सर्वं तत् त्वमेव। "वीर्य्यं वै प्रावीर्य्यमिन्द्र इति ह विज्ञायते"। क ते शत्रुः? येन साकं युयोधिथ। एतत् त्वमपि

'विवित्से' वेत्स्येव, न केवलमहमेवेत्यभिप्रायः। एवमेतन्मन्त्रे मायात्वमेव युद्धमिति श्रूयते। विज्ञायते च "तद्वाहुर्नैतदस्ति यद्वै वासुरमिति"। तस्मात् साधूक्तम्,—अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो जायते, तत्रोपमार्थेन युद्धघर्णा भवन्ति" ॥

आह,—किं वृत्रवदेव रूपाणि भवन्ति? नेत्युच्यते,—"अहिवत्तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च"। च समुच्चयार्थो द्रष्टव्यः। वृत्रवच्चाहिवच्चेति मन्त्रवर्णा भवन्ति, ब्राह्मणवादाश्च शाखान्ते भवन्ति, तदप्युपेक्षितव्यम्। "तस्मिन् हते" वृत्राख्ये मेघे हते "प्रसस्यन्दिर आपः" ॥

"नदमिवाद्रिणा एवा"—॥ २ ॥

दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः। अपाम्बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप्तद्वार ॥ दासपत्नीर्दासाधिपत्न्यो दासो दस्यतेरुपदासयति कर्माण्यहिगोपा अतिष्ठन्नहिना गुप्ता अहिरयनादेत्यन्तरिक्षेऽयमपीतरोऽहिरेतस्मादेव निर्ह्रसितोपसर्ग आहन्तीति। निरुद्धा आपः पणिनेव गावः। पणिर्वणिग् भवति पणिः पणनाद्वणिक् पण्यं नेनेक्ति। अपां विलमपिहितं यदासीत्। विलं भरं भवति बिभर्त्तेर्वृत्रञ्चाभिवानपवद्वार तद् वृत्रो वृणोतेर्वा वर्त्ततेर्वा वर्द्धतेर्वा यदवृणोत्तद् वृत्रस्य वृत्रत्वमिति

विज्ञायते यदवर्त्तत तद् वृत्रस्य वृत्रत्वमिति विज्ञायते यद्-वर्द्धत तद् वृत्रस्य वृत्रत्वमिति विज्ञायते ॥ ३ ॥

इति द्वितीयाध्यायस्य पञ्चमः पादः ॥ २, ५ ॥

दासपत्नीति। 'अपां' 'यत्' 'विलं' निर्गमद्वारम् 'अपिहितम्' 'आसीत्' तेन मेघेन, 'तत्' यदा इन्द्रः तं 'वृत्रं' मेघं 'जघन्वान्' निजघ्निवान् अहत, हत्वा च 'अपववार' अपावृतवान्। अथ तदा तस्मिन् निहते अपावृते च द्वारे ताः आपः प्रस्यन्दिरे वर्ष-भावेनेति समस्तार्थः ॥

अथैकपदनिरुक्तम्।—"दासपत्नीः दासाधिपत्न्यः" दासः कर्मकरः, तं हि ता अधिष्ठाय पान्ति रक्षन्ति। स हि कर्मणा श्रान्तः, तासु पीतासु विश्रान्त आप्यायितो भवति। विग्रह-प्रसक्तं निरुच्यते,—"दासो दस्यतेः (दि० प०)" स हि "उप-दासयति" उपक्षयति कृष्यादीनि "कर्माणि"। "अहिगोपाः" "अहिना गुप्ताः"। "अहिः" कस्मात्? उच्यते,—"अयनात्", "एति" हि असौ "अन्तरिक्षे"। शब्दसामान्यान्निरुच्यते,—"अयमपीतरोऽहिः" सर्पः "एतस्मादेव" असावपि हि एति। अथवा "निर्हसितोपसर्गः" स्यात्। कथम्? "आहन्ति" असौ भोगेनेत्यादिः। आङ्पूर्वस्य हन्तेः (अदा० प०), स पुनरयमुप-सर्गं निह्नस्य ह्रस्वं कृत्वा अहिरुच्यते। "पणिर्वणिग् भवति"—इति पर्य्यायेण तत्त्ववचनम्। "पणिः पणनात्" पणिति ह्यसौ व्यवहारं करोति। पर्य्यायप्रसक्तं निरुच्यते,—"वणिक् पण्य"

वणिजो यत् द्रव्यं तत् पण्यम्, तदसौ "नेनेक्ति" नित्यकालं शुचीकरोति मूल्याहं स्यादिति। "विलं भरं भवति" "विभर्त्तेः (जु० प०)" धातोः, भृतं हि तदुदकादिभिः। "वृत्रो वृणोतेर्वा (स्वा० उ०) वर्त्ततेर्वा (भू० आ०) वर्द्धतेर्वा (भू० आ०)"—इत्येषां धातूनामन्यतमस्य। ब्राह्मणमपि चैतस्मिन्नर्थे भवति,—"यदवृणोत्" अन्तरिक्षमुदकं वा, महत्त्वात् "तद् वृत्रस्य वृत्रत्वम्" —"इति" एवं ब्राह्मणोऽपि "विज्ञायते" विचार्य्यमाणो ज्ञायते। अथवा "यदवर्त्तत" इन्द्रेण हतो वृत्रो मेघः अपां विले अपावृते अपः वृष्टिभावेन अवर्त्तयत् प्रावर्त्तयत्, "तद् वृत्रस्य वृत्रत्वम्"। अथवा "यत् अवर्द्धत" असावतिमात्रप्रमाणम्, "तद् वृत्रस्य वृत्रत्वं" स्यादिति ॥ ३ ॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य [द्वितीयाध्यायस्य]

पञ्चमः पादः ॥ २, ५ ॥

षष्ठः पादः ॥

रात्रिनामान्युत्तराणि त्रयोविंशती रात्रिः कस्मात् प्रर-मयति भूतानि नक्तञ्चारीण्युपरमयतीतराणि ध्रुवीकरोति रातेर्वा स्याद्दानकर्मणः प्रदीयन्तेऽस्यामवश्याया उषोनाम्न्युत्तराणि षोडशोषाः कस्मादुच्छतीति सत्या रात्रेरपरः कालस्तस्या एषा भवति ॥ १ ॥

"काष्ठा इत्येतदनेकस्यापि सत्त्वस्य भवति"—इत्यत आरभ्य दिङ्नामप्रसक्तानुप्रसक्तमुक्तम्, प्रकृतमिदानीमुच्यते,—"रात्रिनामान्युत्तराणि त्रयोविंशतिः"। रात्रेर्नामानि 'रात्रि-नामानि'। 'उत्तराणि' इति प्रकृतेभ्यो दिङ्नामभ्यः तमःसतन्त्रा हि रात्रिः, तस्य च तमसो दिक्ष्वेवात्मलाभो भवति, अतो दिङ्नामभ्य उत्तराणि रात्रिनामानि। कियन्ति पुनस्तानि? 'त्रयोविंशतिः' त्रीणि च विंशतिश्च त्रयोविंशतिः (२३)। कतमानि पुनस्तानि? "श्यावी, क्षपा, शर्वरी"—इत्येवमादीनि। श्याव-वर्णा हि रात्रिरिति श्यावी। स्वैः स्वैः कर्मभिः अहनि क्षीणान् प्राणिनः इयं स्वापेन पातीति क्षपा, अस्यां हि सुप्ताः पुनर्नवा इव प्राणिनः प्रातरुत्तिष्ठन्ति। शरणमस्यां स्वापार्थं व्रियत इति शर्वरी। इत्येवमादि सर्वत्र योज्यम्॥

आह,—"रात्रिः कस्मात्?" इति। उच्यते,—इयं ह्यागच्छन्ती प्रकर्षेण रमयति। कानि? "भूतानि नक्तञ्चारीणि" पिशाचा-दीनि, तानि हि विगतेऽहनि रात्र्यामुपस्थितायां प्राप्तोऽयं विहार-समयः इति प्रकर्षेण रमन्ते। "उपरमयतीतराणि ध्रुवीकरोति" इतराण्यपि दिवाचारीणि सैवोपरमयति, तस्यां ह्युपस्थितायां दिवाचराणि भूतानि मनुष्यादीनि इतिकर्त्तव्यताभ्यः उपरमन्ति, उपरम्य च स्थिरीभवन्ति निवासाय। "रातेर्वा स्यात् दान-कर्मणः" दानार्थस्य। आह,—किमस्यां प्रदीयते? उच्यते,—"प्रदीयन्तेऽस्यामवश्यायाः" अवश्यमायन्तीत्यवश्यायाः, तुषारा इत्यर्थः, ते हि रात्रौ निपतन्ति॥

"उषोनामान्युत्तराणि षोडश" उषसो नामानि। रात्रेरेव ह्यपरः कालः उष आख्यो भवतीति रात्रिनामभ्य 'उत्तराणि उषो-नामानि'। कियन्ति पुनस्तानि ? 'षोडश' (१६) षट् च दश च षोडश। कतमानि पुनस्तानि ? "विभावरी, सूनरी"—इत्येवमा-दीनि। विविधां मियं भासं वृणोतीति विभावरी। शोभनं नरा-णामस्यामुत्थानं भवतीति सूनरी। इत्येवमादि निर्वचनं योज्यम्॥

आह,—"उषाः कस्मात् ?" इति। उच्यते,—"उच्छतीति सत्याः"। 'उछी विवासे (भू० प०)' विवासयति ह्रीयं तमांसि तस्मादुच्छतीत्येवमस्या एतस्मिन् कर्मणि सत्याः कर्त्तरि कारके भास उषा इत्येतदभिधानं भवति। आह,—का पुनरियमुषाः ? इति। उच्यते,—"रात्रेरपरः काल." स उषा इत्युच्यते। आह,—कथमेतदुच्यते रात्रेरपरः कालः उषाः ? इति। उच्यते, "तस्याः" उषसः राज्यपरकालत्वम्। "एषा" निर्वाच्चिका ऋग् "भवति"—॥ १ ॥

इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा। यथा प्रसूता सवितुः सवाय एवा रात्र्युषसे योनिमारैक्॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरागमच्चित्रं प्रकेतनं प्रज्ञाततममजनिष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनिमरिचत् स्थानं स्त्रीयोनिरभियुत एनां गर्भस्तस्या एषापरा भवति॥ २ ॥

इदं श्रेष्ठमिति। आङ्गिरसस्य कुत्सस्येयमार्षम्, उत्तरा च। उभे अपि त्रिष्टुभावेते, प्रातरनुवाकाश्विनयोः शस्येते। "इदम्" उपोलक्षणं "ज्योतिः" "श्रेष्ठम्" आदित्यादीनां "ज्योतिषाम्" इति निर्द्धारणे षष्ठी। आदित्यो हि तापकः प्रकाशकः, चन्द्रमा अथ निशीतः प्रकाशकश्च, इदं पुनर्नात्युष्णं नातिशीतं प्रकाशकञ्च। इत्येवमादित्यादीनामिदमेव श्रेष्ठम्। 'आगात्' "आगमत्" आगच्छतीत्यर्थः। "चित्र" चायनीयं पूजनीयं वा श्रेष्ठत्वादेव, 'प्रकेतः' "प्रकेतनं प्रज्ञाततमम्" "अजनिष्ट" जातमित्यर्थः। जातं सदागच्छति सर्वासु दिक्षु। 'विभ्वा' "विभूततमम्" इदमतिमहत्त्वाद् विभूततमं विस्तीर्णतमम्, इतराणि परिच्छिन्नतराणि ज्योतींषि अपेक्ष्य। किञ्च, "यथा प्रसूता" प्रकर्षेण सूता प्रसवमनुप्राप्ता। सूतिशब्दः प्रसवार्थः। "रात्रिः" "सवितुः" "आदित्यस्य" 'सवाय' "प्रसवाय" आदित्योत्सृष्टे देशे जायते। "एवम्" 'एव' "रात्री" रात्रिः उषसो जन्मार्थं "योनिं" "स्थानम्" अवकाशम् "उषसे" आत्मलाभाय 'आरैक्' "अरिचत्" आरेचयति, ददातीत्यर्थः। यथोषा आदित्यस्य जन्मनो हेतुस्तदनन्तरजन्मत्वात्, एवं रात्रिरुषसो जन्मनो हेतुः, इत्येवमस्यामृचि रात्रेरेव वापरः कालः उषःसञ्ज्ञित इति गम्यते। स्थानं योनिशब्देनोच्यते। यद्धि यस्मिन् विधीयते, तत् तेन साकं युतं भवति मिश्रीभूतमित्यर्थः। इयमपीतरा—"स्त्रीयोनिः" एतस्मादेव। किङ्कारणम्? "अमियुतः" हि "गर्भः" "एनाम्" भवति, आमिश्रीभूत इत्यर्थः। पूर्वत्र,—"अयमपीतरो योनिः, एतस्मादेव।

(किम्?) परियुतो भवति" इति परियवनक्रियासामान्येन निरुक्तो योनिशब्दः, इह पुनः 'अभिगुत एनां गर्भः' इति मिथुनभावसामान्येन उभयलिङ्गत्वं चास्योपदर्शितम्,—इह स्त्रीलिङ्गम्, तत्र पुंलिङ्गम् इति। "तस्याः" उषसः "एषा" "अपरा" ऋग् "भवति"—(अस्यैवार्थस्य दृढत्वाय रात्रेरपरः काल उषा उच्यत इति) ॥ २ ॥

रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः।
समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥

रुशद्वत्सा सूर्यवत्सा रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः सूर्यमस्या वत्समाह साहचर्यादुषसहरणाद्वा। रुशती श्वेत्यागात्। श्वेत्या श्वेततैरिचत् कृष्णा सदनान्यस्याः कृष्णवर्णा रात्रिः कृष्णं कृष्यतेर्निकृष्टो वर्णोऽथैनं संस्तौति समानबन्धू समानबन्धने अमृते अमरणधर्माणावनूची इतीतरेतरमभिप्रेत्य द्यावा वर्णं चरतस्ते एव द्यावौ द्योतनादपि वा द्यावा चरतस्तया चरत इति स्यादामिनाने अन्योन्यस्याध्यात्मं कुर्वाणे अहर्नामान्युत्तराणि द्वादशाहः कस्मादुपाहरन्त्यस्मिन् कर्माणि तस्यैष निपातो भवति वैश्वानरीयायामृचि ॥ ३ ॥

रुशद्वत्सेति। "रुशद्वत्सा" रोचिष्णुवत्सा, सूर्य्यो हि रोचिष्णुः, तं "सूर्य्यम् अस्या वत्समाह" मन्त्रद्वक्। "साहचर्य्यात्"। मातृसहचरो हि वत्सो भवति, अयमपि चानयोषसा सह चरतीत्येतस्मात् सामान्याद् वत्स उच्यते। "रसहरणाद्वा"। यथा हि मातुरूधसः क्षीराख्यस्य रसस्याहर्त्ता भवति वत्सः, एवमेषोऽप्यौषसिकानामवश्यायाख्यानां रसानामाहर्त्ता भवति रश्मिभिः,—इत्येतस्मात् सामान्याद् वत्सत्वम्। "रुशती" रोचनशीला आत्मनापि। "श्वेत्या" "श्वेतते:" धातोः (भू० आ०)। श्वेतो वर्ण एत्यस्याम्, श्वेतवर्णेत्यर्थः। या चैवंलक्षणा उषाः, सा "आगात्" आगच्छति। आगतायाश्च तस्याः 'आरैक्' 'अरिचत्' आरेचयति। "कृष्णा" 'कृष्णवर्णा रात्रिः"। किमारेचयति? "सदनानि" स्थानानि। "अस्याः" उषसः। येष्वियमुषा स्थानेषु आगता सती आसीदति, तान्यारेचयति रात्रिः। एवं तावदयमर्द्धर्चो रात्र्युषसोर्विभक्तस्तुतिः, "अथ" अनेनोत्तरार्द्धर्चेन "एने" रात्र्युषसौ "संस्तौति"।—"समानबन्धू" एते रात्र्युषसौ, "समानबन्धने" समानमनयोर्बन्धनम्। आदित्यस्येयं ह्यस्तमयं प्रति रात्रिर्बद्धा संश्लिष्टा, उदयं प्रत्युषाः, एवं समानबन्धू। "अमृते, अमरणधर्माणौ" न हि रात्र्युषसौ म्रियेते। "अनूची इतीतरेतरमभिप्रेत्य" इतरेतरं संश्लिष्टे ह्येते। "द्यावा वर्णं चरतः"। "ते एव" रात्र्युषसौ। "द्यावौ द्योतनात्" उषा हि स्वेन प्रकाशेन द्योतते, रात्रिरपि स्वेन तमोवीर्य्येण नक्षत्रगणेन वा स्वमधिकारं प्रति द्योतते। एवं हि द्यावेति

द्विवचनम् "अपि वा" तृतीयान्तमेकवचनमेतत् स्यात्.—यौ. तया "यावा" 'सहयुक्ते (पा० २, ३. १९)'। "तया" सह स्पर्द्धमाने "चरतः" गच्छतः। कथमुनश्चरतः? "आमिनाने"। आङ् अभ्यर्थे 'नोदस्येव शरण आ महस्य। तुदस्येव शरणेऽधि महतः'—इति (नैरु० का० ५. २. ५)। उषा अपि रात्रेरधि आत्मानं निर्मिमीते. रात्रिरप्युषसः. इतरेतरसंश्लिष्टे होमे रात्र्युषसौ। तस्माद्देवमुच्यते.—'अन्योऽन्यस्याभ्यात्मं कुर्वाणे' इति॥

उप.शब्दतत्त्वावधारणार्थं प्रसक्तावेतौ मन्त्रौ उपवर्णितौ. प्रकृतमिदानीमुच्यते.—'अहर्नामान्युत्तराणि द्वादश'। अह्नो नामानि. 'अहर्नामानि'. 'उत्तराणि' प्रकृतेभ्य उपोनामभ्यः. उषस एवानन्तरमहर्भवति. तस्मादुपोनामभ्य उत्तराणि अहर्नामानि। कियन्ति पुनस्तानि? 'द्वादश'। द्वे च दश च द्वादश (१२)। कानि पुनस्तानि? "वस्नोः. द्युः भानुः"—इत्येवमादीनि। वस्ते ज्योतिरेतद्धिति वस्नोरित्युच्यते। यथैव हि श्रुतं मन्त्रे तथैवेह सनाज्ञातम्। द्युः. द्योतने ह्येतत् ज्योतिषा। भानुः. भासते ह्येतत् ज्योतिषेत्येवमादि योज्यम्॥

आह,—"अहः कस्मात्"? उच्यते.—"उपाहरन्त्यस्मिन् कर्माणि" न हि तथा रात्रावनुतिष्ठन्ति कर्माणि कर्मकराः. यथाहनि॥

"तस्य" अहः "एष निपातो भवति"। नैघण्टुकवृत्त्या। "वैश्वानरीयायाम्" वैश्वानरदेवतायाम् "ऋचि"—॥ २॥

अहश्च कृष्णमहरर्जुनञ्च विवर्त्तेते रजसी वेद्याभिः । वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि ॥ अहश्च कृष्णं रात्रिः शुक्लञ्चाहरर्जुनं विवर्त्तेते रजसी वेद्याभिर्वेदितव्याभिः प्रवृत्तिभिर्वैश्वानरो जायमान इवोद्यन्नादित्यः सर्वेषां ज्योतिषां राजावाहन्नग्निर्ज्योतिषा तमांसि मेघनामान्युत्तराणि त्रिंशन्मेघः कस्मान्मेहतीति सत आ उपर उपल इत्येताभ्यां साधारणानि पर्वतनामभिरुपर उपलो मेघो भवत्युपरमन्तेऽस्मिन्नभ्राण्युपरता आप इति वा तेषामेषा भवति ॥ ४ ॥

अहःशब्दो हि रात्रिमहश्चोभयमभिधत्ते, अतः सन्देहपदम्, तस्यैष विभागोऽस्यामृचि उपपदविशेषात् प्रदर्श्यन्ते,—अहश्च कृष्णमिति। भरद्वाजस्येयमार्षम्। त्रिष्टुप्। पृष्टस्य पष्ठेऽहन्याग्निमारुते शस्त्रे शस्यते। "अहश्च कृष्णं रात्रिः शुक्लं चाहरर्जुनम्"। अर्जुनशब्दो हि शुक्लपर्य्यायः। "विवर्त्तेते" विपर्य्ययेण वर्त्तेते। रात्रिरतीता, अह आयातम्, अहरतीतं, रात्रिरायाता, इत्येवम्। "रजसी" रञ्जके। ज्योतिषा हि भूतान्यहो रञ्जयति, तमसा रात्रिः। "वेद्याभिः" "वेदितव्याभिः प्रवृत्तिभिः" न हि तासां प्रवृत्तीनामन्तोऽस्ति, अहनि च रात्रौ च प्राणिनामन्तस्ता वेदितव्या एव भवन्ति, बहुत्वात्, न हि विदितानामन्ताः

कदाचित्। किञ्च, "वैश्वानरः" अग्निः 'अवातिरत्' "अवाहन्" अपहन्ति, स्वेन "ज्योतिषा तमांसि"। कथम्पुनरपहन्ति ? 'जायमानो न न राजा' "जायमान इव", "उद्यन्" "सर्वेषां" सर्वभूतानां "राजा" "आदित्यः"। यथा ह्युद्यन्नादित्यस्तमांसि अपहन्ति दिवा, एवम् "अग्निः" अपि रात्रावपहन्तीत्यग्निरादित्येन तम उपघातं प्रत्युपमीयते॥

"मेघनामान्युत्तराणि त्रिंशत्"। मेघानां नामानि तानि उत्तराणि, प्रकृतेभ्योऽहर्नामभ्यः, मेघा ह्यहनि रात्रौ चाशेषेण भवन्त्यतो रात्र्यहर्नामभ्य उत्तराणि मेघनामानि। कतमानि पुनस्तानि ? "अद्रिः, ग्रावा, गोत्रः"—इत्येवमादीनि। अद्रिः, आदरयितव्यो भवति ह्यसावुदकार्थमित्यद्रिः। ग्रावा, गृणातेर्वा गृह्णातेर्वा, गृणात्यसौ शब्दं करोति, गृहीतश्चोदकमनेनेति। गोत्रः, गोर्वागत्र। इत्येवमाद्यभ्युहितव्यम्, पर्वतनामत्वेऽपि यथासम्भवं योज्यम्॥

आह,—"मेघः कस्मात्" ? उच्यते,—"मेहतीति" सिञ्चत्यसौ। एवं कर्त्तरि कारके "सतः" अस्यैतदभिधानं भवति। तेषां मेघनाम्नाम् "आ उपर उपल इत्येताभ्यां" प्राक् उपर उपल इत्येताभ्यां यानि नामानि, तानि "साधारणानि पर्वतनामभिः" तद्वेषां प्रकरणोपपद्माभ्यां विशेषोऽवधार्य्यः। 'आ उपर इत्येतस्मात्'—इति वक्तव्ये "आ उपर उपल इत्येताभ्यां" युक्तम्, उभावपि ह्येतौ समाननिर्वचनौ शब्दावेकस्मिन् निरुक्ते निरुक्तौ भविष्यत इति, श्लोश्चाविशेषख्यापनार्थम्। "उपर उपलो मेघ

भवति" उपर इति च उपल इति च मेघ उक्तो भवति। उपर-शब्दादारभ्य मेघनामान्येव, पर्वतनामानि ॥

आह,—उपरः कस्मात्? उच्यते,—"उप" गम्य "रमन्ते" "अस्मिन् अभ्राणि"। अथ "वा"। "उप" गम्य "रताः" "आपः" भवन्ति "इति"। उपलोऽप्येतस्मादेव रलोरविशेषेण ॥

आह,—कथं पुनर्गम्यते उपरशब्देन मेघ एवोच्यते, न पर्वतः? इति। उच्यते,—"तेषां" मेघानाम् उपरशब्दवाच्यत्वे विशेषलिङ्गवाचिका "एषा" ऋक् "भवति"—॥ ४ ॥

देवानां माने प्रथमा अतिष्ठन् कुन्तत्रादेपामुपरा उदायन्। त्रयस्तपन्ति पृथिवीमनूपा द्वा वृबूकं वहतः पुरीषम्॥ देवानां निर्माणे प्रथमा अतिष्ठन्माध्यमिका देवगणाः प्रथम इति मुख्यनाम प्रंतमो भवति विकर्त्तनेन मेघानामुदकं जायते त्रयस्तपन्ति पृथिवीमनूपाः। पर्जन्यो वायुरादित्यः शीतोष्णवर्षैरोषधीः पाचयन्त्यनूपा अनुतपन्ति लोकान् स्वेन स्वेन कर्मणायमपीतरोऽनूप एतस्मादेवानूप्यत उदकेनापि वान्वाविति स्याद्यथा प्रागिति। तस्यानूप इति स्याद्यथा प्राचीनमिति। द्वा वृबूकं वहतः पुरीषम्। वाग्वादित्या उदकं बृबूकमित्युदकनाम ब्रवीतेर्वा शब्द-कर्मणो भ्रंशतेर्वा पुरीषं पृणातेः पूरयतेर्वा ॥ ५ ॥

इति द्वितीयाध्यायस्य षष्ठः पादः ॥ २, ६ ॥

देवानां मान इति। वसुक्रस्येन्द्रपुत्रस्येयमार्षम्। त्रिष्टुप्। महाव्रते मरुत्वतीये शस्यते। 'देवानां' दानादिगुणयुक्तानां 'माने' विमाने निर्माणे। यदा देवाः सृष्टाः प्रजापतिना, तदैत एव माध्यमिका देवगणाः 'प्रथमाः अतिष्ठन्' एतेऽपि हि दानादि-योगाद् देवा उच्यन्ते। प्रथमाः प्रकृष्टतमा मुख्या इत्यर्थः। मेघाभावे हि सर्वमेवेदं जगद् वर्षाभावान्न स्यात्। तस्मादेत एव प्रकृष्टतमाः अतिष्ठन् स्थितवन्तः। सृष्टौ हि सर्वदेवानामेत एवाग्रे सृष्टा इत्यभिप्रायः। किञ्च, 'कृन्तत्रात्' उत्कृन्तात् प्रदेशात् 'एषां' मेघानामिन्द्रेण 'उपराः' आपः 'उदायन्' आगत-वत्यः, आगच्छन्ति च। किङ्कारणम्? विकर्त्तनेनैव हि मेघाना-मुदकं जायते। उपरशब्देनात्रोदकमुक्तम्, तात्स्थ्यात्तच्छब्दो मञ्चाः क्रोशन्त इतिवत्, उपरेषु मेघेषु या आपः, ता उपचारादु-परा इत्युच्यन्ते। किञ्च, यदा 'ताभिः' उपराभिरद्भिरोषधयः प्रोहिता भवन्त्यस्य तदा 'त्रयः तपन्ति' त्रयः पर्जन्यादयः तपन्ति। 'पृथिवीं' पृथ्वीलोकम्। 'अनूपाः' ते ह्यनुवपन्ति लोकान् स्वेन स्वेन कर्मणा यथाकालमनुगृह्णन्ति। एतदनुवपनं लोकानां यद् वर्षादिभिः पर्जन्यादयो यथार्थमोषधीः पाचयन्ति। किञ्च, 'द्वा वृवूकं वहतः पुरीषम्' द्वौ वाय्वादित्यौ वहतः आक्षिपत इतः पृथिवीलोकात् वृवूकमुदकम्। किंलक्षणम्? पुरीषम्, प्रीण-यित्रु वा सतः॥

"अयमपीतरोऽनूपः" नद्यनूपः समुद्रानूपो वा। "एतस्मा-देव" वपतेर्धातोः असावपि हि "अनूप्यते" अनुप्रकीर्य्यते नित्य-

कालम् "उदकेन"। "अपि वा" एवमन्यथा स्यात्,—आप्नोतेः, अन्वाप्यतेऽसावुदकेनेति "अन्वाप्"। पुरस्तादञ्चतीति "प्राक्", "तस्य" अन्वाबित्येतस्य सतः "अनूप इति" एष शब्दः "स्यात्" "यथा प्राचीनमिति", प्रागित्येवं सतः प्राचीनम्। "वृबूकमिति उदकनाम" इति। पर्य्यायवचनेन तत्त्वाभिधानम्। "ब्रवीतेर्वा" शब्दार्थस्य (अदा० उ०) शब्दकारि हि तद् भवति। "भ्रंशतेर्वा" भ्रश्यति (दि० प०) हि तन्मेघादिति ॥ ५ ॥

निरुक्तव्याख्यायां सप्तमाध्यायस्य [द्वितीयाध्यायस्य]

षष्ठः पादः ॥ ६ ॥

सप्तमः पादः।

वाङ्नामान्युत्तराणि सप्तपञ्चाशद् वाक् कस्माद्वचेस्तत्र सरस्वतीत्येतस्य नदीवद्देवताविच्च निगमा भवन्ति तद्वद् देवताविदुपरिष्टात्तद् व्याख्यास्यामोऽथैतन्नदीवत् ॥ १ ॥

वाङ्नामान्युत्तराणि सप्तपञ्चाशत्। मेघनामप्रसक्तौ "देवानां माने"—इत्येष मन्त्रो व्याख्यातः। प्रकृतमिदानीमुच्यते,—वाङ्नामानीति। वाचो नामानि 'वाङ्नामानि', 'उत्तराणि' प्रकृतेभ्यो मेघनामभ्यः। मेघेष्वेव हि भूयसी वाग् भवति इति

ततो वाङ्नामानि भवन्ति। कियन्ति पुनस्तानि "सप्तपञ्चाशत्" सप्त च पञ्चाशच्च सप्तपञ्चाशत् (५७)। कतमानि पुनस्तानि ? "श्लोकः, धारा, इला"—इत्येवमादीनि। श्रूयते इति श्लोकः। ध्रियते तं तमर्थमवधारयितुमिति धारा। तं तमर्थं प्रति ईट्टे गच्छतीति इडा। इत्येवमाद्यम्यूहितव्यम्॥

आह,—"वाक् कस्मात्" ? उच्यते,—"वचेः" धातोः (अदा० प०)। उच्यतेऽनयेति वाक्। "तत्र, सरस्वतीत्येतस्य" तत्र तस्मिन्, सप्तपञ्चाशत्के वाङ्नामगणे सरस्वतीत्येतस्य नाम "नदीवद् देवतावच्च निगमा भवन्ति" नद्यर्थयुक्ताश्च देवतार्थयुक्ताश्चेत्यर्थः। "तत्" तत्रैवं सति, "यत्" अभिधानं "देवतावत्", "तत्" अधिकृत्य "उपरिष्टाद् व्याख्यास्यामः' षोडशेऽध्याये "पावका नः सरस्वती (ऋ० सं० १, १, ६, ३)"—इत्येतस्मिन् मन्त्रे। "अथ" पुनः यत् "एनत्" "नदीवत्", तद् व्याख्यायते—॥ १ ॥

इ॒यं शु॒ष्मेभि॑र्बि॒सखा॑ इवारुज॒त्सानु॑ गि॒रीणा॒न्त॒वि॒ये॒-
भि॒रू॒र्मिभिः। पा॒रा॒व॒त॒घ्नीम॑वसे सुवृ॒क्तिभिः॑ सरस्वतीमा॑वि-
वासेम धी॒तिभिः॥ इयं शुष्मैः शोषणैः शुष्ममिति बलनाम शोषयतीति सतो विसं विस्यतेर्भेदनकर्मणो वृद्धिकर्मणो वा सानु समुच्छ्रितं भवति समुन्नुन्नमिति वा महद्भिरूर्मिभिः पारावतघ्नीं पारावारघातिनीं पारं परं भवत्यवारमवरम-

वनाय सुम्नवृत्ताभिः स्तुतिभिः सरस्वतीं कर्मभिः परिचरे-
मोदकनामान्युत्तराण्येकशतमुदकं कस्मादुनन्तीति सतो
नदीनामान्युत्तराणि सप्तत्रिंशन्नद्यः कस्मान्नदना भवन्ति
शब्दवत्यो बहुलमासान्नैघण्टुकं वृत्तमाश्वर्य्यमिव प्राधान्येन
तत्रेतिहासमाचक्षते विश्वामित्र ऋषिः सुदासः पैजवनस्य
पुरोहितो बभूव विश्वामित्रः सर्वमित्रः सर्वं संसृतं सुदाः
कल्याणदानः पैजवनः पिजवनस्य पुत्रः पिजवनः पुनः
स्पर्द्धनीयजवो वा मिश्रीभावगतिर्वा स वित्तं गृहीत्वा विपा-
ट्छुतुद्र्योः सम्भेदमाययावनुययुरितरे स विश्वामित्रो
नदीस्तुष्टाव गाधा भवतेत्यपि द्विवदपि बहुवत् तद्यद् द्विव-
दुपरिष्टात्तद् व्याख्यास्यामोऽथैतद् बहुवत् ॥ २ ॥

इयं शुष्मेभिरिति। भरद्वाजस्यार्षम्, जगती। 'इयं' सर-
स्वती नदी 'शुष्मेभिः' बलैः। किङ्करोति? "विसखा इवारुजत्"
यथा विसखानको विसमनादरेणैव मृदुत्वात् खनति, एवमियम-
नादरेणव यदपि 'सानु' भवति समुच्छ्रितं वज्रसङ्घातकल्प
'गिरीणां' 'सानु' शिखरं तदपि 'तविषेभिः' विसखानक इवानाद-
रेणैव 'रुजति' भनक्तीत्यर्थः। येयमेवंगुणविशिष्टा तामेतां वयं
'पारावतघ्नीं' पारावारघातिनीं, सा हि 'ऊर्मिभिः' पारं चावारं च
उभे अपि हन्ति। 'अवसे' अवनाय रक्षणाय। आत्मनः कथ-

त्राम रक्षेदसावस्मानित्येवमर्थं पुरस्कृत्य 'सुवृक्तिभिः' सुप्रवृत्ताभिः' स्तुतिभिः स्वरसौष्ठवादियुक्ताभिः। किम्? 'सरस्वतीम् आविवासेम धीतिभिः' सरस्वतीमाभिमुख्येनावस्थिताः परिचरेम, 'धीतिभिः' "कर्मभिः" स्तुतिभिश्चानेकप्रकाराभिश्चेत्यर्थः। एष समस्तार्थः॥

अथैकपदनिरुक्तम्।—"शुष्ममिति बलनाम" तद्धि "शोषयतीति सतः" सत इति कारकावधारणम्। विपर्ययेणापि ह्यभिधानानामर्थो भवत्येवं मन्यमानो भाष्यकारो बलनामसु पठितमपि सदेतदभिधानमेवमाह शुष्ममिति बलनामेति। "विसं, विस्यतेर्भेदनकर्मणः तद्धि भिद्यते "वृद्धिकर्मणो वा"। वर्द्धते हि तत्। "सानु" समस्तं हि तत् "उच्छ्रितं भवति, समुन्नुन्नमिति वा" अथवा अर्द्धं नुन्नं प्रेरितं भवति। "पारं परं भवति" अवरस्मात् कूलात्, "आवारम् अवरम्" भवति परस्मात् कूलात्॥

अस्यामृचि तविषेभिः, ऊर्मिभिः, पारावतघ्नीम्—इत्येतद् विशेष्यलिङ्गं नदीसत्त्वं पश्यता भाष्यकारेण "अथैतन्नदीवत्"—इत्युक्ता इयमृगुपात्ता। सरस्वतीशब्दस्य नद्यभिधायकत्वे इयं पुनर्मैत्रायणीयके "उत्स्यानः सरस्वती"—इत्यस्य षडर्चस्योत्तमा। एतच्च पुनः षडर्चानुक्रमेण न "सारस्वतीं धेनुष्टरीमालभेत यः क्षेत्रे पशुषु वा विवदेत"—इत्येतस्य पशोः सम्पद्यते। सेयमनेन प्रकारेण सारस्वतस्य पशुहविषो याज्या भवति। एवञ्च सति इयमपि देवतावदित्येव समुपपद्यते, न त्वदेवता इज्यते। तदेवं कृत्वा भाष्यकारेण यदुक्तं "तद्यद्देवतावदुपरिष्टात् तद्व्याख्यास्यामोऽथैतन्न-

दीवत्"—इति तद्विरुध्यते ? तत्राक्तः समाधिः,—विभवो ह्यनु पक्षीणशक्तयो मन्त्रशब्दाः। प्रदर्शनमात्रमेतत् क्रियते। सर्वत्रैतन्मन्त्रशब्दानां योऽर्थ उपपद्यते स योज्यो यथासम्भवमिति। देवतापक्षे विनियोगानुविधानाभिप्रायेण सरस्वती माध्यमिका वाक्, सा गिरीणां मेघानां सानूनि भञ्जयत्यूर्मिभिः पारावारे द्यावापृथिव्यौ हन्तीति योज्यम्। तविषेभिरूर्मिभिः महद्भिरित्येवमादि च योज्यम्। "सुप्रवृक्ताभिः स्तुतिभिः सरस्वतीं कर्मभिः परिचरेम" गतार्थम्॥

"उदकनामान्युत्तराणि एकशतम्"। उदकस्य नामानि 'उदकनामानि', 'उत्तराणि' प्रकृतेभ्यो वाङ्नामभ्यः। मेघाश्रया हि वाक्, मेघोत्थं चोदकम्,—स्तनयित्नुशब्दपूर्वकञ्चेति वाङ्नामभ्य उत्तराण्युदकनामानि। कियन्ति पुनस्तानि ? 'एकशतम्' एकञ्च शतञ्च एकशतम् (१०१)। कतमानि पुनस्तानि ? "अर्णः, क्षोदः, क्षदुम"—इत्येवमादीनि। अरणशीलमर्णः। क्षिप्रमुनत्तीति क्षोदः। क्षीरिणमन्नं करोतीति क्षदुम। इत्येवमाद्यभ्यूहितव्यम्॥

आह,—"उदकं कस्मात्" ? उच्यते,—"उनत्तीति सतः" तद्धि यत्र गच्छति तत्र उनत्ति क्लेदयति। 'उन्दी क्लेदने (स्वा० प०)'। सत इति कारकावधारणं पूर्ववत्॥

"नदीनामान्युत्तराणि सप्तत्रिंशत्"। नदीनां नामानि 'नदीनामानि', 'उत्तराणि' इति प्रकृतेभ्य उदकनामभ्य उत्तराणि, नदीनामानि। कियन्ति पुनस्तानि ? 'सप्तत्रिंशत्' (३७)। कानि

पुनस्तानि ? "अवनयः, यह्वयः, खाः, सीराः"—इत्येवमादीनि। अवनतेन निम्नेन प्रदेशेन यान्तीत्यवनयः। ह्वयन्त्यो यान्तीति यह्व्यः। ख्यातव्या भवन्तीति खाः। सरन्तीति सीराः। एवमादि योज्यम्॥

आह,—"नद्यः कस्मात्" ? उच्यते,—"नदनाः" ह्येताः "भवन्ति" "शब्दवत्यः" शब्दसंयुक्ताः। किञ्च, "बहुलम्" "आसां" नदीनाम्, अन्यदेवतेषु मन्त्रेषु "नैघण्टुकं वृत्तम्" अप्रधानम्। "आश्चर्य्यमिव प्राधान्येन" क्वचिदेव नदीदेवतो मन्त्रः स्यात्। "तत्रेतिहासमाचक्षते"। यस्मिन् सूक्ते प्रधाना नद्य एव, तत्रेमं निदानभूतमितिहासमाचक्षते इति आचार्य्याः॥

"विश्वामित्रः" नाम "ऋषिः"। "सुदासः पैजवनस्य" राज्ञः "पुरोहितो बभूव"। "विश्वामित्रः सर्वमित्रः" सर्वस्यैव हि स मित्रं, सर्वमेव वा तस्य मित्रमिति विश्वामित्रः। "सर्वम्" —इति किमुक्तं भवति ? उच्यते,—तद्धि "संस्कृतं" भवति,—सङ्कृतं भवत्येकस्मिन्। "सुदाः कल्याणदानः" तस्य हि नित्यमेव प्रशस्तं दानं भवति। "पैजवनः पिजवनस्य पुत्रः"। "पिजवनः पुनः स्पर्द्धनीयजवः" तस्य हि स्पर्द्धार्हो जवो वेगः। अथ "वा" "अमिश्रीभावगतिर्वा" न तस्य मिश्रीभूतपूर्वा गतिरन्यैर्वेगवद्भिः, अतिशैघ्र्यात्। तस्य पैजवनस्य विश्वामित्रः पुरोहितो बभूव। "सः" पौरोहित्योपार्जितं "वित्तं" धनं "गृहीत्वा" "विपाट्छुतुद्र्योः" नद्योः "सम्भेदं" सङ्गमम् "आययौ" आगतवान्, यत्र विपाट्छुतुद्र्यौ इतराभिः सिन्ध्वादिभिर्नदीभिः सम्भिन्ने

एकीभूते इत्यर्थः। "अनुययुः" "इतरे" तदनुयायिनस्तत्स्करा वा। "स विश्वामित्रः" तास्तितीर्षुः "नदीः तुष्टाव"—"गाधाः" स्वल्पोदकाः यूयं "भवतेति"। एतमर्थं पुरस्कृत्य कथं पुनः स्तुष्टाव? "अपि द्विवत्" द्विवचनसंयुक्तैर्मन्त्रैः, "अपि बहुवत्" बहुवचनसंयुक्तैर्मन्त्रैः। "तत्" तत्र, एवं सति "यद् द्विवत्" द्विवचनवत्, "तत्" "उपरिष्टात्" चतुर्दशाध्याये "प्रपर्वतानाम् (ऋ० सं० ३, २, १२, १)"—इत्येतस्यामृचि "व्याख्यास्यामः"। "अथ" पुनः "एतद् बहुवत्" व्याख्यायते—॥२॥

रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्त्तमेवैः।
प्रसिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः॥
उपरमध्वं मे वचसे सोम्याय सोमसम्पादिन ऋतावरीरृत-
वत्य ऋतमित्युदकनाम प्रत्यृतं भवति मुहूर्त्तमेवैरयनैरवनैर्वा
मुहूर्त्तो मुहुर्ऋतुर्ऋतुरर्त्तेर्गतिकर्मणो मुहुर्मूलह इह कालो
यावदभीक्ष्णञ्चेत्यभीक्ष्णमभिक्षणं भवति क्षणः क्षणोतेः
प्रक्षणुतः कालः कालः कालयतेर्गतिकर्मणः प्राभिह्वयामि
सिन्धुं बृहत्या महत्या मनीषया मनस ईषया स्तुत्या प्रज्ञया
वावनाय कुशिकस्य सूनुः कुशिको राजा बभूव क्रोशतेः
शब्दकर्मणः क्रंशतेर्वा स्यात् प्रकाशयतिकर्मणः साधुविक्रो-
शयितार्थानामिति वा नद्यः प्रत्यूचुः॥ ३॥

रमध्वं मे वचस इति। त्रिष्टुभ एताः। "उपरमध्वं मे" उपेत्ययमुपसर्गो मन्त्रस्य मध्यादाकृष्य भाष्यकारेण रमध्वमित्यनेन क्रियापदेन योजितः। उपरमध्वं मम "वचसे" "सोम्याय सोमसम्पादिने" सोमा हि अनेनास्मद्वचसा देवतानामन्नभूता बहवः सम्पादिताः, ता यूयमस्मै प्रतिविशिष्टाय वचसे सत्यर्तार्थम्,—कथन्नाम सत्यमिदं स्यादित्येवमर्थमुपरमध्वम्, मन्दवेगा गाध्राश्च भवतेत्यभिप्रायः। हे "ऋतावरीः" उदकवत्यः। कियन्तं पुनः कालमुपरमध्वम्? "मुहूर्त्तम्" न च नित्यमेव मन्दवेगतां गाध्रोदकतां वा प्रार्थये, किन्तर्हि? यावदुत्तरेयमहं तावद्देवेत्यभिप्रायः। 'एवैः" एभिरुदकैरतिप्रवृद्धैरुपरमध्वम्। "अवनैर्वा" कामैरेतैरस्मत्प्रार्थनाविशेषैः—उत्तरेम, गृहान् गच्छेम, वित्तं प्रापयेम, इत्येवमाभिर्निमित्तैः प्रार्थ्यमाना अस्माभिरुपरमध्वम्। अथ वा "अयनैः" चित्रैर्गमनैर्वेगवद्भिर्यैर्यूयमभिप्रवृत्तास्तैरुपरमध्वम् मुहूर्त्तम्। यद्देवमविशेषेणोच्यमाना न शुश्रुवुः, तद्देवामुद्दिश्य प्रववृते वक्तुम्,—'सिन्धुमच्छ अच्छ'। अभेः स्थाने। 'अह्वे'—इत्येतत् पदमाकृष्य "प्र अभि ह्वयामि" इत्येवं योजितं भाष्यकारेण। किं प्राभिह्वयामि? "सिन्धुम्"। कया? "बृहती मनीषा' बृहत्या मनीषया" "मनस ईषया" मनःपूर्विकया "स्तुत्या" इत्यर्थः। अथ "वा" "प्रज्ञया"। कमर्थमिच्छन् अभिह्वयामि? 'अवस्य' अवनमिच्छन्, गमनमित्यर्थः। "कुशिकस्य सूनुः" अहमिति। पितुरपि गौरवान्मम गौरवमेताः कुर्य्युः इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"ऋतमित्युदकनाम"। तद्धि देशं देशं "प्रत्यृतं भवति" गतमित्यर्थः। "मुहूर्त्तो मुहुर्ऋतुः" एवं विगृह्य ऋतुशब्दं तावन्निर्ब्रवीति,—ऋतुरर्त्तेः", "गतिकर्मणः" गत्यर्थे वर्त्तमानस्य। स हि गच्छत्येव। अधुना मुहुःशब्दं निर्ब्रवीति,—"मुहुर्मूल्ह इव कालः" अल्पत्वात्। मूढ इव यः काल ऋतुः, स मुहूर्त्त इत्युच्यते। किञ्च "यावत्" एव "च अभीक्ष्णं" तावन्मुहूर्त्तः, यावांश्च मुहूर्त्तस्तावदभीक्ष्णमित्यर्थः। सारूप्यप्रसक्तं निरुच्यते,—"अभीक्ष्णमभिक्षणं भवति" तद्धि क्षणमाभिमुख्येन स्थितं भवति। "क्षणं क्षणोतेः" हिंसार्थस्य (तना० उ०)। स हि "प्रक्षणुतः" प्रकर्षेण हिंसितः "कालः" अल्पत्वात्। "कालः कालयतेर्गतिकर्मणः"। स हि सर्वाण्येव भूतानि कालयति क्षयं नयतीत्यर्थः। "कुशिको राजा"—इति तत्त्ववचनम्। "क्रोशतेः" वा शब्दार्थस्य (भू० प०)' स हि साध्वेव क्रियतामिति नित्यकालमेव क्रोशति। "क्रंशतेर्वा स्यात्" प्रकाशयत्यर्थस्य, स हि प्रकाशयिता साधूनां धर्माणामात्मनैव प्रकाशकः। अथ "वा" "साधुविक्रोशयितार्थानामिति" साधुषु ब्राह्मणेषु विक्रोशयिता अर्थानां दातेत्यर्थः॥

एवमुक्तवन्तं "नद्यः प्रत्यूचुः"—॥ ३ ॥

इन्द्रो अस्माँ अरदद्वज्र बाहुरपाहन् वृत्रं परिधिं नदीनाम्। देवोऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम

उर्वीः ॥ इन्द्रो अस्मानरदद्वज्रबाहु रदतिः खनति कर्मा-
पाहन् वृत्रं परिधिन्नदीनामिति व्याख्यातम् । देवोऽनय-
त्सविता सुपाणिः । कल्याणपाणिः पाणिः पणायतेः
पूजाकर्मणः प्रगृह्य पाणी देवान् पूजयन्ति । तस्य वयं
प्रसवे याम उर्वीः । उर्व्य ऊर्णोतेर्वृणोतेरित्यौर्णवाभः
प्रत्याख्यायान्तत आशुश्रुवः ॥ ४ ॥

इन्द्रो अस्माँ अरददिति । "अरदत्" अखनदित्यर्थः । "रदतिः खनतिकर्मा" । कथम्पुनरखनत् ? "अपाहन् वृत्रम्" अपावधीत् मेघम् । "परिधिं नदीनाम्" नदनानामपाम् । स हि नियतं तिरयोर्निरुणद्धि, तमिन्द्रो वज्रेण हन्ति, तस्मिन् हते पृथिवी प्राप्यापो यथा निम्नानुसारिण्यः खातानि कुर्वन्त्यो वहन्ति, तैः खातैर्वयं गच्छामः । एवं कृत्वा 'अस्मान् इन्द्रः अरदत्' । एवञ्च कृत्वा स एव इन्द्रः 'देवः' 'सविता' सर्वार्थप्रसविता वर्षद्वारेणा-स्मान् 'अनयत्' समुद्रम् । 'सुपाणिः' प्रशस्तपाणिरित्यर्थः । यत एव सोऽस्माकं खनिता नेता च, अतः 'तस्य' इन्द्रस्य 'प्रसवे' अनुज्ञायामादेशे वर्त्तमाना वयं 'यामः' गच्छामः 'उर्वीं' ऊर्णुवत्यः सम्भजमाना वा । तानि तानि देशान्तराणि अम्भोभिः । सोऽ-स्माकमीश्वरः । स एवास्मानाज्ञापयितुमर्हति, न त्वमित्यभिप्रायः ॥

"पाणिः पणायतेः" पूजार्थस्य । "प्रगृह्यपाणी" संयती कृत्वा ततः "देवान् पूजयन्ति" इति ॥

"प्रत्याख्याय" एवं तमृषिं तत्सूक्तस्य "अन्ततः" अन्ते अन्यर्चा "आशुश्रुवुः" ता नद्यः श्रुतवत्य इत्यर्थः—॥ ४ ॥

आ ते कारो शृणवामा वचांसि ययाथ दूरादनसा रथेन । नि ते नंसै पीप्यानेव योषा मर्य्यायेव कन्या शश्वचै ते ॥ आशृणवाम ते कारो वचनानि याहि दूरादनसा च रथेन च निनसाम ते पाययमानेव योषापुत्रं मर्य्यायेव कन्या परिष्वजनाय निनमा इति वाश्वनामान्युत्तराणि षड्विंशतिस्तेषामष्टा उत्तराणि बहुवदश्वः कस्मादश्नुतेऽध्वानं महाशनो भवतीति वा तत्र दधिक्रा इत्येतद् दधत् क्रामतीति वा दधत् क्रन्दतीति वा दधदाकारी भवतीति वा तस्याश्ववद् देवतावच्च निगमा भवन्ति तद्यद्देवतावदुपरिष्टात्तद्व्याख्यास्यामोऽथैतदश्ववत् ॥ ५ ॥

आ ते कारो इति । तदा श्रुतं भवति, यदा तद्वचः क्रियते, श्रूयमाणमपि हि तन्नैव श्रुतं भवति, यन्न क्रियते । 'आ ते कारो शृणवाम' आभिमुख्येनावस्थिताः सत्यः शृणवाम हे 'कारो' स्तोमानां कर्त्तः ! किमाशृणवाम ? 'वचांसि' । अतो ब्रूमः;—"ययाथ" याहि त्वम् । 'अनसा' शकटेन सह 'रथेन' च । कस्मात् पुनरेवमादरवत्यो ब्रूमः याहीति ? इतः;—यस्मात् 'दूरात्' आयातस्त्वं परिश्रान्तः, तस्मात्कारुण्यं नस्त्वयि । तेन

वयमेता 'नि ते नंसै' "निनमाम ते"। नीचैर्नमाम गाधोदका भवामेत्यर्थः। कथम्पुनर्निनमाम ? 'पीप्यानेव योषा' "पाययमानेव योषा पुत्रं" यथा निनमेदेवं वयं तव निनमाम। एवमुक्त्वा पुत्रोपमया कदाचिदय क्रोधमियादिति मन्वानाः सत्यः पतिकन्यासम्बद्धामन्यामुपमामुपाददिरे,—"मर्य्यायेव कन्या शश्वचै ते" 'मर्य्याय' मनुष्याय 'कन्या' नवोढ़ा 'शश्वचै ते' "परिष्वजनाय" कथं नाम परिष्वजेत मामयमित्यभिप्रायेण यथा सा निनमेदेवं वयं तव निनमाम। "निनमा इति वा" "यदि वा" निनमा इत्येवं परिणामः निनंसै इति एतस्य पदस्य अथ वा निनमै इति॥

अश्वनामान्युत्तराणि षड्विंशतिः। अश्वस्य नामानि 'अश्वनामानि' 'उत्तराणि' प्रकृतेभ्यो नदीनामभ्यः, अब्जा एव ह्यश्वाः। एवं ह्युक्तम्,—"अप्सु जाता अश्वाः स्वादेवैतान् योनेर्जनयन्ति" इति। तस्मान्नदीनामभ्य उत्तराण्यश्वनामानि। कियन्ति पुनस्तानि ? 'षड्विंशतिः' षडधिका विंशतिः (२६)। कतमानि पुनस्तानि ? "अत्यः, हयः, अर्वा"—इत्येवमादीनि। अतति गच्छतीत्यत्यः। हयति गच्छतीति, हन्ति वाध्वानमिति हयः। ईरणवानर्वा, गमनवानित्यर्थः। एवमादि॥

"तेषाम्" अश्वनाम्नाम् "अष्टौ" यानि "उत्तराणि" अव्ययय इत्येवमादीनि, तानि "बहुवत्" बहुवचनसंयुक्तानीत्यर्थः॥

आह,—"अश्वः कस्मात्" ? उच्यते,—"अश्नुते ऽध्वानं" व्याप्नोतीत्यर्थः। "महाशनो वा भवति इति" स हि बहु भुङ्क्ते।

"तत्र" तस्मिन् षड्विंशके अश्वाभिधानगणे "दधिक्रा इत्येतत्" पदं सन्दिग्धम्। तत् पुनरेतत्—"दधत् क्रामतीति" धारयन्नयमश्वारोहं क्रामतीति दधिक्राः? अथ "वा" "दधत्" धारयन्नयमश्वारोहं "क्रन्दति" शब्दं करोति "इति" दधिक्राः? अथ "वा" "दधत्" धारयन् अयमश्वारोहम् "आकारी" आकारवान् "भवतीति" दधिक्राः?—स हि अधिरूढेऽश्वारोहे आकुञ्चितग्रीवो विपुष्पितसर्वगात्र आकृतिमान् भवति॥

"तस्य" दधिक्राशब्दस्य "अश्ववत्" अश्वसंयुक्ताः, "देवतावत्" देवतासंयुक्ताः "च" "निगमा भवन्ति"। "तत्" एतदुच्यते,—"यद् देवतावत्" अस्य दधिक्राशब्दस्य, "तत्" "उपरिष्टात्" पञ्चदशेऽध्याये "आ दधिक्राः शवसा (ऋ० सं० १०, ६, १६, १)"—इत्यस्यामृचि "व्याख्यास्यामः"। "अथ" पुनर्यत् "अश्ववत्" अस्य, तत् "एतत्" व्याख्यायते—॥ ५॥

उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि। क्रतुं दधिक्रा अनु सन्तवीत्वत् पथामङ्कांस्यन्वापनीफणत्॥ अपि स वाजी वेजनवान् क्षेपणमनु तूर्णमश्नुतेऽध्वानं ग्रीवायां बद्धो ग्रीवा गिरतेर्वा गृणातेर्वा गृह्णातेर्वापि कक्ष आसनीति व्याख्यातम्। क्रतुं दधिक्राः कर्म वा प्रज्ञां वा। अनुसन्तवीत्वत्। तनोतेः पूर्वया प्रकृत्या निगमः। पथामङ्कांसि पथां कुटिलानि पन्थाः पततेर्वा

पद्यतेर्वा पन्थतेर्वाङ्क्तोऽश्नुतेरापनीफणदिति फणतेश्चर्करीतवृत्तं दशोत्तराण्यादिष्टोपयोजनानीत्याचक्षते साहचर्य्यज्ञानाय ज्वलतिकर्मीण उत्तरे धातव एकादश तावन्त्येवोत्तराणि ज्वलतो नामधेयानि नामधेयानि ॥ ६ ॥

उत स्य वाजीति। गोतमपुत्रस्य वामदेवस्येयमार्षम्। जगती। वाजपेये वाजियुक्तं रथमधिरुह्य यजमानोऽनुवाकं जपति, तत्रैषा। "उत स्यः" "अपि सः" इत्यर्थः। "वाजी वेजनवान्"। 'ओ विजी भयचलनयोः (रु० प०)'। भयवान् परेभ्यो भयदाता, परेषां हि तं दृष्ट्वा भयमुत्पद्यते। चलनवान् वा, स हि नित्यं चलनशीलः। क्षिपणिं' "क्षेपणम् अनु" कशाघातमनु "तूर्णमश्नुतेऽध्वानम्" व्याप्नोतीत्यर्थः। अपि कशाप्रहारमनु 'तुरण्यति' अप्यनाहत एवेत्यऽपिशब्दः। किञ्च "ग्रीवायाम्" उरसि वक्षेण "वद्धः"। "अपि कक्षे" कक्ष्यया। अथ "आसनि" मुखे खलीनेन वद्धः। एवमनेकेषु स्थानेषु वद्धः। तथापि तुरण्यत्येव। अन्यो हि एकस्मिन्नपि प्रदेशे वद्धः चलितुमपि न शक्नोति, किमुत त्वरितुम्। किञ्च, "क्रतुम्" आत्मीयं गमनं "कर्म वा प्रज्ञां वा" अश्वारोहस्य सन्तनोति काममभिप्रेतार्थेन शीघ्रगामित्वात् "दधिक्राः" अश्वः अनुसन्तनोतीत्यर्थः। किञ्च यान्यपि च कानिचित् "पथां" मार्गाणाम् "अङ्कांसि" अञ्चितानि कुटिलानि सन्ति, तान्यपि अनुलोमानीव कुर्वन् आशुगामित्वात्। आभिमुख्येन पुनः पुनर्भृशं वा फणति गच्छतीत्यर्थः॥ एष समस्तार्थः॥

अथैकपदनिरुक्तम् ।—"ग्रीवा, गिरतेर्वा गिलनार्थस्य (तु० प०), तया हि गिलत्यन्नम् । "गृणातेर्वा" शब्दार्थस्य (क्या० प०), तया हि शब्दो गीर्य्यते । "गृह्णातेर्वा" (क्या० उ०) तया ह्य दकादि गृह्यते, यः शृङ्खलीक्रियते । "अनुसन्तवीत्वत्" इति, "तनोतेः धातोः (त० प०) "पूर्वया प्रकृत्या निगमः । षड्विधो हि धातुः । "प्रकृत्यन्तः, सनन्तश्च, यङन्तो, यङ्लुगेव च । ण्यन्तो, ण्यन्तसनन्तश्च, षड्विधो धातुरुच्यते ॥" आसां षण्णां धातुप्रकृतीनां या पूर्वा प्रकृतिस्तयैष निगमः, न सन् प्रकृतीत्यादीनामन्यतमया । "पन्थाः, पततेर्वा पद्यतेर्वा पन्थतेर्वा" त्रयोऽपि ह्येते गत्यर्थाः, एषामन्यतमस्य । "अङ्कः सञ्चतेः" गत्यर्थस्य । "आपनीफणदिति" "फणतेः" गत्यर्थस्य चर्करीतान्तत्वेन वृत्तम् ॥

"दश" यानि "उत्तराणि" नामानि, तान्यश्वनामसम्बन्धेनैवोच्यन्ते तान्यपि ह्यश्वानामेवेति । तानि पुनः "आदिष्टोपयोजनानि"—"इति" एवम् "आचक्षते" आचार्य्याः । इदमिन्द्रस्याश्वानां नाम, इदमग्नेः, इदमादित्यस्य,—इत्येवमादिष्टोपयोजनानि । कतमानि पुनस्तानि ? "हरी इन्द्रस्य"—इत्येवमादीनि । हरी हरितवर्णौ इन्द्रस्याश्वौ । "रोहितोऽग्नेः" रोहितवर्णौ । इत्येवमादि ॥

"ज्वलतिकर्माण उत्तरे धातव एकादश" । य एव ह्यश्ववन्तो भवन्ति, त एव ज्वलन्तीव तेजसा, ततोऽश्वनामभ्य उत्तरे ज्वलत्यर्था धातवः । कतमे पुनस्ते ? इति । "भ्राजते, भ्राशते, भ्राश्यति"—इत्येवमादयः ॥

"तावन्त्येवोत्तराणि" "जमत्, कल्मलीकिनम्, जञ्जणा भवन्"—इत्येवमादीनि "ज्वलतो नामधेयानि"। जमति गच्छतीति "जमत्"। कमहं मलिनं शोधयामीति "कल्मलीकिनम्"। जनं भावयतीति "जञ्जणाभवन्"। इत्येवमादि॥

अध्यायपरिसमाप्त्यर्थो द्विरभ्यासः॥ ६॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य सप्तमः पादः॥ ७॥

इति जम्बुमार्गनिवासिनः आचार्य्यभगवद्दुर्गस्य

कृतौ ऋज्वर्थायां निरुक्तवृत्तौ सप्तमोऽध्यायः

(द्वितीयोऽध्यायः) समाप्तः॥ २॥

१ २ ३ ४ ५

(अथनिर्वचनमोघोराज्ञोविद्याहवा अथातोऽनुक्रमिष्या-

६ ७ ८ ९ १० ११

मोवृक्षेवृक्षेतावांवास्तूनियङ्चकारायंशशिङ्क्ते हिरण्यनामान्या-

१२ १३ १४ १५ १६

ष्टिंपेणोयद्वेवापिःसाधारणानिस्वरादित्यो रश्मिनामान्यतिष्ठ-

१७ १८ १९ २० २१ २२

न्तीनांदासपत्नीरात्रिनामानीदंश्रेष्ठरुशद्वत्साहश्वकृष्णंदेवानां-

२३ २४ २५ २६ २७ २८

मानेवाङ्नामानीयंशुष्मेभीरमध्वंम इन्द्रो अस्मानातेकारो

उतस्योऽष्टाविंशतिः॥)

इति निरुक्ते पूर्वषट्के द्वितीयोऽध्यायः॥२॥

—०—

अथ तृतीयाध्यायस्य

प्रथमः पादः ।

ॐ३म् । कर्मनामान्युत्तराणि षड्विंशतिः कर्म कस्मात् क्रियत इति सतोऽपत्यनामान्युत्तराणि पञ्चदशापत्यं कस्मादपततं भवति नानेन पततीति वा तद्यथा जनयितुः प्रजैवमर्थीये ऋचा उदाहरिष्यामः ॥ १ ॥

"कर्मनामान्युत्तराणि षड्विंशतिः"। कर्मणो नामानि 'कर्मनामानि' 'उत्तराणि'—इति प्रकृतेभ्यः। ज्वलत्येवासौ कर्माणि क्रियन्त इति ज्वलेन्नामभ्यः उत्तराणि कर्मनामानि। कियन्ति पुनस्तानि ? 'षड्विंशतिः' षड़धिका विंशतिः (२६)। कतमानि पुनस्तानि ? "अपः, अप्नः, दंसः"—इत्येवमादीनि। आप्यते पुरुषेणैतत्, आप्नोति वा पुरुषमेतदिति "अपः"। "अप्नः" —इत्येतदप्याप्नोतेरेव। एवमादि योज्यम्॥

आह,—"कर्म कस्मात्" ? उच्यते'—"क्रियत इति सतः"। सत इति कारकावधारणार्थमिति ॥

"अपत्यनामान्युत्तराणि पञ्चदश"। अपत्यस्य नामानि 'अपत्यनामानि' 'उत्तराणि'—इति प्रकृतेभ्यः कर्मनामभ्यः। सर्व-

कर्मणां ह्यपत्योत्पादनकर्मैव प्रधानमृणापाकरणद्वारेणेति कर्मनामभ्य उत्तराणि अपत्यनामानि। कियन्ति पुनस्तानि? 'पञ्चदश'। कतमानि पुनस्तानि "तुक्, तोकम्, तनयम्"—इत्येवमादीनि। "तुक्" तकतेर्धातोस्तुज्यतेर्वा। "तोकं" तुज्यतेः। "तनयं" तनोतेरिति वक्ष्यति॥

आह,—"अपत्यं कस्मात्"? उच्यते—"अपततं भवति" पितुः सकाशादेत्य पृथगिव ततं भवति। अथ "वा" "अनेन" जातेन सता पितरो नरके "न पतन्तीति"—इत्यपत्यम्॥

अत्र पुनर्विवदन्ते,—द्वयोः सन्निपाते किं क्षेत्रिणोऽपत्यमुत वीजिनः? इति। "तत्" एतदुच्यते,—"यथा जनयितुः" एव "प्रजा" भवति, "एवमर्थीये ऋचाद्युदाहरिष्याम."—॥ १॥

परिपद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्यामः। न शेपो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः॥ परिहर्त्तव्यं हि नोपसर्त्तव्यमरणस्य रेक्णोऽरणोऽपार्णो भवति रेक्ण इति धननाम रिच्यते प्रयतो नित्यस्य रायः पतयः स्याम। पित्र्यस्येव धनस्य न शेपो अग्ने अन्यजातमस्मि। शेप इत्यपत्यनाम शिष्यते प्रयतोऽचेतयमानस्य तत्प्रमत्तस्य भवति मा नः पथो विदूदुप इति तस्योत्तरा भूयसे निर्वचनाय॥ २॥

"परिषद्यं हि" "न ग्र भाय"—इति च (२, ३ख०)। एते त्रिष्टुभौ। वसिष्ठाग्निसंवादे वसिष्ठेन हृतपुत्रेण अग्निरभ्यर्थितः —पुत्रं मे देहोति। तेन किलासौ प्रत्युक्तः,—क्रीतकृत्रिमदत्त-कार्दानां पुत्राणामन्यतमं कुरुष्व पुत्रमिति। स एवमुक्तः, एताभ्यामृग्भ्यामन्यजान् पुत्रान् निन्द्यौरसं पुत्रं ययाचे। "परि-षद्यं०—०वि दुक्षः"। (ऋ० सं० १०, ८, ६, २) 'परिषद्य' "परिहर्त्तव्य" परिहरणीयं परित्याज्यमित्यर्थः। किम्पुनस्तत्? "अरणस्य रेक्णः" 'अरणस्य' अपगतार्णस्य अपगतोदकसम्बन्धस्य परकुलजातस्य 'रेक्णः' यद्पत्याख्यं धन, तन् परिहर्त्तव्यम्, न पुत्रत्वेन परिकल्पयितव्यमित्यर्थः, न हि तत् पुत्रत्वेन कल्प्यमान-मपि पुत्रकार्य्येष्ववतिष्ठति, परकीयत्वात्। यत एवमतो ब्रूमः, —"नित्यस्य रायः पतयः स्याम" "पित्र्यस्येव धनस्य"। यथा हि यदेव पित्र्यं धनं पुत्रत्वे भवति, तस्यैव ह्यपरि अगौणं स्वामित्वं भवति। एवं यदेव स्वयञ्जातमपत्यं भवति, तदेव मुख्यं भवति, नेतरत्—क्षेत्रजं वा क्रीतकं वा। यत एवमतो ब्रूमः,—यदेव नित्यमात्मीयमगौणं स्वयमुत्पादितं पुत्राख्यं रायः धनम्, तस्यैव वयं पतयः पालयितारः स्याम, मा परकीयस्येत्य-भिप्रायः। कस्मात् पुनरेवं ब्रूमहे? इतः,—यस्मात् "न शेपो अग्ने अन्यजातमस्ति"। 'न अस्ति शेपः' नास्त्यपत्यमन्येन जातं हे 'अग्ने!' य एव जनयति तस्यैव हि तद् भवति, नेतरस्येत्यभि-प्रायः। 'अचेतनस्य' य एव हि अचेतयमानो भवति, अविद्वान्, प्रमादी, तस्यैव "अचेतयमानस्य" "प्रमत्तस्य" अश्रुतवतो धर्मात्

परितोषमात्रं "भवति"—ममेदमपत्यमिति, न अपत्यकार्य्येऽवतिष्ठते। यत एवमतो ब्रूमः,—'मा पथो विदुक्षः' मास्मानेतत् पितृपितामहप्रपितामहानुसन्ततात् 'पथः' मार्गात्, येन केनचित् प्रत्याख्यानद्वारेण "विदूदुष." । त्वं देहि नः पुत्रमौरसमित्यभिप्रायः ॥ इति समस्तार्थः ॥

अर्थैकपदनिरुक्तम्। "अरणोऽपार्णः" अपगतोदकसम्बन्ध इत्यर्थः। "रेक्ण इति धननाम" तद्धि "रिच्यते" अतिरिच्यते इतो लोकादमुं लोकं "प्रयत." म्रियमाणस्येत्यर्थः। "शेष इत्यपत्यनाम" तद्धि "शिष्यते" इहैव लोकेऽवतिष्ठते पितुरमुं लोकं 'प्रयतः' गच्छत इत्यर्थः ॥

एवमस्यामृचि 'न शेषो अग्ने अन्यजातमस्ति'—इत्यनेन विशेषलिङ्गेन उपपन्नमेतद् भवति,—जनयितुरेव प्रजा भवति न क्षेत्रिणो नापि केतुरन्यस्य वा कस्यचिदिति। एवञ्चैष शब्दार्थ उपपद्यते,—यस्मादेवापेत्य ततं भवति, तस्यैवापत्यमिति ॥

अनेनैव चापत्यशब्दनिर्वचनप्रसङ्गेनैव मन्त्रो व्याख्यातः, उत्तरश्च सावशेषमपत्यशब्दे प्रसक्तानुप्रसक्तमेवोच्यते,—"तस्य उत्तरा भूयसे निर्वचनाय"—॥ २ ॥

न हि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा उ। अधा चिदोकः पुनरित्स एत्या नो वाज्यभीपालेतु नव्यः ॥ न हि ग्रहीतव्यो अरणः सुसुखतमोऽप्यन्यादर्य्यो मनसापि न मन्तव्यो ममायमित्यथ स ओकः पुनरेव

तदेति यत आगतो भवत्योक इति निवासनामोच्यत । ऐतु नो वाजी वेजनवानभिषहमाणः सपत्नान्नवजातः स एव पुत्र इत्यथैतां दुहितृदायाद्य उदाहरन्ति पुत्रदायाद्य इत्येके ॥ २ ॥

न हि ग्रभायेति । "न हि ग्रहीतव्यः" नाङ्गीकर्त्तव्यः, पुत्रो ममायमित्यनेनाभिप्रायेण । कः पुनरसौ नात्मीयीकर्त्तव्यः ? "अरणः" अपार्णः, अपगतोदकसम्बन्धः, अन्यकुलजः । यद्यपि "सुशेवः" एव स्यात् "सुखतमः" परिचरिनो हितैषी, तथा "अपि" "अन्योदर्य्यः" अन्येनोदीरिताद्रेतसो जातः, अन्यजायोदरसम्भूतो वा, यो हि स्वस्यां जायायां सम्भवति, स स्व एवोदरे सम्भूतो भवति । "अर्द्धो ह वा एष आत्मनो यज्जायेति विज्ञायते" । तस्माद् योऽन्यजायोदरसम्भूतः, सः "मनसापि न मन्तव्यो ममायमिति" किम्पुनः पुत्रत्वेन परिकल्पयितव्य इति । किङ्कारणं मनसापि न मन्तव्य इति । "अधा चिदोकः पुनरित्स एति" । अधःशब्दोऽथशब्दस्यार्थे वर्त्तते, स च हेत्वर्थः । यस्मात् "ओकः" स्वं निवासस्थान स्वं वंशं बहुनापि कालेन स एति—तद्वंश्य एव भवति, तस्मादपुत्र एवासौ । यत एवमतो ब्रवीमि, —'आ नो वाज्यभीषालेतु नव्यः' । "ऐतु" आगच्छतु, "नः वाजी वेजनवान्" परेभ्यो भयदाता 'अभीषाट्' "अभिषहमाणः" अभिभवन् "सपत्नान्" 'नव्यः' "नवजातः" शिशुरित्यर्थः । "स एव पुत्रः" आगच्छतु, न परकीयैः पुत्रैः सङ्कल्पितैरित्यभिप्रायः ॥

"अथैतां दुहितृदायाद्य उदाहरन्ति"। इदमुक्तम्,—अपेत्य यस्मात् पितुः सकाशात् ततं भवति, तस्मादपत्यमिति तदिदमुभयोरपत्यं प्राप्नोति दुहितुः पुत्रस्य च, दुहितापि ह्यपेत्येव ततो भवति पितुः सकाशात्। तत्रैवं सति उभयोर्दुहितृपुत्रयोरपत्यकार्य्याणि दायाद्यादीनि अविशेषेण प्राप्नुवन्ति, तदिदं विचार्य्यते। तदधिकारार्थोऽयमथशब्दः। एतामृचं शासद्वह्निरित्यादि या वक्ष्यमाणा (४ ख०) ताम्, दुहितुर्दायाद्ये अर्थे उदाहरन्ति धर्मविदः। अस्यामृचि वक्ष्यमाणायां (४ख०) दुहितुरपि दायाद्यत्वमस्तीति दृश्यते॥

"पुत्रदायाद्य इत्येके" एके पुनर्धर्मविदो मन्यन्ते यत् पैतृकं वित्तं तत् पुत्रस्यैव दायाद्यं न दुहितुरिति॥

यथा दुहितापि दायाद्यमर्हति, तथेयमृग् निरुच्यते,—॥३॥

शासद्वह्निर्दुहितुर्नप्त्यङ्गाद्विद्वाँ ऋतस्य दीधितिं सपर्य्यन्। पिता यत्र दुहितुः सेकमृञ्जन् संशग्म्ये न मनसा दधन्वे॥ प्रशास्ति वोलूहा सन्तानकर्मणे दुहितुः पुत्रभावं दुहिता दुहिता दूरे हिता दोग्धेर्वा नप्तारमुपागमद् दौहित्रं पौत्रमिति विद्वान् प्रजननयज्ञस्य रेतसो वा अङ्गादङ्गात् सम्भृतस्य हृदयादधिजातस्य मातरि प्रत्यृतस्यं विधानं पूजयन्नविशेषेण मिथुनाः पुत्रा दायादा इति तदेतद्वक्-श्लोकाभ्यामभ्युक्तम्। अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे।

आत्मा वै पुत्रनामासि स जीव शरदः शतमित्यविशेषेण पुत्राणांदायो भवति धर्मतः।, मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत् ॥ न दुहितर इत्येके तस्मात् पुमान् दायादोऽदायादा स्त्रीति विज्ञायते तस्मात् स्त्रियं जातां परास्यन्ति न पुमांसमिति च स्त्रीणां दान-विक्रयातिसर्गा विद्यन्ते न पुंसः पुंसोऽपीत्येके शौनःशेपे दर्शनात्। अभ्रातृमतीवाद इत्यपरम्। (अमूर्या यन्ति जामयः सर्वा लोहितवाससः।) अभ्रातर इव योषास्तिष्ठन्ति हतवर्त्मनः। अभ्रातृका इव योषास्तिष्ठन्ति सन्तानकर्मणे पिण्डदानाय हृतवर्त्मान इत्यभ्रातृकाया अनिर्वाह औपमिकस्तस्योत्तरा भूयसे निर्वचनाय ॥ ४ ॥

शासद्वह्निरिति। एषा त्रिष्टुप्। ऐन्द्रे सूक्ते विश्वामित्री। माध्यन्दिने सवने उक्थपर्य्याये अच्छावाकस्य यच्छस्त्रमभिजिद्विश्वजिदादिष्वहीनकेष्वहःसु अहीनसूक्तं नाम, तत्रेयं शस्यते। "न जामये तान्व (५ ख०)"—इतीयमपि अनयैव समानार्षविनियोगदैवतच्छन्दस्का। 'शासद् वह्निः' "प्रशास्ति" प्रख्यापयति प्रज्ञापयतीत्यर्थः। कः पुनरसौ प्रशास्ति? किं वा प्रशास्ति? इति। "वोढा" य उद्वोढा स्त्रिया भवति सः, तस्यां या जायते दुहिता, तस्याः पुत्रभावं प्रशास्ति,—"सन्तानकर्मणे" अर्थाय।

"दुहिता, दुर्हिता" सा हि यत्रैव दीयते, तत्रैव दुर्हिता भवति, "दूरे" सती सा पितुः "हिता" पथ्या भवतीति दुहितेत्युच्यते। "दोग्धेर्वा" सा हि नित्यमेव पितुः सकाशात् द्रव्यं दोग्धि प्रार्थनापरत्वात्। आह,—कथं पुनर्गम्यते प्रशास्ति चोढा सन्तानकर्मणे दुहितुः पुत्रभावम्? इति। उच्यते,—इतः। यस्मात् 'नप्त्यङ्गात्' "नप्तारमुपागमत्" उपागच्छति चेतसा। "दौहित्रम्" दुहितृपुत्रम्। "पौत्रमिति" पुत्रो ममायमिति एवमुपागच्छति? न चापुत्रस्य पौत्रः स्यात्, उपागच्छति च दुहितुः पिता ममायमिति दौहित्रम्। तस्माद् दुहितापि पुत्र एव, यस्याः पुत्रः पौत्रो ममायमित्येवं चेतसा उपगम्यते। 'विद्वाँ ऋतस्य दीधितिं सपर्य्यन्'। 'विद्वान्' कस्य? 'ऋतस्य "प्रजननयज्ञस्य"'। ऋत इत्येदपठितं यज्ञनाम। 'दीधितिं' विधानमित्यर्थः। प्रजननयज्ञविधानमभिशेषेण 'सपर्य्यन्' पूजयन्नित्यर्थः। यथैव हि पुत्रजनने प्रजननयज्ञस्तन्यते तथैव हि दुहितृजननेऽपि, —यैरेव मन्त्रैर्यैनैव च विधानेन पुत्रगर्भ आधीयते, तैरेव मन्त्रैस्तेनैव च विधानेन दुहितृगर्भोऽपि। अथ "वा" ऋतशब्देन रेत उच्यते। तत् "अङ्गादङ्गाद्" यत् सम्भूतं तत् सर्वगात्रेभ्यः हृदयानुस्मरणनिमित्तेन गर्भजनने "मातरि" प्रत्यृतं प्रवृत्तं भवति रेतः, तस्य "रेतसः" "विधानं न विशेषेण पूजयन्" स चोढा दौहित्रं पौत्रो ममायमित्येवमुपगच्छति चेतसा। येनैव हि विधानेन पुत्रजनने रेत उत्सृज्यते, तेनैव हि दुहितृजननेऽपि, तत्रैवं सति रेत उत्सर्गविध्यविशेषात् प्रजननयज्ञावशेषाद्वा अवि-

शेषेण मिथुनाः पुरुषाः स्त्रियश्च उभयेऽपि दायादा इत्येवमेके धर्मविदो मन्यन्ते। तदेतत् "ऋक्श्लोकाभ्याम्" "अभि" आभिमुख्येन "उक्तम्"—"मिथुनाः पुत्रा दायादा इति" "अङ्गादङ्गात् सम्भवसि (गो० गृ० सू० २, ८, २१)" "अविशेषेण पुत्राणाम्" —इत्येताभ्याम्॥

'शासद्वहिः'—इत्येतस्या ऋचः प्रथमोऽर्द्धर्चो व्याख्यातः, 'पिता यत्र दुहितुः'—इत्ययं द्वितीय उपरिष्टादस्य पादस्य व्याख्यास्यते। अनयोरर्द्धर्चयोरन्तरा तदेतद्ऋक्श्लोकाभ्यामभ्युक्तमित्यत आरभ्य प्रसक्तानुप्रसक्तं दायाद्यधर्माश्रितमेव पूर्वोत्तरपक्षसम्बन्धादाचारगत बहु व्याख्यायते मन्त्रविषयख्यापनाय, ईदृशोऽपि मन्त्राणां विषयो भवतीति धर्मसंविज्ञानाय च। सर्व एवायमेवंप्रकारो धर्मो मन्त्रेभ्य एव निर्वर्भावित्येतदेतेन ख्यापितं भवति॥

"अङ्गादङ्गात् सम्भवसि"—इत्येतामृचं प्रवासादेत्य पुत्रस्य मूर्द्धनि जपन् जिघ्रति। अनुष्टुबेषा। स पुत्र उच्यते,— हे 'पुत्र!' 'अङ्गात् अङ्गात् सम्भवसि' त्वं 'हृदयात्' च 'अधिजायसे' यत्तदुक्तम्—"अङ्गादङ्गात्सम्भूतस्य हृदयादधिजातस्य" —इति। तदनेनापि स्पष्टार्थतरेण मन्त्रेणोच्यत इति पूर्वस्यास्पष्टार्थतायां स्पष्टार्थीकरणार्थं मन्त्रः। तत्र हि 'ऋतस्य दीधितिं सपर्य्यन्'—इत्यत्र 'ऋतस्य'" प्रजननयज्ञस्य रेतसो वा" "विधानं" "अविशेषेणपूजयन्"—इत्युक्तम्, तत् पुनरेतदस्पष्टम्, इह पुनरङ्गादङ्गात् सम्भवसि हृदयादधिजायसे

इत्येवमुच्यते। तत्रैवं सति यथैव पुमान् अङ्गादङ्गात् सम्भवति हृदयाच्चाधिजायते, तथैव दुहितापीत्यविशेष उपपद्यते। तस्मात् साधूक्तम्—"अविशेषेण मिथुनाः पुत्रा दायादा इति"। 'आत्मा वै पुत्रनामासि' यस्मादङ्गादङ्गात् सम्भूतस्त्वं हृदयादधिजातस्तस्मादात्मैव त्वं ममैवावयवभूत इत्यभिप्रायः। केवलं तु पुत्रनामा त्वम्, अहं पितृनामा, एतावानावयोर्विशेषो नाममात्रं भिन्नमित्यभिप्रायः। 'सः' त्वं 'जीव शरदः शतम्'—इत्याशीः। सर्वस्मिन्नपि संवत्सरे शरदे बहुजीवाः प्रचुररोगा भवन्ति, तस्माच्छरदः, तस्माच्छरद्येवोपलक्ष्य संवत्सरशतमेतदायुराशास्यते॥

'अविशेषेण पुत्राणां दायो भवति धर्मतः मिथुनानाम्'। क एवमाह? 'मनुः' 'स्वायम्भुवः' स्वयम्भुवोऽपत्यं स्वायम्भुवः। कस्मिन् काले स एवमाह? 'विसर्गादौ' सृष्ट्यादावित्यर्थः। पूर्वमर्द्धं श्लोकस्य ऋज्वेव। एवमेताभ्यामृक्श्लोकाभ्यामुक्तम-विशेषेण पुत्रस्य दुहितुश्च दायादत्वम्॥

"न दुहितर इत्येके" न दुहितरो दायाद्यमर्हन्तीत्येवमेके धर्मविदो मन्यन्ते। ब्राह्मणमपि चैतस्मिन्नर्थे दर्शयति,—"तस्मात् पुमान् दायादः, स्त्री अदायादा,—इति" "विज्ञायते" एतस्मिन् ब्राह्मणे विचार्य्यमाणे ज्ञायते, न दुहितरो दायाद्यमर्हन्ति, पुमानेवार्हतीति। "तस्मात् स्त्रियं जातां परास्यन्ति, न पुमांसमिति च"। एतदपरं दर्शनं दुहितुरदायादत्वं लिङ्गतो दर्शयति,—"अथ यत् स्थाली परास्यन्ति हवनकर्मणो न तया जुह्वति, न

दारुमयं परास्यन्ति हवनकर्मणः दारुमयेनैव जुह्वति, तस्मात् स्त्रियं जातां परास्यन्ति परस्मै प्रयच्छन्ति, न पुमांसम्"। तस्मात् पुमानेव पैतृकस्य वित्तस्येष्टे, न दुहिता। किञ्च स्त्रीणां दान-विक्रयातिसर्गा विद्यन्ते, न पुंसः। प्रदीयते हि परस्मै स्त्री, विक्रीयते च वैवाहिकेन शुल्केन। "विक्रयश्चायमपत्यस्य मति-मान् को न मंस्यते। स्वल्पो वाथ बहुर्वापि विक्रयस्तावदेव सः॥" इति भगवता वासुदेवेनोक्तं सुभद्राहरणे। तथा च ब्राह्मणमपि दर्शयति,—"चातुर्मास्येष्वनृतं वा एषा करोति, या पत्युः क्रीता सती अन्यथान्यैश्चरति" इति, तस्माच्छुल्केन प्रदानं विक्रयः कन्याया इत्युपपद्यते। अतिसर्गः परित्यागः, परित्य-ज्यते हि कन्या स्वबन्धुभिः, स्वयंवरे योऽवलिप्तः स गृह्णातु, यो वा तुभ्यं रोचते तं वृणीष्वेति। स एष क्षत्रियाणामेव स्वयंवर-धर्मो नेतरेषां वर्णानामिति, स पुनरयमितरेषामपि वर्णानामदाया-द्यार्हत्वे कन्याया लिङ्गं भवति। तस्मात् दायाद्यमर्हति कन्येति॥

"पुंसोऽपीत्येके, शौनःशेपे दर्शनात्"। यदुक्तं दानविक्रया-तिसर्गैर्हेतुभिरदायादत्वं स्त्रिया इति, अनेकान्त एषः, पुंसोऽपि दानविक्रयातिसर्गा विद्यन्त एव। पुरुषोऽपि हि परस्मै दीयते। एवं ह्युक्तम्—"दत्तक्रीतकृत्रिमक्षेत्रजौरसाः पुत्राः" इति। तथा च "शौनःशेपे दर्शनात्" शौनःशेपे आख्याने बह्वृचानाम्, भारते च शुनःशेपस्य विक्रयो दृष्टः,—'विक्रीतं मध्यगं मन्ये' इत्येवमादि। तथा च परित्यागोऽपि दृष्टः,—यथा विश्वामित्रेण

मधुच्छन्द आदीनाम्। तस्मादनैकान्तिकत्वादेवैषां हेतूनामुभयोरपि दायाद्यत्वमित्येके मन्यन्ते॥

"अभ्रातृमतीवाद इत्यपरम्" आचार्य्यमतमिति वाक्यशेषः। यैवाभ्रातृका भवति कन्या, सैव पित्र्यं धनमर्हति, नेतरा सभ्रातृका पुरुषेषु हि पितुः पिण्डदातृषु तिष्ठत्सु न स्त्री धनमर्हति; सा हि परकीय वंश वर्द्धयति, न स्वम्, तस्मादसौ नार्थभागिनी। अभ्रातृकायां पुनरयं विशेषः,--अभ्रातृकायाः पितुरन्यः पुत्रो नास्तीति दौहित्रः पिण्डदानादिषु कार्य्येष्ववतिष्ठते इति भवत्यर्थभागिनी अभ्रातृका दुहिता। तदुक्तम्,--'पितोत्सृजेत् पुत्रिकामनपत्योऽग्निं प्रजापतिं चेष्ट्वाऽस्मादर्थमपत्यमिति संवाद्याभिसन्धानमात्रं पुत्रिका' इत्येकेषामिति॥

निगममप्येतस्मिन्नर्थे उदाहरन्ति,--"अभ्रातर इव योपास्तिष्टन्ति हृतवर्मनः"—इति। निगमस्य समासतोऽर्थमाह,—"अभ्रातृका इव योपास्तिष्टन्ति सन्तानकर्मणे पिण्डदानाय हृतवर्मान इति"। अस्यामृचि "अभ्रातृकाया." कन्यायाः "अनिर्वाहः" अनिर्वहणं विवाहनिषेध इत्यर्थः। "औपमिकः" उपमया दर्शितः, अभ्रातर इवेति। "अमूर्या यन्ति जामयः सर्वा लोहितवाससः। अभ्रातर इव योपास्तिष्टन्ति हृतवर्मनः (अ० सं० १, १७, १)॥" इयमथर्वणां प्रसवमार्गवहनरोगिणी या स्त्री भवति, तस्या तत्प्रतिकारकर्मणि विनियुज्यते। 'अमूर्या' 'यन्ति' स्रवन्ति नाड्यो रक्तमज्जत्वमविरताः स्त्रिय इवातिलोहितवस्त्राः 'सर्वाः' एताः तिष्ठन्तु उपरमन्तु हृतलोहितवहनमार्गाः, अस्य मन्त्रस्य वीर्य्येण। कथम्पु-

नस्तिष्ठन्तु ? 'अभ्रातर इव योषाः' यथा काश्चिदभ्रातृका योषा हतभर्तृवंशमार्गास्तिष्ठन्ति सन्तानकर्मणि पिण्डदानाय, एवमेता नाड्यः तिष्ठन्त्विति। एवमस्यामृचि अभ्रातृकाया अनिर्वाह उपमया लिङ्गतो दर्शितः ॥

"तस्य" अनिर्वाहस्य "उत्तरा" ऋक् "भूयसे" बहुतराय "निः" निर्विचिच्य "वचनाय" ॥ ४ ॥

अभ्रातेव पुंस एति प्रतीची गर्त्तारुगिव सनये धनानाम्। जायेव पत्य उशती सुवासा उपा हसि निरिणीते अप्सः ॥ अभ्रातृकेव पुंसः पितृनेत्यभिमुखी सन्तानकर्मणे पिण्डदानाय नयति गर्त्तारोहिणीव धनलाभाय दाक्षिणाजी गर्त्तः सभास्थाणुर्गृणातेः सत्यसङ्गरो भवति तं तत्र यापुत्रा यापतिका सारोहति तां तत्राक्षैराघ्नन्ति सा रिक्थं लभते श्मशानसञ्चयोऽपि गर्त्त उच्यते गुरतेरपगूर्णो भवति श्मशानं श्मशयनं श्मशरीरं शरीरं शृणातेः शम्नातेर्वा श्मश्रु लोम श्मनि श्रितं भवति लोम लुनातेर्वा लीयतेर्वा नोपरस्याविष्कुर्याद् यदुपरस्याविष्कुर्य्याद्गर्त्तौष्ठाः स्यात् प्रमायुको यजमान इत्यपि निगमो भवति। रथोऽपि गर्त्त उच्यते गृणातेः स्तुतिकर्मणः। स्ततमं यानम्। आरोहथो वरुण

मित्र गर्त्तमित्यपि निगमो भवति। जायेव पत्ये कामयमाना सुवासा ऋतुकालेपूपा हसनेव दन्तान् विवृणुते रूपाणीति चतस्र उपमा नाभ्रात्रीमुपयच्छेत तोकं ह्यस्य तद्भवतीत्यभ्रातृकाया उपयमनप्रतिपेधः प्रत्यक्षः पितुश्च पुत्रभावः पिता यत्र दुहितुरप्रत्तायाः रेतःसेकं प्रार्जयति सन्दधात्यात्मानं सङ्क्रमेन मनसेत्यर्थैतां जाम्या रिक्थ्यप्रतिपेध उदाहरन्ति ज्येष्ठं पुत्रिकाया इत्येके ॥ ५ ॥

अभ्रातेव पुंस इति। दीर्घतमःपुत्रस्य कक्षीवत आर्षम्। त्रिष्टुप्। औपसी। प्रातरनुवाकाश्विनयोः शस्यते। 'अभ्रातेव पुंस.' यथा अभ्रातृका कन्या दत्तापि सती पित्रा, स्वीकृतापि भर्त्रा, पुन. 'प्रतीची' "पितॄन्" एव पितृवंशमेव "अभिमुखी एति" "सन्तानकर्मणे पिण्डदानाय न पतिं" पतिवंशमित्यर्थः। सा हि पितृवंशं पुत्रैः पौत्रैश्च वर्द्धयति, न भर्तृवंशमिति, तस्मादभ्रातृका पैतृकं दायाद्यमर्हतीत्युपपद्यते। "गर्त्तारुगिव सनये धनानाम्"। "गर्त्तारोहिणी इव" काचित् "दाक्षिणात्या स्त्री" सा यथा "गर्त्तः सभास्थाणुः" तमारोहति 'सनये' लब्धये 'धनानाम्'। एवम् 'उषाः' अपरकाले रात्र्या नभ आरोहति। किञ्च 'जायेव पत्य उशती सुवासाः'। यथा जाया पत्ये भर्त्रे सुवासा भूत्वा ऋतुकाले आत्मानं दर्शयति एवमुषा आत्मानं दर्शयति जनानाम्। किञ्च 'उषा हसेवनिरिणीते अप्सः'। यथा हसना हसनस्वभावा-

दन्तान् आत्मनो दर्शयति, एवमुषा अपि आत्मनोऽन्तर्भूतानि सर्वद्रव्याणां रूपाणि विवृणुते, शार्वरेण तमसा दिग्धानि सर्वद्रव्याणि प्रकाशोदकेन धौतानीव करोति ॥

"चतस्रः" एताः "उपमाः" अस्यामृचि ।—अभ्रातेव पुंस इत्येका । गर्त्तारोहिणीवेति द्वितीया । जायेव पत्य इति तृतीया । हरुरेवेति चतुर्थी । अत्र प्रथमोपया अभ्रातेव पुंस इत्यनया अभ्रातृकाया अनिर्वाहो लिङ्ग्यते, यथा अभ्रातृका पितृनेव प्रत्येति न पतिम्, एवमुषा आदित्यमेव प्रत्येति । एवमभ्रातृका कन्या यस्मिन्नेव वंशे उत्पन्ना भवति, तमेव प्रकाशयति वर्द्धयति, न भर्तृवंशम् । इत्येवमुपमया नासौ वोढ़व्यैतदुपदर्शितं भवति, पुत्रार्थत्वाद् विवाहस्य । तस्मादवर्द्धयितृत्वाद् भर्तृवंशस्य, वर्द्धयितृत्वाच्च पितृवंशस्य, अभ्रातृता पितृदायाद्यमर्हतीत्युपपद्यते ॥

निगमप्रसक्तस्य तत्त्वमाचष्टे,—"गर्त्तः सभास्थाणुः" इति, अक्षनिर्वपणपीठमित्यर्थः । "गृणातेः (क्र्या० प०)" स हि "सत्यसङ्गरो भवति" सङ्गीर्य्यते हि तत्र सत्यमिदमत्र पतितमिदमत्र न पतितमित्येवं प्रायेण कितवास्तत्रानृतं ब्रुवते । "तम्" एवंलक्षणं गर्त्तमारोहति या स्त्री, सा गर्त्तारुगित्युच्यते । तद्गर्त्तस्य सभास्थाणोरारोहणं रिक्थलाभहेतुर्दाक्षिणात्येषु अपुत्राया अपतिकायाः स्त्रियाः प्रसिद्धम् । तयैव प्रसिद्ध्या निरुच्यते । देशसमाचारव्यवस्थयापि क्वचिन्मन्त्रार्थो निर्वक्तव्य इत्येतदनेन प्रदर्शितं भवति । "तत्र या अपुत्रा अपतिका सा आरोहति" तं सभास्थाणुम्, तत्र कितवमध्ये अवस्थितं या

अपुत्रा स्त्री, या अपतिका, सा आरोहति तस्मिन्नुपविशतीत्यर्थः। ततः "सा" भर्तृबन्धुभ्यः सकाशात् "रिक्थं लभते" यस्तस्या भर्तृसक्तो धनांशस्तम्। एवमसौ सनये लब्धये धनानां गर्त्तमारोहति।

गर्त्तप्रसक्तमुच्यते,—"श्मशानसञ्चयोऽपि गर्त्त उच्यते"। "गुरतेः (तु० आ०)" उद्यमनार्थस्य। स हि लोकविनाशायाभ्युद्यत इव भवति। यानि हि तत्र पिशाचादीनि सत्त्वान्याश्रितानि भवन्ति। तानि जनमरणमाशासते, म्रियमाणेषु जनेषु तानि प्रमुदितानि भवन्ति। "श्मशानं, श्मशयनम्" इत्याख्यानप्रसक्तमुच्यते। तत्र हि श्म शेतेऽत्रेति श्मशयनं सत्, तत् श्मशानमित्युच्यते। श्मशब्दार्थमाह,—"श्म शरीरम्" इति। तद्धि तत्र शेते, तत्र हि तन्निक्षिप्यते मृतस्य सतः। "शम्नातेर्वा" कृतव्याख्यानमपि पुनराह मुख्यत्वादस्य। तत्र औपमिकं वृत्रसम्बन्धात्, न हि वृत्रस्य मुख्यं शरीरम्। श्मशब्दप्रसक्तं निराह, —श्मश्रु लोम" इति, तद्धि "श्मनि" शरीरे "श्रितं भवति"। पर्य्यायप्रसक्तं निराह,—"लोम लुनातेः (क्र्या० उ०)" तद्धि लूयते।—"लीयतेर्वा (दि० आ०)" तद्धि शरीरे लीयते॥

तत्र निगममपि चोदाहरन्ति,—श्मशानसञ्चयोऽपि गर्त्त इति "नोपरस्यावि᳖ष्कुर्य्याद् यदुपरस्यावि᳖ष्कुर्य्याद् गर्त्तेष्टाः स्यात् प्रमायुको यजमानः" इति। उपर इति यूपस्यातष्टप्रदेश उच्यते, "पञ्चमभागोऽपरा यूपाः"—इति ह्युक्तम्। तदतष्टं यूपस्य नाविष्कुर्य्यादित्यर्थः। पांशुभिस्तदवच्छादनीयं वर्हिषा च। यदि

पुनरुपरस्य कञ्चिदप्यवयवमाविष्कुर्य्यात् 'गर्त्तेष्ठाः, गर्त्तप्रतिष्ठः श्मशानप्रतिष्ठः, 'प्रमायुकः' प्रमरणधर्मायुरेव यथाविहितादायुषो यजमानः स्यात्। "इत्यपि निगमो भवति" अप्ययमप्यन्ये बहव इत्यपिशब्दः॥

"रथोऽपि गर्त्त उच्यते"। "गृणातेः" स्तुत्यर्थस्य। तद्धि "स्ततमं यानम्" अश्वादिभ्यो यानेभ्यः सुखतरं हि तेन गम्यते। रथोऽपि गर्त्त इत्यस्मिन्नर्थे "आरोहथो वरुण मित्र गर्त्तमित्यपि निगमो भवति"। "हिरण्यरूपमुषसो व्युष्टावयःस्थूणमुदिता सूर्य्यस्य। आ रोहथो वरुण मित्र गर्त्त मतश्चक्षाथे अदितिं दितिं च॥"—इति (ऋ० सं० ४, ३, ३१, ३)। श्रुतविदात्रेय एतया त्रिष्टुभा मित्रावरुणावस्तौत्। राजसूयेऽभिषेचनीयो नाम क्रतुः, स तत्र यजमानस्य रथमारुरुक्षतः गृहीतेषुधनुष्कौ बाहू अनया अभिमन्त्र्येते। तावेवात्र मित्रवरुणावधिदेवताभिप्रायेण। एवं ह्याह,—मित्रोऽसीतीयमभिमन्त्रयति मित्रस्य ह्येतद्रूपम्, वरूणोऽसीतीमं वरुणस्यै तद्रूपमिति, तावुच्येते। हे 'मित्र! वरुण!' 'हिरण्यवर्णम्' 'उषसो व्युष्टौ' उषसो व्युच्छेदनकाले 'उदिता' च उदयकाले 'सूर्य्यस्य' यौ युवामेतस्मिन् काले एवंरूपम् 'अयःस्थूणम्, अयोमयं गर्त्तं स्थूणं स्वं 'गर्त्तं' रथम् 'आरोहथः' तौ युवां ब्रवीमि ममाप्येवं रथं गर्त्तमेतस्मिन् विधावङ्गभूतं तत्स्वरूपमेव साम्प्रतमारोहतम्, 'अतः' एनमारुह्य 'चक्षाथे' कुरुतमित्यर्थः। 'अदितिं दितिञ्च' अदीनमनुपक्षीणमात्मपक्षं दीनञ्चोपक्षीणमभिन्नपक्षमित्यर्थः॥

"गर्त्तः सभास्थाणुः"—इत्यत आरभ्य प्रसक्तानुप्रसक्तमुक्तम् ॥

"जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः" —इति। अयमप्यर्द्धर्चः पूर्वमेव व्याख्यातो भाष्यकारव्याख्यानुक्रमं भित्त्वा अस्माभिः, तथाह्यृग्वाक्यस्याप्यैकवाक्यता न विच्छिन्ना भवेदिति ॥

"चतस्र उपमाः"—इति यदुक्तं भाष्यकारेण, तदपि परिसंख्याय ताः उपपादिताः अस्माभिः। एवम् "अभ्रातेव पुंस एति प्रतीची"—इत्यनेन पादेनास्यामृचि अनिर्वाहो दर्शितः ॥

अन्यत्रापि चोक्तम्,—"नाभ्रातृकामुपयच्छेत तोकं ह्यस्य तद् भवति—इति"। अयमस्मिन् वाक्ये 'नाभ्रातृकामुपयच्छेत'—इति प्रत्यक्ष एवोपयमनप्रतिषेधो विवाहार्थं पाणिग्रहणप्रतिषेध इत्यर्थः। पूर्वयोर्हि मन्त्रयोरुपमया लिङ्गतो विवाहप्रतिषेधो दर्शितः, एतस्मिंस्तु वाक्ये साक्षादेव प्रतिषेधः आहत्य विधानेनैव नाभ्रातृकामुपयच्छेतेति। अत इदमुक्तम्,—"उपयमनप्रतिषेधः प्रत्यक्षः"—इति ॥

आह,—किमुपयमनप्रतिषेध एव? नेत्युच्यते,—"पितुश्च पुत्रभाव" प्रत्यक्षः श्रूयते। कथम्? "तोकं ह्यस्य तद् भवति" —इति। तोकमित्यपत्यनाम। यदपत्यमभ्रातृकायाः पितुर्भवति, नेतरस्य वोढुः, इत्येवमितरस्य विवाहप्रतिषेध एव नेत्युच्यते पुत्रभावादितरस्य च पुत्रिकापितुरपत्यप्राप्तिरिति। तस्मादुपपन्नं भवति,—यैवाभ्रातृमती, सैव पैतृकं धनमर्हति नेतरेति ॥

अधुना योऽसौ शासद्वह्निरित्यस्या ऋचः उत्तरोऽर्द्धर्च उत्सृष्टः, स एवाभ्रातृकावादपक्षेणैव निरुच्यते। पूर्वोऽपि च शासद्वह्निरित्ययमभ्रातृमतीवादपक्षेणैव योजयितव्यः। एष एव हि स्थितः पक्षः। तस्या एव ह्यभ्रातृमत्या यः पुत्रो भवति, तमेव पुत्रिकाविधानेन कृताभिसन्धित्वात् पौत्रो ममायमिति अपुत्रः सन् मातामह उपगच्छति, नेतरान् भ्रातृमतीपुत्रान्, अन्यथा सर्व एव हि वोढारो अपुत्राः स्युः, ततो विवाहपरिश्रमो व्यर्थ एव स्यात्। अथवा सर्व एव लोको दृव्यामुष्यायण एव स्यात्। किञ्च पुत्रिकापितुरपि या भार्य्या सान्यस्य दुहितेति तस्यामपि या जायते सा मातामहस्यैव, नेतरस्य पुत्रिकापितुः स्यात्। अनिष्टं चैतत् सर्वम्। तस्माद् यैवाभिसन्धिपूर्वकं धर्मेण पुत्रिका क्रियते, तस्या एव पुत्रो मातामहस्य भवति, न सर्वस्या इति, सैव च दायाद्यार्हा, भ्रातृमती। अत इदमुच्यते,—"पिता यत्र दुहितुः" इति। 'पिता' 'यत्र' यस्मिन् काले 'दुहितुः' "अप्रदत्तायाः" प्राक् प्रदानादित्यर्थः। "रेतःसेकं" रेतसः सेक्तारं यो दुहितरि रेतः सिञ्चति तं जामातरं "प्रार्जयति" प्रसाधयति, प्रकल्पयति, उपवर्त्तयतीत्यर्थः। तदा तस्मै तां दुहितरं ददत् किं करोति? "संशग्म्येन मनसा दध्न्वे" "सन्दधाति" अभिसन्दधाति "आत्मानम्" यदत्रापत्यमुत्पत्स्यते तन्ममेति। कथमपुनरभिसन्दधात्यात्मानमिति 'संशग्म्येन' "मनसा सङ्गमेन" मनसा विगतापुत्रत्वसन्तापेन चेतसा,—नाहमपुत्रः, इयमेव पुत्रिका मम पुत्रः, यो ह्यस्यामुत्पद्यते, स पौत्रो मम भविष्यति.

इत्येवं सुखेन मनसा सन्दधात्यात्मानं तस्यां पुत्रिकायाम्। तत्रैवं सति यस्तस्यामेव कृतपुत्रिकाधर्मिण्यामुत्पद्यते दौहित्रः, तमेव नप्ता ममायमित्येवमुपगच्छति मातामहः, न सर्वानेव दौहित्रान्, भ्रातृमत्या अपि स तस्या एव पुत्री मातामहस्य भवति, न सर्वस्याः, इति सैव च दायाद्यार्हा, नेतरा। स एव च मुख्यया वृत्त्या मातामहस्येव पौत्रो भवति, नेतरे भ्रातृमतीपुत्राः। ते हि गौण्या वृत्त्या जनयितुः पितुः पुत्राः सन्तो मातामहस्य पौत्रा इत्युच्यन्ते कदाचिल्लोके शास्त्रे वा॥

तत्रैवं सति "अङ्गादङ्गात् सम्भवति" "आत्मा वै पुत्र-नामासि" इत्येवमादिषु गौणं दुहितुः पुत्रत्वमुच्यते। किञ्च, यदि दुहिता पुत्रेण अविशिष्टा एव स्यात्, ततो दुहितेति विशेष-समाख्या नैव स्यात्, अस्ति चेयम्। यस्माद् विशिष्टतरः पुत्रो दुहितुः सकाशादित्युपपद्यते॥

यदपि चोक्तम्,—"अविशेषेण पुत्राणां दायो भवति"—इति, तदप्यभ्रातृमतीपक्षे द्रष्टव्यम्। अथवा वेदस्मृत्योर्विरोधे वेददृष्ट एव धर्मो ज्यायान्, न स्मृतिदृष्टः।

तस्मिंश्च वेदे "अथैतां जाम्या रिक्थप्रतिषेध उदाहरन्ति" धर्मविदः,—येयमृग् वक्ष्यमाणा (६ ख०) "न जामये तान्वः" —इति। अथशब्दो विशेषाधिकारार्थः। "ज्येष्ठं पुत्रिकाया इत्येके"—इति। यदा उत्सृष्टायां पुत्रिकापितुरन्ये पुत्रा जायेरन्, तदा विभागकाले ज्येष्ठं भागं पुत्रिकायै च दद्यात्, यथाभाग-मितरान् पुत्रान् विभजेत्, अभागा एव त्वितरा दुहितर

इति। तदेतदनयर्चा निरुच्यते यथा दुहितृणां भागो नास्ती'ति—॥ ५ ॥

न जामये तान्वो रिक्थमारैक् चकार गर्भं सनितुर्नि-धानम्। यदी मातरो जनयन्त वह्निमन्यः कर्त्ता सुकृतोरन्य ऋन्धन्॥ न जामये भगिन्यै जामिरन्येऽस्यां जनयन्ति जामपत्यं जमतेर्वा स्याद्गतिकर्मणो निर्गमनप्राया भवति। तान्व आत्मजः पुत्रो रिक्थं प्रारिचत् प्रादाच्चकारैनां गर्भनिधानीं सनितुर्हस्तग्राहस्य। यदी मातरोऽजनयन्त वह्निम्। पुत्रमवह्निं च स्त्रियमन्यतरः सन्तानकर्त्ता भवति पुमान् दायादोऽन्यतरोऽर्द्धयित्वा जामिः प्रदीयते परस्मै॥ ६ ॥

इति तृतीयाध्यायस्य प्रथमः पादः ॥ ३, १ ॥

न जामये इति। "न 'जामये' भगिन्यै" "तान्वः आत्मजः" आत्मनो स्त्रियो जातः। स आत्मजः किं करोति? इति, 'रिक्थम् आरैक्'। 'रिक्थं' पैतृकं धनं 'न' "प्रादात्" न प्रददौ। किन्तर्हि तस्याः करोति? इति। उच्यते,—'चकार गर्भं सनितुर्निधानम्। "सनितुः हस्तग्राहस्य" भगिनीभर्त्तुः प्रसव-समर्थां करोति, पुष्णातीत्यर्थः। किञ्च, 'यदी मातरः' यत् पुत्रद्वयं मातरो जनयन्ति, "वह्निं" च वोढ़ारं "पुत्रम्" "अवह्निं च"

"अवोढ्रीं स्त्रियम्, द्वयोर्द्वयोरपि वोढ्रवोढ्र्योः पुत्रयोः "अन्यतरः" एकतरः 'कर्त्ता' "सन्तानकर्त्ता भवति"। कतमः? यः "पुमान्" स एव "दायादः" दायाद्यार्हः, नेतरः कन्याख्यः। किञ्च, तयोरुभयोरपि 'सुकृतोः' सुकृतयः' सुतरामेकेनापि प्रयत्नेन कृतयोरुत्पादितयोः 'अन्य ऋन्धन्, "अन्यतरोऽर्द्धयित्वा" सुकृतोऽपि सन् "जामिः" जाम्याख्यो भगिन्याख्यः "प्रदीयते परस्मै" न कस्याञ्चिदप्यवस्थायामसावात्मीयो भवतीत्यभिप्रायः॥ एवमस्यामृचि 'न जामये तान्वो रिक्थमारैक्' इति न दुहितरो रिक्थभागिन्यो भवन्ति, नैताः सन्तानकर्मणि पितुरुपतिष्ठन्ते, वर्द्धयित्वा ह्येताः परस्मै दीयन्ते, तस्मादभागा एता इति॥

यत् पुनरुक्तं पुंसोऽपि दानातिसर्गविक्रया विद्यन्त इति, तत् कदाचित् केनचिन्निमित्तेन भवति, स्त्री तु निसर्गेणैव दीयते विक्रीयते विसृज्यते वा, सा हि परार्थमेवोत्पद्यते, तस्मादभागा इति॥ ६॥

इति निरुक्तवृत्तौ अष्टमाध्यायस्य (तृतीयाध्यायस्य)

प्रथमः पादः॥ ३, १॥

द्वितीयः पादः ।

मनुष्यनामान्युत्तराणि पञ्चविंशतिर्मनुष्याः कस्मात्वा-कर्माणि सीव्यन्ति मनस्यमानेन सृष्टा मनस्यतिः पुनर्मन-स्त्रीभावे मनोरपत्यं मनुषो वा । तत्र पञ्चजना इत्येतस्य निगमा भवन्ति ॥ १ ॥

प्रसक्तानुप्रसक्तमुक्तम्, तद्यथा—'जनयितुः प्रजाः' इत्येवमादि, प्रकृतमिदानीमुच्यते,—

"मनुष्यनामान्युत्तराणि पञ्चविंशति." । मनुष्याणां नामानि 'मनुष्यनामानि' 'उत्तराणि' प्रकृतेभ्योऽपत्यनामभ्यः, अपत्यान्येव हि विवृद्धानि सन्ति मनुष्या इत्युच्यन्ते । कियन्ति पुनस्तानि ? 'पञ्चविंशतिः' पञ्च च विंशतिश्च पञ्चविंशतिः (२५) । कतमानि पुनस्तानि ? "मनुष्याः, नराः"—इत्येवमादीनि ॥

आह,—"मनुष्याः कस्मात्" ? उच्यते,—"मत्वा" ज्ञात्वा, तत एते "कर्माणि" "सीव्यन्ति" तक्षन्तीत्यर्थः । अथवा "मनस्य-मानेन" प्रजापतिना "सृष्टाः" । "मनस्यतिः पुनः" अयं धातुः "मनस्वीभावे" । मनस्वीभावो नाम प्रहृष्टेन प्रहृष्यता प्रजापति-नैते सृष्टाः । अथवा "मनोरपत्यं" मनुष्याः "मनुषो वा" ॥

"तत्र पञ्चजना इत्येतस्य निगमा भवन्ति" सन्दिग्धाः, तत्रेयमृगुदाहरणम् । तद्यथा,—॥ १ ॥

तद्व॒ वाचः॑ प्र॒थमं॑ मंसीय॒ येनासु॑रा॒ अभि॑देवा॒ असाम। ऊर्जा॑द॒ उत॑ यज्ञियासः॒ पञ्च॒जना॒ मम॒ होत्रं॑ जुषध्वम्॥ तद्व॒ वाचः॑ परमं॑ मंसीय॒ येनासु॑रानभिभवेम देवा॒ असुरा॒ असु॑रता॒ स्थानेभ्य॒स्ता स्थानेभ्य॒ इति॑ वापि वा॑सुरिति॒ प्राणनामास्तः॑ शरी॒रे भ॑वति॒ तेन॒ तद्ध॒न्तः॑ सोदे॑वा-नसृजत॒ तत् सु॒राणां॑ सुर॒त्वमसो॒रसु॑रानसृजत॒ तदसु॑राणा-मसुर॒त्वमिति॑ विज्ञायते। ऊर्जा॑द॒ उत॑ यज्ञियासः। अन्ना-दा॑श्च यज्ञिया॒श्चोर्गित्यन्ना॑नामो॒र्जय॑तीति॒ सतः॑ पक्वं॑ सुप्रवृ-क्ण॒मिति॑ वा। पञ्च॒जना॒ मम॒ होत्रं॑ जुषध्वं॒ गन्ध॑र्वाः॒ पितरो॑ दे॒वा असु॑रा॒ रक्षा॑सीत्ये॒के। च॒त्वारो॒ वर्णा॑ निषा॒दः॑ पञ्चम॒ इत्यौ॑पमन्यवो॒ निषा॒दः॑ कस्मान्नि॒षण॑मस्मिन् पापकृ॒मिति॑ नै॑रुक्ताः॑ यत् पाञ्च॑जन्यया॒ विशा॑। पञ्चजनीनया॒ विशा॑ पञ्च॑ पृक्ता॒ सङ्ख्या॑ स्त्रीपुन्नपुंसके॒ष्वि॒शि॒ष्टा वा॑हुनामान्यु-त्त॒राणि॒ द्वाद॑श॒ वाह्॑ कस्मात् प्रवा॒धत॑ आभ्यां॑ कर्माण्यङ्गु-लिनामान्यु॒त्त॒राणि॒ द्वावि॑ंशतिरङ्गु॒लय॑ः कस्मादग्रगामिन्यो॒ भव॑न्तीति॒ वाग्र॑गालिन्यो॒ भव॑न्तीति॒ वाग्र॑कारिण्यो॒ भव॑न्तीति॒ वाङ्क॑ना॒ भव॑न्तीति॒ वाञ्च॑ना॒ भव॑न्तीति॒ वापि॑वाभ्यञ्चाना॒ देव॑ स्युस्तासामे॒षा भव॑ति॥ २॥

"तदद्य वाचः०—०जुषध्वम्" (ऋ० सं० ८, १, १३, ४)। सौचीकस्याग्नेरार्षम्। तस्य विश्वैर्देवैः सह संवादः। तत्रेयं होतृजपे विनियुक्ता। "तत्" वीर्य्यं "वाचः" "परमम्" उत्कृष्टम् अहम् "अद्य" "मंसीय" मन्ये जाने इत्यर्थः। तेन वीर्य्येण किम्? इति। "येन असुरान् अभिभवेम" वयम्। 'ऊर्जादः' अन्नभक्षयितारः। अपिच हे 'यज्ञियासः' यज्ञसम्पादिनः 'देवाः' यूयम्। अपिच हे 'पञ्चजनाः' मनुष्याः! निषादपञ्चमा वर्णाः! 'मम' इदं 'होत्रं' 'जुषध्वम्' अनुगृह्णी(ह्वी)ध्वम्॥ इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"असुराः असुरता स्थानेषु" ते हि न सुष्ठुरताः स्थानेषु, चपला इत्यर्थः। अथ "वा" "अस्ताः स्थानेभ्यः इति" प्रच्याविता देवैरित्यर्थः। "अपि वा असुरिति प्राणनाम"। स हि "अस्तः" क्षिप्र इव "शरीरे भवति" तस्य हि तत्र नित्यमवस्थानमित्यभिप्रायः। "तेन" हि "तद्वन्तः" भवन्ति। रो मत्वर्थे। अथवा इदमन्यद् ब्राह्मणोक्तं निर्वचनं स्यात् "सोर्देवानसृजत" सुरिति प्रशस्तनाम। प्रशस्तादात्मनः प्रदेशात् प्रजापतिः सुरानसृजत्, ऊर्ध्वेभ्यः प्राणेभ्यः। तदुक्तम्,—'ऊर्ध्वमुदतृणन् पूर्वपक्षः पञ्चदशः, ते न "सोर्देवानसृजत तत् सुराणां सुरत्वम्"—इति विज्ञायते। एवमेव प्रातिलोम्येन "असोरसुरानसृजत"। असुरिति प्रशस्तप्रतिषेधः। अप्रशस्तादात्मनः प्रदेशात् प्रजापतिरसुरानसृजत। तदुक्तम्,—'अर्वाङ् वा तिरदपरपक्षः, तेन असुरानसृजत'—इति। "ऊर्जाद उत यज्ञियासः, अन्नादाश्च यज्ञियाश्च"। "ऊर्गित्यन्ननाम" तद्धि "ऊर्जयति"

न्लिष्टं करोतीत्यर्थः। अथ "वा" "पक्वम्" एतत् "सुप्रवृक्णम्" भवति "इति" ककाररेफसामान्यात् पचेर्व्रश्चतेर्वा स्यात्। द्वयोरपि वा तद्धि पक्वं सन्मृदुत्वात् सुच्छेद्यं भवति॥

"पञ्चजना मम होत्रं जुषध्वम्"। एतदत्र सन्देहपदमेकमुद्धृत्य प्रदर्शितम्। "गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके" मन्यन्ते। "चत्वारो वर्णाः, निषादः पञ्चमः,—इत्यौपमन्यवः"। निषद्य हन्तीति निषादः प्राणिवधर्जीवनः। अथवा "निषण्णमस्मिन् पापकमिति" निषादः सौधन्वना इत्येके मन्यन्ते। स च रथकारः। "रथं ये चक्रुः सुवृतं सुचेतसोऽविह्वरन्तं मनसस्परिध्यया। ताँ ऊन्वः स्य सवनस्य पीतय आ वो वाजा ऋभवो वेदयामसि॥"—इति (ऋ० सं० ३, ७, ७, ३)। तस्य भिन्नकालमाधानं श्रूयते,—"वर्षासु रथकारः"। "ऋभूणां त्वा इति रथकारस्य" इति च मन्त्रभेदः,—"सौधन्वना ऋभवः (ऋ० सं० १, ७, ३०, ४)"—इति च मन्त्रलिङ्गात्॥

यथा तु पञ्चजनशब्देन मनुष्या एव निषादपञ्चमा वर्णा उच्यन्ते, तथैव निराह,—"यत्पाञ्चजन्यया विशेन्द्रे घोषा असृक्षत। अस्तृणाद् बर्हणा विपो योँ मानस्य स क्षयः॥"—इति (ऋ० सं० ६, ४, ४३, १)। प्रगाथेन दृष्टा। इयमनुष्टुप्। ऐन्द्री। पृष्ठस्य पञ्चमेऽहनि मरुत्वतीयशस्त्रस्य प्रतिपदेषा। 'यत्' यदा "पञ्चजर्नानया विशा" पञ्चजनसमुदायलक्षणया सहितैः स्तोतृभिः ऋत्विग्भिः अवर्षति 'इन्द्रे' वर्षार्थिभिः 'घोषाः' स्तुतीः 'असृक्षत' असृज्यन्त। निषादपञ्चमा वर्णा आर्त्ताः

सन्तो वर्षाभावे अस्तुवतैव इन्द्रम्—'वर्ष भगवन्!'—इत्येवमर्थ-यन्तः। अत इदमुक्तम्,—यदा पाञ्चजन्यया विशा सह घोषा ऋत्विग्भिः अस्तूज्यन्तेति। तदा किम्? इति। तदा उपश्रुत्य स इन्द्रः ताभिः प्रह्लादितचेताः 'अस्तृणात्' अहन् वर्षार्थं मेघान्। 'वर्हणा' परिवृद्धेन वध्रेण, परिवृद्धानि वा मेघजालानि 'विपः' विपाट्, पिता मेघानां मेधावी वा 'अर्य्यः' ईश्वरः कृत्स्नस्य जगतः। कस्मात् पुनरस्तृणात्? यस्मात् 'मानस्य स क्षयः' मानस्य दर्पस्य बलस्य वीर्य्यस्य स क्षयः निवासः, तस्मात् अस्तृणात्। अवीर्य्यो हि स्तूयमानः किं कुर्य्यात् परितुष्टोऽपि? अथवा मानस्य सत्कारस्य पूजायाः स इन्द्रः क्षयो निवासो भाजनमिति मन्वानैः स्तोतृभिः वर्षार्थिभिः सत्कृतः, तान् वर्षप्रदानेन प्रतिसत्कारयिष्यन् अस्तृणात् मेघान्। अपि वा अस्य जगन्निर्माणस्य दैवादेः स्थावरान्तस्य स इन्द्रः क्षयो निवास आश्रयो यस्मात् ततो मेघानस्तृणात्। अनावृष्टिद्वारेणास्य जगतः विनाशो मा भूत् कथञ्चामेत्यभिप्रायः॥

"पञ्च पृक्ता सङ्ख्या"। सा हि "स्त्रीपुन्नपुंसकेष्वविशिष्टा" एव भवति। तद्यथा—पञ्च स्त्रियः, पञ्च पुरुषाः, पञ्च कुलानि इति। एवं पञ्चशब्दे स्त्रीपुन्नपुंसकेषु विशेषो नास्ति॥

"बाहुनामान्युत्तराणि द्वादश"। बाह्वोर्नामानि 'बाहुनामानि' 'उत्तराणि' प्रकृतेभ्यो मनुष्यनामभ्यः। मनुष्याणामेव हि भवन्तीति मनुष्यनामभ्य उत्तराणि 'बाहुनामानि'। कियन्ति पुनस्तानि? 'द्वादश' द्वे च दश च द्वादश। कतमानि पुनस्तानि?

"आयती, च्यवाना' अभीशू"—इत्येवमादीनि। आमिश्रीभवतः कर्मभिरेताविति आयती। च्यावयितारौ कर्मणां च्यवाना। अभीशू अभ्यश्नुवाते कर्माणि। इत्येवमादि योज्यम्॥

आह,—"बाहू कस्मात्"? उच्यते,—"प्रबाधत आभ्यां कर्माणि" प्रकर्षेण बाधते प्रक्षिपत्याभ्यां कर्माणि॥

"अङ्गुलिनामान्युत्तराणि द्वाविंशतिः"। अङ्गुलीनां नामानि 'अङ्गुलिनामानि' 'उत्तराणि' प्रकृतेभ्यो बाहुनामभ्यः, बाह्वोरेव ह्यङ्गुलयो भवन्तीति बाहुनामभ्य उत्तराणि अङ्गुलिनामानि। कियन्ति पुनस्तानि? 'द्वाविंशतिः' द्वे च विंशतिश्च द्वाविंशतिः। कतमानि पुनस्तानि? "अग्रयुवः, अण्व्यः क्षिपः"—इत्येवमादीनि। बाह्वग्रे अवस्थिता अवन्त्येताः कर्माणीति अग्रयुवः। अण्व्यः परिमाणात् एताः। क्षिप्यते आभिः क्षेतव्यं द्रव्यमिति क्षिप। इत्येवमादि।

आह,—"अङ्गुलयः कस्मात्"? उच्यते,—"अग्रगामिन्यो भवन्ति" अग्रे ह्येताः कर्मसु गच्छन्ति। अथ"वा" "अग्रगामिन्यो भवन्ति" अग्रे ह्येता गलन्ति उदकानि। "अग्रकारिण्यो वा भवन्ति" अग्रे ह्येताः कर्माणि कुर्वन्ति। "अङ्क्ना भवन्ति वा" तथाहि,—यो ह्येताभिरभिहन्यन्तेऽसावङ्कित इव भवति। "अपि वा अभ्यञ्चनादेव स्युः" एता हि तं तमर्थमाभिमुख्येनाञ्चन्ति गच्छन्ति। ये तु "अभ्यञ्जनाः"—इत्यभिधीयन्ते, तेषामभ्यञ्जत आभिरिति॥

"तासाम्" अङ्गुलीनाम् "एषा" निर्वाचिका ऋक् "भवति" —॥ २॥

दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः। दशाभीशुभ्यो अचताजरेभ्यो दश धुरो दश युक्ता वहद्भ्यः॥ अवनयोऽङ्गुलयो भवन्त्यवन्ति कर्माणि कक्ष्याः प्रकाशयन्ति कर्माणि योक्त्राणि योजनानीति व्याख्यातमभीशवोऽभ्यश्नुवते कर्माणि। दश धुरो दश युक्ता वहद्भ्यः। धूर्धूर्वतेर्वधकर्मण इयमपीतरा धूरेतस्मादेव विहन्ति वहं धारयतेर्वा कान्तिकर्माण उत्तरे धातवोऽष्टोदशान्ननामान्युत्तराण्यष्टाविंशतिरन्नं कस्मादानतम्भूतेभ्योऽत्तेर्वात्तिकर्माण उत्तरे धातवो दश। बलनामान्युत्तराण्यष्टाविंशतिर्बलं कस्माद्बलं भरं भवति बिभर्त्तेर्धननामान्युत्तराण्यष्टाविंशतिरेव धनं कस्माद्धिनोतीति सतो गोनामान्युत्तराणि नव क्रुध्यतिकर्माण उत्तरे धातवो दश क्रोधनामान्युत्तराण्येकादश गतिकर्माण उत्तरे धातवो द्वाविंशशतं क्षिप्रनामान्युत्तराणि षड्विंशतिः क्षिप्रं कस्मात् सङ्क्षिप्तो विकर्षोऽन्तिकनामान्युत्तराण्येकादशान्तिकं कस्मादानीतं भवति सङ्ग्रामनामान्युत्तराणि षट्चत्वारिंशत् सङ्ग्रामः कस्मात् सङ्गमनाद्वा संगतौ ग्रामाविति वा तत्र खल इत्येतस्य निगमा भवन्ति॥ ३॥

दशावनिभ्य इति। अवनय इत्येवदादीनि नद्यादिनामभिः सन्दिह्यते, तदर्थमिदमुदाहियते। त्रिष्टुवेषा। अर्बुदस्य काद्रवेयस्य सर्पस्यार्षम्। आवस्तुतौ विनियुक्ता। दशभिरवनिभिः ये उपचर्य्यन्त ग्रावाणः, सोमाभिषवकर्मणि प्रवृत्ते, ते दश अवनयः, तेभ्यः 'दशावनिभ्यः' हे ऋत्विजः! यूयमपि 'अर्चय' स्तुतीः प्रोच्चारयतेत्यर्थः। एवमेव दशभिः कक्ष्याभिर्ये उपचर्य्यन्ते, ते दशकक्ष्याः, तेभ्यः 'दशकक्ष्येभ्यः' अर्चत। दशभिर्योक्त्रैः ये उपचर्य्यन्ते, ते दशयोक्त्राः, तेभ्यः 'दशयोक्त्रेभ्यः' अर्चत। दशभिर्योजनैः ये 'उपचर्य्यन्ते, ते दशयोजनाः, तेभ्यः 'दशयोजनेभ्यः' अर्चत। दशभिरभीशुभिर्ये उपचर्य्यन्ते, ते दशाभीशवः, तेभ्यः 'दशाभीशुभ्यः' अर्चत। 'अजरेभ्यः' अजरणधर्मभ्यः 'दश धुरः' य एते ग्रावाणः तेभ्यः अर्चत। दशभिर्दशभिरङ्गुलीभिर्य एते युक्ता वहन्ति ग्रावाणः, तेभ्य एभ्यः 'दश युक्ता वहद्भ्यः' अर्चत॥ इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"अवनयोऽङ्गुलयो भवन्ति" ता हि "अवन्ति कर्माणि" रक्षन्ति भक्षयन्ति वा क्षिपयन्तीत्यर्थः। "कक्ष्याः" अङ्गुलय एव, ता हि "प्रकाशयन्ति कर्माणि" प्रकटीकुर्वन्तीत्यर्थः। "योक्त्राणि"—इत्येतत् पदं "योजनानि इति" अनेन पदेन व्याख्यातम्। योजनानीत्येतत् निगदसिद्धमेव। "अभीशवः" अपि अङ्गुलय एव, ता हि "अभ्यश्नुवते कर्माणि" व्याप्नुवन्तीत्यर्थः। अनेकैर्नामभिरङ्गुलय एवोक्ता, अनेकक्रियायोगिनीभिरङ्गुलीभिर्गृहीतास्तदर्थमर्चतेति। "धूः धूर्वतेः वध-

कर्मणः" ध्वरति धूर्वतीति वधकर्मसु पठितम्। "इयमपीतरा धूः" अनड्वाहादिसम्बन्धिनी। "एतस्मादेव" धातोः वधकर्मणः। सापि "विहन्ति वहम्" अनड्वाहोऽश्वस्य वा। "धारयतेर्वा" सा हि धारयत्यश्वमनड्वाहञ्च ॥

"कान्तिकर्माण उत्तरे धातवोऽष्टादश"। खल्वयं पुरुषो व्याख्यातः सबाहुः साङ्गुलः, तं खलु काम एव प्रथममाविवेशेति उत्तरे कान्त्यर्था इत्यर्थः। यद्यपि ह्यकान्तं भवति, तदप्यङ्गुलीभिरेव कान्तं क्रियत इत्यतोऽङ्गुलिनामभ्यः 'उत्तरे कान्तिकर्माणः' समाम्नाताः। कियन्तः पुनस्ते ? इति। 'अष्टादश' अष्टौ च दश च अष्टादश (१८)। कतमे पुनस्ते ? इति। "वश्मि, उश्मसि, अववेति"—इत्येवमादयः ॥

"अन्ननामान्युत्तराणि अष्टाविंशतिः"। अन्नस्य नामानि 'अन्ननामानि' 'उत्तराणि' प्रकृतेभ्यः कान्तिकर्मभ्यः, अन्नमेव हि कान्तं सर्वभावेभ्यो भवतीति कान्तिकर्मभ्यः उत्तराणि अन्ननामानि। कियन्ति पुनस्तानि ? 'अष्टाविंशतिः' अष्टौ च विंशतिश्च अष्टाविंशतिः (१८)। कतमानि पुनस्तानि ? "अन्ध, वाजः, पाजः, प्रयः, पृक्षः"—इत्येवमादीनि। अन्ध इत्ययं निर्वक्ष्यति। वाजयितव्यं पूजयितव्यम् एतद् भोजनायोपस्थितं भवति वाजः। पीयत इति पाजः। प्रयः पानादेव ॥

आह,—"अन्नं कस्मात्" ? उच्यते,—"आ" आभिमुख्येन ह्येतत् "नतं" प्रह्वीभूतं भवति भोजनाय भूतानाम्। "अत्तेर्वा" अद्यते अत्ति च भूतानि; तस्मादन्नं तदुच्यत इत्युक्तम् ॥

"अत्तिकर्माण उत्तरे धातवो दश"। अन्नमेव ह्याद्यत इत्यन्ननामभ्यः 'उत्तरेऽत्तिकर्माणः' समाम्नाताः। कियन्तस्ते इति ? 'दश' (१०)। कतमे पुनस्ते ? "आवयति, भर्वति, वभस्ति"—इत्येवमादयः॥

"बलनामान्युत्तराण्यष्टाविंशतिः"। बलस्य नामानि 'बलनामानि' 'उत्तराणि' प्रकृतेभ्योऽत्तिकर्मभ्यः, य एव ह्यदन्ति त एव बलवन्तो भवन्तीत्यत्तिकर्मभ्य उत्तराणि बलनामानि समाम्नातानि। कियन्ति पुनस्तानि ? 'अष्टाविंशतिः' अष्टौ च विंशतिश्च अष्टाविंशतिः (२८)। कतमानि पुनस्तानि ? "ओजः, पाजः, शवः"—इत्येवमादीनि। ओजः ओजतेर्वोञ्जतेर्वा। इत्येवमादि।

आह,—"बलं कस्मात्" ? उच्यते,—तद्धि "भरं भवति" भ्रियते (भू० उ०) हि सः, योऽबलिसो भवति। "बिभर्त्तेः" वा (जु० उ०) स एति॥

"धननामान्युत्तराण्यष्टाविंशतिरेव"। य एव बलवन्तो भवन्ति त एव धनं प्राप्नुवन्ति इति बलनामभ्यः 'उत्तराणि धननामानि'। कियन्ति पुनस्तानि ? 'अष्टाविंशतिरेव' (२८)। बलनामान्युत्तराण्यष्टाविंशतिः इमान्यष्टाविंशतिरेवेत्येवशब्दः। कतमानि पुनस्तानि ? "मघम्, रेक्णः, रिक्थम्, वेदः"—इत्येवम्प्रभृतीनि। रिच्यत इति रेक्णः। अतिरिच्यमानमेतदिहैव तिष्ठति म्रियमाणस्येति रिक्थम्। विद्यते लभ्यते एव इति वेदः। इत्येवमादीनि॥

आह,—"धनं कस्मात्" ? उच्यते,—"धिनोतीति सतः" सत इति कारकावधारणम्, धिनोतिस्तर्पणार्थः ॥

"गोनामान्युत्तराणि नव"। गवां नामानि 'गोनामानि' प्रकृतेभ्यो धननामभ्यः, गाव एव हि प्रकृष्ट धनमिति धननामभ्यः 'उत्तराणि, गोनामानि। कियन्ति पुनस्तानि ? 'नव' (९)। कतमानि पुनस्तानि ? "अघ्न्या, उस्रा, उस्रिया"—इत्येवमादीनि। अघ्न्या अहन्तव्या भवति। इत्येवमादि निर्वचनम्। उक्तनिर्वचने हि गोशब्दः, अतो गौः कस्मात् इति न ब्रवीति ॥

"क्रुध्यतिकर्माणः उत्तरे धातवो दश"। धनार्थमेव हि गवार्थं च क्रोधो भवतीति गोनामभ्यः 'उत्तरे' क्रुध्यर्थाः समाम्नाताः। कतमे पुनस्ते ? इति। "रेलते, हेलते"—इत्येवमादयः ॥

क्रुध्यर्थसम्बन्धेनैव "क्रोधनामान्युत्तराणि"। कियन्ति पुनस्तानि ? "एकादश" (११)। कतमानि पुनस्तानि ? "हेडः, हरः, हणिः, त्यजः" इत्येवमादीनि। हे अरे इत्यनेनाविष्टो भवतीति हेडः। नीचैरनेन नरकं प्रति ह्रियते इति हरः। नीचैरनेन ह्रियते नरकं प्रतीति हणिः। त्यजत्यनेनाविष्टो धर्मं जहातीति त्यजः। इत्येवमादि ॥

"गतिकर्माण उत्तरे धातवो द्वाविंशशतम्" (१२२)। क्रुद्धा एव सन्तः सुतरां गच्छन्तीति क्रोधनामभ्यः 'उत्तरे' 'गतिकर्माणः' समाम्नाताः ॥

"क्षिप्रनामान्युत्तराणि षड्विंशतिः"। गतिसम्बन्धादेव 'क्षिप्रनामानि उत्तराणि' समाम्नातानि। कियन्ति पुनस्तानि ?

'षड्विंशतिः' षट् च विंशतिश्च षड्विंशतिः (२६)। कतमानि पुनस्तानि ? "नु, मक्षु, द्रवत्"—इत्येवमादीनि। नुन्न इव क्षिप्रं गच्छतीति नु। मां क्षिणोति मां क्षिणोतीति सर्व एव हि क्षिप्रगामिनं मन्यन्ते इति मक्षु। द्रवत् द्रवतेः। इत्येवमादि॥

आह,—"क्षिप्रं कस्मात्" ! उच्यते,—"विकर्षः" विकृष्टो विक्षिप्तोऽर्थः "संक्षिप्तः" क्षिप्रमुच्यते॥

"अन्तिकनामान्युत्तराण्येकादश"। य एव हि क्षिप्रं गच्छति, स एवाभिप्रेतार्थस्य अन्तिके समीपे भवन्तीति क्षिप्रनामभ्यः 'उत्तराणि' 'अन्तिकनामानि'। कियन्ति ? 'एकादश' (११)। कतमानि पुनस्तानि ? "तड़ित्, आसात्"—इत्येवमादीनि। ताड्यतेऽस्मिन् प्रदेशेऽवस्थित इति तड़ित् इत्युच्यते। अन्तिक-प्रदेशोपासन्नः स आसात्। इत्येवमादि योज्यम्।

आह,—"अन्तिकं कस्मात्" ? उच्यते,—तद्धि "आनीतं भवति" सन्निकृष्टत्वात्॥

"संग्रामनामान्युत्तराणि षट्चत्वारिंशत्"। संग्रामस्य नामानि 'संग्रामनामानि' 'उत्तराणि' प्रकृतेभ्योऽन्तिकनामभ्यः, अन्तिकीभूतानामेव हि संग्रामो भवतीत्यन्तिकनामभ्य उत्तराणि संग्रामनामानि। कियन्ति पुनस्तानि ? 'षट्चत्वारिंशत्' (४६)। कतमानि पुनस्तानि ? "रणः, विवाक्, नदनुः"—इत्येवमादीनि। रणन्त्यस्मिन् शूरा इति रणः। विविधा शूराणामत्र वाग् भवतीति विवाक्। नदन्त्यस्मिन् शूरा इति नदनुः। इत्येवमादि योज्यम्॥

आह,—"संग्रामः कस्मात्" ? उच्यते,—"सङ्गमनाद्वा" सङ्गच्छन्ति हि परस्परेण तत्र योधाः। "सङ्गरणाद् वा" संगृणन्ति संशब्दायन्ते शूरा यत्र परस्परेण। "सङ्गतौ ग्रामा-विति वा"। ग्राम इति सङ्घात इत्युच्यते। परस्परं विजिगीषया समागतौ तत्र भवतः॥

"तत्र" षट्चत्वारिंशत्के संग्रामनामगणे "खले"—"इत्ये-तस्य" नाम्नः "निगमाः" सन्दिग्धाः "भवन्ति" इतरोऽपि धान्य-खल इत्युच्यते संग्रामोऽपि। तत्रैवं सति अस्यामृचि वक्ष्यमा-णायां 'खले न पर्षान्'—इति व्यपदेशाद्व विभागो लक्ष्यते शस्यखलसंग्रामखलयोः—॥ ३ ॥

अभी३ दमेकमेको अस्मि निष्षाडभी द्वा किमु त्रयः करन्ति। खले न पर्षान् प्रति हन्मि भूरि किं मा निन्द-न्तिशत्रवोऽनिन्द्राः॥ अभिभवामीदमेकमेकोऽस्मि निष्पह-माणः सपत्नानभिभवामि द्वौ किं मा त्रयः कुर्वन्त्येक इता सङ्ख्या द्वौ द्र्युततरा सङ्ख्या त्रयस्तीर्णतमा सङ्ख्यां चत्वा-रश्चलिततमा सङ्ख्याष्टावश्नोतेर्नव न वमनीया नावासा वा दश दस्ता दृष्टार्था वा विंशतिर्द्विर्दशतः शतं दशदशतः सहस्रं सहस्रदशयुतं नियुतं प्रयुतं तत्तदभ्यस्तमर्बुदो मेघो भवत्यरणमम्बु तद्दोऽम्बुदोऽम्बुमद्भातीति वाम्बुमद्भवतीति

चा स यथा महान् बहुर्भवति वर्पस्तदिवाबुंदम्। खले न पर्पान् प्रतिहन्मि भूरि। खल इव पर्पान् प्रतिहन्मि भूरि खल इति संग्रामनाम खलतेर्वा स्खलतेर्वायमपीतरः खल एतस्मादेव समास्कन्नो भवति। किं मा निन्दन्ति शत्र वोऽनिन्द्राः। य इन्द्रं न विदुरिन्द्रो ह्यहमस्म्यनिन्द्रा इतर इति वा। व्याप्तिकर्माण उत्तरे धातवो दश तत्र द्वे नामनी आक्षाण आश्नुवान आपान आप्नुवानो वधकर्माण उत्तरे धातवस्त्रयस्त्रिंशत् तत्र वियात इत्येतद् वियातयत इति वा वियातयेति वा। आखण्डल ग्रहयसे। आखण्डयितः। तड़ित्यन्तिकवधयोः संसृष्टकर्म ताडयतीति सतः ॥४॥

"अभीदु दमेक०—०ऽनिन्द्राः"। (ऋ० सं० ८, १, ६, २)। वैकुण्टस्येन्द्रपुत्रस्येयमार्षम्। जगती। दशरात्रस्य नवमेऽहनि निष्केवल्ये शस्यते। आध्यात्मिको मन्त्रः। "इदं" तावत् जगत् 'एकः' एव अहम् 'अभि अस्मि' "अभिभवामि", अभिभूय च भवामि। अस्य सर्वस्याहमेकोऽधिपतिरित्यभिप्रायः। कथं पुनरभिभवाम्यहमेतत्? "एकम् एकः" निगूपाट् "निगूयहमाणः" "सपत्नान्" शत्रून् निश्चयेनाधिकं वाभिभवामीत्यर्थः। सहतिरभिभवार्थश्छन्दसि। कथम्पुनरभिभवन् सपत्नानहमस्य जगत आधिपत्ये वर्त्ते? यावदेकं तावद्गणं सन्तमेक एवाभिभवामि

सपत्नम्, 'अभी द्वा' "द्वौ" अप्यागतौ एक एव "अभिभवामि"। "किम्" 'उ' "त्रयः" 'करन्ति' त्रयोऽपि युगपदागताः सन्तः एकाकिनोऽपि मम किं "कुर्वन्ति"? न किञ्चिदपीत्यभिप्रायः। किञ्च 'खले न पर्षान्' गाह्यमाने हन्यमाने गम्यमानेऽन्ने। एकः खलशब्दः उपमानम्, उपमासम्बन्धात्, यथा 'खले' खलस्थाने कर्षकेण 'पर्षान्' बहूनपि सञ्चितान् अप्रतिबन्धेन क्षुधेरन् (क्षुन्दीरन्), एवमहमपि भूरीनपि शत्रूनागतान् क्षणादेव तैरप्रतिबध्यमानः 'हन्मि'। तमेवम्प्रभावं सन्तं मां "किं निन्दन्ति शत्रवः?" नाहं निन्दार्हः, स्तुत्योऽहमित्यभिप्रायः। अपि च "अनिन्द्राः", 'ये' माम् "इन्द्रं न विदुः" याथार्थ्यतः, ते कथमविज्ञायैव मां निन्दन्ति? नैतन्न्याय्यमित्यभिप्रायः। "अनिन्द्रा इतर इति वा" अथवा अनिन्द्राः सन्तः आत्मना कथमिन्द्रं सन्तं मां निन्दन्ति? न तु नामेन्द्रत्वेनैवाहमतिरिक्तस्तेभ्यः, अथ कथमितरे अनिन्द्राः सन्तो न लज्जन्तीत्यभिप्रायः॥ इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"एक इता संख्या" गता संख्या, अलं प्राप्तेत्यर्थः। द्व्यादिकं वापीयं गन्ता। "द्वौ द्रुततरा संख्या" एकस्याः सकाशात्। "त्रयस्तीर्णतमा संख्या" द्वयोः सकाशात्। प्रसक्तानुप्रसक्तमुच्यते,—"चत्वारश्चलितमा संख्या" त्रिभ्यः सकाशात्। "अष्टावश्नोतेः" ते हि सप्त संख्या व्याप्य वर्त्तन्ते। "नव" इति या संख्या, सा "न वननीया" न सम्भजनीया भवति, नवसंख्यायुक्तायां हि तिथौ न कश्चिदप्यारम्भः क्रियते॥ "दश" इति या संख्या, सा "दस्ता" दशान्तैव हि संख्या भवति।

"दृष्टार्था वा" दृष्टार्थैव हि दशानामुपरि पुनः पुनः दृश्यते संख्या। तद्यथा,—एकादशेत्येवमादि। तस्माद् दृष्टार्थदर्शनाद् दशेत्युच्यते। "विंशतिर्द्विदशतः" द्विः दश विंशतिरित्युच्यते। "शतं दशदशतः" दशकृत्वोऽभ्यस्ता या दश, ताः समुदिताः शतमित्युच्यते। "सहस्र सहस्वत्"। सह इति बलनाम, तेन तद्वत् दुर्बलानामपि सहस्रं समुदितं बलवदेव भवति सङ्घातबलीयस्त्वात्। "अयुतं नियुतं प्रयुतं तत्तदभ्यस्तम्" सहस्रं दशकृत्वोऽभ्यस्तमयुतमा-मिश्रीभूतमयुतमित्युच्यते, अयुतमपि दशकृत्वोऽभ्यस्तं नियुतमि-त्युच्यते, नियुतमपि दशकृत्वोऽभ्यस्तं प्रयुतमित्युच्यते। अथा-र्बुदशब्दविवक्षया अम्बुशब्दं निर्वक्ति,—अरणशीलम् "अम्बु" तस्य दाता मेघः, सः "अम्बुदः" तस्य, "स यथा" उदकभाव-मापद्यमानः "महान् बहुर्भवति वर्षन् तदिवार्बुदम्" तदिव वर्षन् यद् बहु द्रव्यजातं भवति, तदर्बुदमित्युच्यते। "खल इति संग्रामनाम"। खलतेर्वा भ्रंश्यत्यर्थस्य, भ्रश्यन्ति हि योधाः। "स्खलतेर्वा" हिंसार्थस्य, हिंस्यन्ते हि तत्र परस्परेण। "अयम-पीतरः" "खलः" धान्यखलः "एतस्मादेव" तत्रापि हि भ्रश्यन्ति चूर्ण्यमानानि धान्यानि हिंस्यन्ते वा, चूर्ण्यन्त इत्यर्थः। अथवा "समास्कन्नः" असौ "भवति" विप्रकीर्णैः धान्यैः॥

"व्यासिकर्माण उत्तरे धातवो दश" (१०)। संग्रामे हीतरेतरं व्याप्नुवन्ति योधा इति संग्रामनामभ्यः 'उत्तरे' 'व्यासिकर्माणः'। कतमे पुनस्ते ?· इति। "इन्वति, ननक्षे"—इत्येवमादयः। "तत्र" दशके व्यासिकर्मधातुगणे एते "द्वे" "नामनी" भवतः—

'आक्षाणः (३)' इति, 'आपानः (६)' इति च। तत्र, "आक्षाण आश्नुवानः" यो हि अश्नोति व्याप्नोति स आक्षाण इत्युच्यते तथा च य आप्नोति सः "आप्नुवानः" सन् "आपानः" इत्युच्यते ॥

"वधकर्माण उत्तरे धातवस्त्रयस्त्रिंशत्"। संग्रामे हीतरेतरं व्याप्य ततो घ्नन्तीति व्याप्तिकर्मभ्यः 'उत्तरे' 'वधकर्माणः' समाम्नाताः। कियन्तः? 'त्रयस्त्रिंशत्' (३३)। कतमे पुनस्ते? इति। "दम्भोति, क्षथति, ध्वरति, धूर्वति"—इत्येवमादयः "तत्र" वधकर्मधातुमध्ये "वियात इत्येतत्" नाम। तत्पुनरेवं निर्वक्तव्यम्,—"वियातयते" नानाप्रकारं यातयते यः शत्रून्, स वियातः। अथ "वा" एवमन्यथा स्यात्—"वियातयः" एवमुच्यते यः स्तोतृभिः, स वियातः। 'आखण्डलः'—इत्येतदपि नामैव। निगममपि चात्र दर्शयति,—"आखण्डल प्रहूयसे"। आभिमुख्येनावस्थितो यः खण्डयति मेघान्, स आखण्डयिता, तस्य सम्बोधनम्। हे "आखण्डयितः" ॥

इरिम्बिठिर्नाम कण्वो मन्त्रद्रक्। तस्येयमार्षम्। गायत्री ऐन्द्री। रात्रिपर्य्यायेषु मध्यमरात्रिपर्य्याये होतुरियं शस्त्रे विनियुक्ता। "शाचिगो शाचिपूजनायं रणाय ते सुतः। आखण्डल प्रहूयसे ॥" (ऋ० सं० ६, १, २४, २)। शाचिगो इति चैकं पदम्। शचीति कर्मनाम। तस्य शच्याख्यस्य कर्मणो येयमिष्टिपशुसोमादिलक्षणा सन्ततिः, सा शाचिः। अथवा स्वार्थिक एव तद्धितः स्यात्। शच्येव शाचिः। तं प्रत्याह्वयमानो यो गच्छति, स शाचिगुरिन्द्रः, तस्य संम्बोधनं

हे 'शाचिगो!' इति। तथैव शाच्यां य आगतः सन् पूज्यते स शाचिपूजनः, तस्य सम्बोधनं हे 'शाचिपूजन!'। हे 'आखण्डल' आखण्डयितः! शत्रूणां मेघानां वा। इयमस्माभिः प्रस्तुता शची यां प्रति ते नित्यमिष्टमागतं यथा च पूज्यसे त्वमागतः सन्, किञ्च एतस्याञ्च शच्यामस्मिन् कर्मणि 'अयं' 'रणाय' रमणाय 'ते' तव 'सुतः' अभिषुतः सोमो यतोऽस्माभिः त्वं 'प्रहूयसे' प्रकर्षेणादरवद्भिर्ह्वयसे आह्वयसे। स एवमेतज् ज्ञात्वा अस्मदनुग्रहाय अनतीतकालमागन्तुमर्हसीत्यभिप्रायः॥

आखण्डलशब्देऽल्पतरं वक्तव्यं बहुतरं तडिच्छब्दे इति भेदतो निरुच्यते,—"तडिदित्यन्तिकवधयोः संसृष्टकर्म"। तडिदित्येतच्छब्दरूपमन्तिकाभिधायि वधाभिधायि च इत्येकमेव ह्येतदुभाभ्यामर्थाभ्यां सम्प्रयुज्यते। विद्युदपि च तडिदित्युच्यते। सा पुनः कर्त्तरि कारके "ताडयतीति सतः" ॥ ४ ॥

त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि। या नो दूरे तडितो या अरातयोऽभि सन्ति जम्भया ता अनप्नसः। त्वया वयं सुवर्द्धयित्रा ब्रह्मणस्पते स्पृहणीयानि वस्वनि मनुष्येभ्य आददीमहि याश्च नो दूरे तडितो याश्चान्तिकेऽरातयोऽदानकर्माणो वादानप्रज्ञा वा जम्भय ता अनप्नसोऽप्न इति रूपनामाप्नोतीति सतो विद्युत्तडिद्भवतीति शाकपूणिः सा ह्यवताडयति दूराच्च

दृश्यतेऽपि त्विदमन्तिकनामैवाभिप्रेतं स्यात्। "दूरे चित् सन्तडिद्विवातिरोचसे।" दूरेऽपि सन्नन्तिक इव सन्दृश्यस इति। वज्रनामान्युत्तराण्यष्टादश वज्रः कस्माद् वर्जयतीति सतस्तत्र कुत्स इत्येतत् कृन्ततेर्ऋषिः कुत्सो भवति कर्त्ता स्तोमानामित्यौपमन्यवोऽन्नाप्यस्य वधकर्मैव भवति तत्सख इन्द्रः शुष्णं जघानेत्यैश्वर्य्यकर्माण उत्तरे धातवश्चत्वार ईश्वरनामान्युत्तराणि चत्वारि तत्रेन इत्येतत् सनित ऐश्वर्य्येणेति वा सनितमनेनैश्वर्य्यमिति वा ॥ ५ ॥

यथा त्वन्तिकनामेदं तथेयमृगुदाहरणम्,—"त्वया वयं०—०अनुग्रसः"—इति (ऋ० सं० २, ६, ३०, ४)। गृत्समदस्यार्षम्। जगती। प्रवर्ग्ये विनियुक्ता। हे ब्रह्मणस्पते!" "त्वया" "वयं" 'सुवृधाः' "सुवर्द्धयित्रा" सुष्ठु वर्द्धिताः अनुगृहीताः सन्तः 'वसु' "वसूनि" यानि यानि 'स्पार्हा' स्पार्हाणि 'स्पृहणीयानि" तानि तानि 'मनुष्या' "मनुष्येभ्यः" तानभिभूय "आददीमहि"। किञ्च, "याश्च नो दूरे तड़ितः" 'या नो दूरे' अध्वन्यवस्थिताः "अरातयः" "याश्चान्तिके"। तडिच्छब्दस्यान्तिकामिधायित्वम्। दूरे च अन्तिके च या अरातयः। अरातिः सेना। "अदानकर्माणः"। रातिर्दानार्थः। अस्माकमभिमतानर्थान् ददतो ये निवारयन्ति ते। 'अरातयः' "अदानप्रज्ञाः" न दातव्यमस्माभिरेभ्य इत्येवं येषां प्रज्ञा ते अदानप्रज्ञाः। द्विविधा

हि शत्रवः,—दुःखसन्नाश्याः, सुखसन्नाश्याश्च, तत्र ये दुःखसन्नाश्याः ते अदानप्रज्ञाः, ये अदानकर्माणः ते सुखसन्नाश्याः। ते चोभयेऽपि दूरे चान्तिके चावस्थिता भवन्ति। "ताः" दूरान्तिकावस्थितानुभयानपि "जम्भय" निश्चेष्टान् कुरु त्वं ब्रह्मणस्पते। किञ्च, "अनप्नसः" अरूपाश्चैतान् कुरु। "अप्न इति रूपनाम"। तद्धि "आप्नोति" आश्रयम्॥

"विद्युत्०"। "सा ह्यवताडयति" अशनिरूपेण। "दूरात्" एव "च" "दृश्यते"। तस्मान्न तस्या अन्तिकनामाभिसम्बन्धोऽस्ति। "अपि त्विदम्" अपरेणोदाहरणेन "अन्तिकनामैवाभिप्रेतं स्यात्"—"दूरे चित् सन्तडिद्दिवातिरोचसे"। "दूरेऽपिसन्नन्तिक इव" अवस्थितः "दृश्यसे इति" अत्र दूरेऽपि सन्नन्तिक इवेति स्फुटतरमन्तिकाभिधानत्वम्, न तथा पूर्वस्मिन् मन्त्रे—'या नो दूरे तड़ितः' इति॥

एवमन्तिकनामत्वेन वा विद्युन्नामत्वेन वा घधनामत्वेन वा प्रकरणोपपदे अवेक्ष्य यथासम्भवं निर्वक्तव्यम्॥

"यो विश्वतः सुप्रतीकः सद्दृङ्ङसि दूरे चित् सन् तड़िद्दिवातिरोचसे। रात्र्याश्चिदन्धो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव॥" (ऋ० सं० १, ६, ३१, २)। एषा जगती। आग्नेयी। कुत्सेन दृष्टा। महाव्रते आग्निमारुते शस्त्रे अभिप्लवस्य च षष्ठेऽहनि आग्निमारुते एव च शस्यते। 'यः' त्वं हे 'अग्ने!' 'विश्वतः' सर्वतः 'सुप्रतीकः' सुदर्शनः शोभनदर्शनः, अपिच 'सद्दृङ्' यतो यतो दृश्यसे ततस्ततः

समानदर्शनः तुल्य एव लक्ष्यसे। अपिच "दूरे" अपि "सन्" अतिभ्राजिष्णुत्वात् 'तड़िदिव' अन्तिक इव अवस्थितः 'अतिरोचसे' अतिरोचिष्णुर्दृश्यसे। अपिच यदेतत् 'राज्याश्चित्' राज्या अपि सन् तम् 'अन्धः' अध्यानलक्षणं तमः, यत् न ध्यातुमपि शक्यते किमुत द्रष्टुम्। एतदपि 'अति' अतीत्य हे 'देव' सर्वभूतदीपयितः! 'पश्यसि' एव त्वम्, न तेऽस्माकमिव तेनान्धेनापि तमसा प्रतिबध्यते दर्शनम्। तस्य तवैवङ्गुणयुक्तस्य हे 'अग्ने!' 'वयं' 'सख्ये' सखिभावे परिचरणकर्मणि आ उत्तमादुच्छासात्कृताध्यवसायाः सन्तः 'मा' केनचिद् विघ्निना शत्रुणा वा 'रिषाम' मास्मान् किञ्चिद्धिंसीत् त्वदनुध्यानादेवेत्यभिप्रायः॥

"वज्रनामान्युत्तराण्यष्टादश"। यो हि हन्यते स वज्रेणेवेति वधकर्मभ्यः 'उत्तराणि' 'वज्रनामानि'। कियन्ति पुनस्तानि? अष्टादश, अष्टौ च दश च। कतमानि पुनस्तानि? "दिद्युत्, नेमिः, हेतिः"—इत्येवमादीनि, विद्यूत् द्यतेर्वा द्योततेर्वा, पुनः पुनरतिशयेन वा द्यति अवखण्डयति, द्योतते दीप्यते वा सा दिद्युत्। अवनामयति खण्डयति प्रहारेणेति नेमिः। हेतिर्हन्तेः। इत्येवमादि॥

आह,—"वज्रः कस्मात्"? उच्यते,—"वर्जयति" वियोजयति प्राणैः प्राणिनः। "तत्र, कुत्स इत्येतत्" सन्देहपदम्। ऋषिरपि कुत्स इत्युच्यते। तत् पुनरेतत् यदा वज्रनाम, तदा "कृन्ततेः" कृत्यतेऽनेनेति "कुत्सः"। यदा पुनरेतद्ऋष्यभिधानं,

तदा "कर्त्ता स्तोमानाम् इति" "औपमन्यवः" आचार्य्यो मन्यते। "अत्राप्यस्य वधकर्मैव" अभिप्रेतं स्यात्। अत्रापि एतद्भूयो वर्त्तमानमभिधानमस्य ऋषेर्वधकर्मैव वधार्थसंयुक्तमेव स्यात्। किङ्कारणम्? "तत्सख इन्द्रः शुष्णं जघान इति"। तेन स्तूयमानो विवृद्धबलः शुष्णं शोषयितारं रसानामसुरं मेघं वा जघान। मेघो हि शुष्णः, तदुदये हि धान्यानि उदकग्राहनिमित्तेन शुष्यन्ति॥

"ऐश्वर्य्यकर्माण उत्तरे धातवश्चत्वारः"। घ्रतामेव हि वज्रेणायुधेनेवैश्वर्य्यं भवतीति वज्रनामभ्यः 'उत्तरे' 'ऐश्वर्य्य-कर्माणः'। कतमे पुनस्ते? "इरज्यति, पत्यते, क्षियति, राजति?"—इति॥

"ईश्वरनामान्युत्तराणि चत्वारि"। ऐश्वर्य्यसम्बन्धेनैवोच्यते। कतमानि पुनस्तानि? "राष्ट्री, अर्य्यः, नियुत्वान्, इनः"। "तत्र इन इत्येतत्" अभिधानमेवं व्युत्पाद्यम्,—"सनितः" सम्भक्तः "ऐश्वर्य्येणेति वा", अथ "वा" "सनितं" सम्भक्तम् "अनेनैश्वर्य्यमिति"॥ ५॥

यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति। इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्राविवेश॥

यत्र सुपर्णाः सुपतना आदित्यरश्मयोऽमृतस्य भागमुदकस्यानिमिषन्तो वेदनेनाभिस्वरन्तीति वाभिप्रयन्तीति वेश्वरः सर्वेषां भूतानां गोपायितादित्यः स मा धीरः

पाकमत्राविवेशेति धीरो धीमान् पाकः पक्तव्यो भवति विपक्वप्रज्ञ आदित्य इत्युपनिषद्वर्णो भवतीत्यधिदैवतमथाध्यात्मं यत्र सुपर्णाः सुपतनानीन्द्रियाण्यमृतस्य भागं ज्ञानस्यानिमिषन्तो वेदनेनाभिस्वरन्तीति वाभिप्रयन्तीति वेश्वरः सर्वेषामिन्द्रियाणां गोपायितात्मा स मा धीरः पाकमत्राविवेशेति धीरो धीमान् पाकः पक्तव्यो भवति विपक्वप्रज्ञ आत्मेत्यात्मगतिमाचष्टे ॥ ६ ॥

इति तृतीयाध्यायस्य द्वितीयः पादः ॥ ३, २ ॥

अधुना मन्त्रमपि व्याचष्टे यस्मिन्नेतदीश्वरनामेन इति,—"यत्रा सुपर्णा०"—इति (ऋ० सं० २, ३, १८, १)। त्रिष्टुबेषा। वैश्वदेवीये सूक्ते दीर्घतमसा दृष्टा। महाव्रते तृतीयसवने वैश्वदेवे शस्त्रे शस्यते। वैश्वदेवेषु हि सूक्तेष्वेकदेवता बहुदेवताश्च मन्त्रा भवन्ति, तदप्युपेक्षितव्यम्। "यत्र" यस्मिन् मण्डलेऽवस्थिताः "सुपर्णाः सुपतनाः आदित्यरश्मयः" ते हि शोभनमर्थमुद्दिश्य तमोविघातलक्षणं पतन्ति। अथवा शोभमानाः पतन्तीति सुपर्णाः। ते किं कुर्वन्ति? उच्यते,—"अमृतस्य भागम्" "उदकस्य" अमरणधर्मणः 'भागं' भजनीयमंशमादाय पृथिवीलोकात् तेनान्विताः सन्तः सर्वभूतानि "अभिस्वरन्ति"। 'स्वृ शब्दोपतापयोः (भू० प०)' अभितपन्तीत्यर्थः। अथवा अभिस्वरन्त्यादित्यमण्डलम्, आभिमुख्येन रसान् गृहीत्वा प्रयान्ति। "अनिमिषन्तः"

अनिमिषमाणा इव आदरवन्त इत्यर्थः। 'विदथा' "वेदनेन" स्वकर्माधिकारयुक्तेनान्विताः सन्तः इदमेवास्माभिः कर्त्तव्यमादानादिलक्षणं कर्मेति अभिस्वरन्ति। यत्रैतदेवंलक्षणं कर्म कुर्वन्त्यादित्यरश्मयः, तत्र किम्? इति उच्यते,—"इनो विश्वस्य भुवनस्य गोपाः"। 'इनः' "ईश्वरः" इनो ह्यसावादित्यः, ऐश्वर्य्येण भवति "विश्वस्य' 'भुवनस्य' भूतस्य "सर्वेषां भूतानां" 'गोपाः' "गोपायिता" भवति "आदित्यः" मण्डलान्तरपुरुषो यः तत्र मण्डलेऽवस्थितः। "स मा धीरः" "धीमान्" प्रति विशिष्टया बुद्ध्यान्वितः, बुद्धिरेव हि तस्य शरीरम्। "पाकः पक्तव्यः" पक्तव्यप्रज्ञः "विपक्वप्रज्ञः" सम्यग्दर्शनोऽनुग्राह्यतया "आविवेश" आविशतु॥

"इति" शब्दः प्रकरणप्रदर्शनार्थः,—एवमयम् "उपनिषद्वर्णो भवतीति"। यद्वा, ज्ञानमुपगतस्य सतो गर्भजन्मजरामृत्यवो निश्चयेन सीदन्ति, सा रहस्यं विद्या उपनिषदित्युच्यते। उपनिषद्भावेन वर्ण्यत इति उपनिषद्वर्णः। "अधिदैवतम्" उक्तम्॥

"अथाध्यात्मम्" उच्यते,—अधिदैवतमध्यात्ममित्येतौ शब्दौ व्याख्यातौ। "यत्र" यस्मिन् शरीरे "सुपतनानि इन्द्रियाणि" अवस्थितानि स्वेषु स्वेषु आयतनेषु कृष्णसारादिषु किं कुर्वन्ति? उच्यते,—"अमृतस्य" अमरणधर्मणः "ज्ञानस्य" "भागम्" भजनीयं स्वं स्वं रूपादिलक्षणं। रसमादाय। 'विदथा' "वेदनेन" विज्ञानेन युक्तम् "अभिस्वरन्ति"। न हि इन्द्रियाणां चैतन्यमस्तीति तानि ह्यचेतनानि, चेतनस्य पुरुषस्य कर्त्तुर्विज्ञानमयस्य करणानि, तदधिष्ठानास्तु देवताश्चेतनाः। तदभिप्रायेणो-

च्यते,—'विदथा' "वेदनेन" विज्ञानेनेति। किं कुर्वन्ति ?' "अभिस्वरन्ति" "अभिप्रयन्ति" विषयज्ञानेन पुरुषस्यापि भोक्तुर्दुःखं कुर्वन्ति। अथवा 'अभिस्वरन्ति' बुद्धिमाभिमुख्येन विषयविज्ञानमादाय बाह्यप्रत्ययाधानार्थं स्वरन्ति गच्छन्तीत्यर्थः। तत्र किम् ? इत्युच्यते,—तत्र योऽवस्थितः "ईश्वरः" इनः, "सर्वेषामिन्द्रियाणां गोपायिता" यः "आत्मा" "स मा धीरः" "धीमान्" "पाकः पक्तव्यः" पक्तव्यप्रज्ञः "विपक्वप्रज्ञः" सम्यग्दृशः सर्वज्ञः। सः "अत्र" एव हि देहेऽवस्थितः बुद्ध्यधिदैवतभावेन तैजसाख्यो माम् "आविवेश" त्वनुग्राह्यतया स मामत्रैवावस्थितोऽगृह्णात्वित्यर्थः, तदनुग्रहाद्धि यस्य सम्यग्दर्शनं प्रकाशते तदाशास्यत इति। "आत्मगतिमाचष्टे" एवमपास्य विज्ञानमाचष्टे मन्त्रैः।

यदुक्तं "पुष्पफले देवताध्यात्मे वा" इति, तदेवमुपपाद्यम्,—तत्र एक एव ह्यसावादित्यमण्डले चाधिदैवते चाध्यात्मे च। बुद्ध्यधिदेवताभूतः स एव तत्र तत्रोपेक्षितव्यः। तस्मादमुष्मादादित्यमण्डलाद् ये रश्मयः प्रसर्प्यन्ति ते विश्वेदेवा इति, "रश्मयो वै विश्वेदेवाः" इति ह्युक्तम्। अध्यात्मेऽपि हृद्याकाशाद् यानीन्द्रियाणि प्रसर्प्यन्ति, त एव रश्मयः। अधिदैवते त एव विश्वेदेवा इत्युक्तम्। एवं तत्र तत्र योज्यम्, प्रकारमात्रमेवेदमुपदर्शितं भाष्यकारेणेति ॥ ६ ॥

इति निरुक्तवृत्तौ अष्टमाध्यायस्य (तृतीयाध्यायस्य),
द्वितीयः पादः ॥ ३, २ ॥

तृतीयः पादः ॥

बहुनामान्युत्तराणि द्वादश बहु कस्मात् प्रभवतीति सतो ह्रस्वनामान्युत्तराण्येकादश ह्रस्वो ह्रसतेर्महन्नामान्युत्तराणि पञ्चविंशतिर्महान् कस्मान् मानेनान्याञ्जहातीति शाकपूणिर्महनीयो भवतीति वा तत्र वक्षिथ विवक्षस इत्येते वक्तेर्वा वहतेर्वा साभ्यासाद् गृहनामान्युत्तराणि द्वाविंशतिर्गृहाः कस्माद् गृह्णन्तीति सतां परिचरण कर्माण. उत्तरे धातवो दश सुखनामान्युत्तराणि विंशतिः सुखं कस्मात् सुहितं खेभ्यः खं पुनः खनते रूपनामान्युत्तराणि षोड़श रूपं रोचतेः प्रशस्यनामान्युत्तराणि दश प्रज्ञानामान्युत्तराण्येकादश सत्यनामान्युत्तराणि षट् सत्यं कस्मात् सत्सु तायते सत्प्रभवं भवन्तीति वा अष्टा उत्तराणि षेदानि षद्यतिकर्माण उत्तरे धातवश्चायतिप्रभृतीनि च नामान्यामिश्राणि नवोत्तराणि पदानि सर्वपदसमाम्नानायाथात उपमा यदतत्तत्सदृशमिति गार्ग्यस्तदासां कर्म ज्यायसा वा गुणेन-प्रख्याततमेन वा कनीयांसं वा प्रख्यातं वोपमिमीतेऽथापि कनीयसा ज्यायांसम् ॥ १ ॥

"वहुनामान्युत्तराणि द्वादश। ईश्वराणामेव वहुत्वं भवतीत्यतः ईश्वरनामभ्यः 'उत्तराणि' 'वहुनामानि'। कियन्त ? द्वे च दश च 'द्वादश' (१२)। कतमानि पुनस्तानि ? "उरु, तुवि, पुरु" —इत्येवमादीनि। उरु विस्तारे, यद्धि वहु भवति, तद् विस्तीर्णं भवति। तुवि वृद्धौ, यद्धि वहु भवति, तद् वृद्धं भवतीति। पूरितमिव हि वहुना सर्वं भवतीति पुरु। इत्येवमादि युक्तं योज्यम्॥ आह,—"वहु कस्मात्" ? उच्यते—"प्रभवति" हि एतत् वहुभ्यो दीयमानम्॥

वहुनामसम्बन्धेनैव "ह्रस्वनामानि उत्तराणि"। कियन्ति ? "एकादश" (११)। कतमानि पुनस्तानि ? "कुवित्, रिहम्, ह्रस्वः"—इत्येवमादीनि। कुत्सितमिव हि तद् विज्ञायते अल्पत्वादिति कुवित्। लीढमेव हि तदल्पत्वाद् भवतीति रिहम्। "ह्रस्वः" कस्मात् ? उच्यते,—"ह्रसतेः" ह्रसितो हि भवति सः, महतः सकाशात्॥

ह्रस्वसम्बन्धेनैव "महन्नामान्युत्तराणि पञ्चविंशतिः"। ह्रस्वापेक्षयैव हि महत्त्वं भवति। कियन्ति पुनस्तानि ? "पञ्चविंशति." (२५)। कतमानि पुनस्तानि ? "महत्, व्रघ्नः, ऋष्वः"—इत्येवमादीनि। आह,—"महान् कस्मात्" ? उच्यते,—"मानेन" "अन्यान्" ह्रस्वान् "जहाति" "इति" "शाकपूणिः" आचार्यो मन्यते। अथ "वा" "मंहनीयः" पूजनीयो "भवतीति" महान्। वृहत्त्वात् वृंहणत्वाद्वा व्रघ्नः ऋष्वः रैपणवान्। इत्यादि योज्यम्॥ "तत्र" तस्मिन् महन्नामके गणे "ववक्षिथ (१४),

विवक्षसे (१५)"—इत्येते आख्याते। ते पुनरुभे वक्तेर्वा धातोः "साम्यासात्" ॥

य एव महान्तस्त एव गृहिणो भवन्तीति महन्नामभ्यः "उत्तराणि गृहनामानि"। कियन्ति पुनस्तानि? "द्वाविंशतिः" (२२)। कतमानि पुनस्तानि? "गयः, कृदरः, हर्म्यम्"—इत्येवमादीनि। गम्यत इति गयः। कृतदरः कृदरः। हर्म्यं हरणम्। इत्येवमादीनि॥ आह,—"गृहाः कस्मात्"? उच्यते,—ते हि यावदेव किञ्चिद्धा ह्रियते, तत् सर्वमेव "गृह्णन्ति" दुःपूरत्वात्॥

गृहेष्वेवावस्थिताः परिचर्य्यन्ते परिचरतैवेति गृहनामभ्यः "उत्तरे परिचरणकर्माणः धातवः" समाम्नाताः। कियन्तः पुनस्ते? "दश" (१०)। कतमे पुनस्ते? "इरज्यति, विधेम, सपर्य्यति"—इत्येवमाद्यः॥

परिचर्य्यमाणानामेव हि सुखं भवतीति परिचरणकर्मभ्यः "उत्तराणि सुखनामानि"। कियन्ति पुनस्तानि? "विंशतिः" (२०)। कतमानि पुनस्तानि? "शिम्वाता, शतरा, शातपन्ता"—इत्येवमादीनि। शिम्वाता, सुखानुसम्बन्धाद्धि ह्रदमग्नानामिव शरीरं शीतीभवति। शतरा, शीतलतरमिव हि जलादपि सुखम्। शातपन्ता, शान्ततापमेव हि सुखम्। एवमादि। आह,—"सुखं कस्मात्"? उच्यते,—"सुहितम्" सुष्ठु हितमेतत् "खेभ्यः" इन्द्रियेभ्यः। "खं पुनः" इन्द्रियम्, "खनतेः" धातोः। अवदीर्णमेव हि तस्य कर्णायतनं भवति॥

"रूपनामान्युत्तराणि षोडश"। य एव हि सुखिनस्त एव हि

प्रायो रूपवन्तो भवन्तीति सुखनामभ्यः 'उत्तराणि' 'रूपनामानि'। कियन्ति पुनस्तानि ? 'षोडश' (१६) कतमानि पुनस्तानि ? "निर्णिक्, वह्निः"—इत्येवमादीनि। निर्णिक्तमिव हि तद् भवति तैजसत्वात्। विवृणोत्याश्रयमिति वह्निः। इत्येवमादि। "रूं रोचतेः" दीप्यमानमिव हि तत् प्रकाशं भवति॥

"प्रशस्यनामान्युत्तराणि दश"। य एव हि रूपवन्तस्त एव प्रशस्या भवन्तीति रूपनामभ्यः 'उत्तराणि' 'प्रशस्यनामानि'। कियन्ति पुनस्तानि ? 'दश' (१०)। कतमानि पुनस्तानि ? "अस्रेमाः, अनेद्यः, अनिन्द्यः"—इत्येवमादीनि। अस्रेमाः, 'स्रिवु गतिशोषणयोः (दि० प०)', न स्रिव्यति गच्छत्यकीर्त्तिमित्य-स्रेमाः, अपाप इत्यर्थः, क्षमारहितो वा। अनेद्यः, अनिन्दार्हः। इत्येवमादि योज्यम्॥

"प्रज्ञानामान्युत्तराण्येकादश"। य एव हि प्रज्ञावन्तस्त एव हि प्रशस्या भवन्ति, य एव हि प्रशस्यास्त एव हि प्रज्ञावन्तो भवन्तीति प्रशस्यनामभ्यः 'उत्तराणि' 'प्रज्ञानामानि'। कियन्ति पुनस्तानि ? 'एकादश'। 'एकश्च दश च एकादश (११)। कतमानि पुनस्तानि ? "केतः, केतुः, चेतः"—इत्येवमादीनि। 'कित ज्ञाने (भू० प०)', तस्य केतः। केतुरपि तस्यैव॥

"सत्यनामान्युत्तराणि षट्"। य एव हि प्रज्ञावन्तः, त एव हि सत्यवादिनो भवन्तीति प्रज्ञानामभ्यः 'उत्तराणि' 'सत्यनामानि'। कियन्ति पुनस्तानि ? 'षट्' (६)। कतमानि पुनस्तानि ? "षट्, श्रत्, सत्रा"—इत्येवमादीनि।

चन्द्रमिव सम्यद्धं भूतेनार्थेन भवतीति वट्। श्रवणार्हमेतद्-भवतीति श्रत्। एवमादि। आह,—"सत्यं कस्मात्"? उच्यते, —"सत्सु तायते" सत्स्वेव हि तत्तायते विस्तीर्य्यते, न हि सतां समीपे शक्यमनृतं वक्तुम्। अथ "वा" "सत्प्रभवं भवति" य एव हि सन्तस्त एव हि सत्यं वदन्ति॥

"अष्टौ" यानि "उत्तराणि पदानि" चिक्यदित्येवमादीनि, ते "पश्यतिकर्माणः" पश्यत्यर्थाः "धातवः"। "चायति-प्रभृतीनि च" तान्येव "नामानि" भवन्ति। तानि पुनरेतानि "आमिश्राणि" संसृष्टानीत्यर्थः। तेषां प्रकरणोपपदाभ्यां विशेषावधारणं भवति। तत्र,—किञ्चिन्नाम, किञ्चिदाख्यातम्, —इत्येके मन्यन्ते। अन्ये पुनः किम्? "चिक्यत् (१)", "चिचर्षणिः (६)", "विश्वचर्षणिः (७)"—इत्येतानि नामानि, यान्यन्यानि परिशिष्टानि ते धातवः, तानि पुनरेतानि पूर्वाचार्य्य-प्रामाण्यात् आमिश्राणि पठ्यन्ते इत्येवं मन्यन्ते॥

"नव" यानि "उत्तराणि पदानि" "हिकं, सुकं, नुकम्"—इत्येवमादीनि, आकृतमित्येवमन्तानि, "सर्वपदसमाम्नानाय"। कथं नाम सर्वं चतुर्विधं पदप्रकारमेतस्मिन् समाम्नाये समाम्नातं स्यादित्येवमर्थमेष्वेव हि नवसु समाम्नातेषु उभये निपातोप-सर्गाः, दर्शिता भवन्ति॥

"अथात उपमाः"। 'अथ' इदानीम्, 'अतः' अनन्तरम्, 'उपमाः' भवन्ति। तद्यथा,—"इदमिव, इदं यथा, अग्निर्नयेः, चतुरश्चिद् ददमानात्, ब्राह्मणा व्रतचारिणः, वृक्षस्य नु ते पुरुहू-

तचयाः, जार आभगम्, मेघो भूतोऽभि यन्नयः, तद्रूपः, तद्वर्णः, तद्वत्, तथा"—एताः उपमाः ॥

सामान्यलक्षणमासां ब्रवीति, — "यदतत्तत्सदृशमिति गार्ग्यः"। 'यत्' किञ्चित् अर्थजातम् 'अतत्' भवति, 'तत्' सरूपञ्च, यथा—अनग्निः खद्योतः, अग्निसरूपश्च सोऽग्निनोपमीयते—अग्निरिव खद्योत इति, एवं अतत्सरूपेण गुणेनः ॥ गुणसामान्यात् उपमीयते,—इत्येवं 'गार्ग्यः, आचार्य्यो मन्यते। "तदासां कर्म" स आसामुपमानानामर्थः, यदप्रसिद्धतरगुणस्य कस्यचित् प्रसिद्धतरगुणेनान्येन गुणप्रकाशनम्। क्वचित् पुनरात्मनाप्युपमानं भवत्येव।—"वायुरात्मोपमे गतिः", "तथा करोति सैन्यानि यथा कुर्य्याद् धनञ्जयः" इति। "ज्यायसा वा गुणेन, प्रख्याततमेन वा कनीयांसं वा प्रख्यातं वोपमिमीते"। 'ज्यायसा' उत्कृष्टेन 'गुणेन' यो यस्मिन् द्रव्ये उत्कृष्टो गुणः तेन, 'कनीयांसम्' अनुत्कृष्टं गुणम् 'उपमीयते'। तद्यथा,—सिंहो माणवकः। सिंहे शौर्य्यमुत्कृष्टम्, माणवकमेतेनोपमिमीते, सिंह इव माणवको विक्रान्त इति। 'प्रख्याततमेन वा' 'अप्रख्यातम्' 'उपमीयते'। प्रख्यातश्चन्द्रमा, अप्रख्यातो माणवकः, तं तेनोपमिमीते,—चन्द्र इव कान्तो माणवक इति। "अथापि" क्वचित् "कनीयसा" गुणेन "ज्यायांसम्" अपि सन्तम् उपमिमीते। तदेतच्छन्दस्येव द्रष्टव्यम् ॥ १ ॥

तनूत्यजेव तस्करा वनर्गू रशनाभिर्दशभिरभ्यधीताम् । तनूत्यक्तनूत्यक्ता वनर्गू वनगामिनावग्निमन्थनौ बाहू तस्कराभ्यामुपमिमीते तस्करस्तत्करोति यत् पापकमिति नैरुक्तास्तनोतेर्वा स्यात् सन्ततकर्मा भवत्यहोरात्रकर्मा वा रशनाभिर्दशभिरभ्यधीतामभ्यधातां ज्यायांस्तत्र गुणोऽभिप्रेतः ॥ २ ॥

आह,—किमुदाहरणम् ? उच्यते,—"तनू त्यजेव-धीताम् । इयंते अग्ने नव्यसी मनीषा युक्ष्वा रथं न शुचयद्भिरङ्गैः ॥ (ऋ० सं० ७, ५, ३२, ६)। त्रितस्येयमार्षम्। त्रिष्टुप्। प्रातरनुवाकाश्विनयोः शस्यते। 'तनूत्यजा' "तनूत्यक्ता" चौर्य्याभिप्रायेण हर्त्तव्यं वा सर्त्तव्यं वेति कृताध्यवसायौ तस्करौ "वनर्गू वनगामिनौ" मार्गमोषकौ प्रसृतौ, ताभ्यामुपमीयते। तौ यथा उपमार्थत्वेन सुपुष्टौ भवतः, न तथा ग्रामतस्करौ। तौ यथा कश्चिदध्वगं बध्नीयातां रज्ज्वा। एवम् एतौ अस्मद्बाहू 'रशनाभिः' अङ्गुलीभिः 'दशभिः' दशसंख्यायोगिनीभिः 'अभ्यधीतां' प्रतिनिबध्नीताम्। अभिनिबध्य च अग्निमन्थनयोक्त्रेण अधरारण्युत्तरारणीभूतं त्वां तस्करावि व कश्चिदध्वगं गाढं बध्वा सुभृशमाकर्षतः। किमर्थं पुनरेवमर्थ्यतेऽस्माभिः ? हे 'अग्ने !' 'इयं' यस्मात् 'नव्यसी' नवतरा, अन्यैः स्तोतृभिः अदृष्टपूर्वा, युष्मद्गुणैः संस्कृत्य विवक्षिता, 'ते' तव 'मनीषा' स्तुतिः प्रधान-

संयुक्ता । स त्वमेतज्ज्ञात्वा एवमर्थ्यमानोऽस्मामिः 'युक्ष्व' योजय आत्मानमरणी प्रति । अरणिभ्यां 'शुचयद्भि' दीप्यमानैः स्वैः 'अङ्गैः' ज्वालाख्यैः । कथम्पुनर्योजय ? 'रथं न' यथा कश्चित् कुतश्चित् आजिगमिषुः शीघ्रं रथं योजयेत्, एवमेवावतरणाय त्वमाभ्यामरणीभ्यां योजयमानो यज्ञ विघ्नं मा कार्षीरित्यभिप्रायः । "तनूत्यक् तन्नूत्यक्तौ" इत्यर्थः । "वनर्गू वनगामिनौ" तत्र हि तयोश्चौर्य्यं सिध्यति । एवमस्यामृचि "अग्निमन्थनौ" "बाहू" प्रशस्तौ "तस्कराभ्याम्" अप्रशस्ताभ्याम् "उपमिमीते" मन्त्रद्रुक् ॥

"तस्करः" "तत्" एव "करोति" "यत्" एव "पापकम्" भवति "इति नैरुक्ता मन्यन्ते" । वैयाकरणानां पुनरन्यथापि स्यात् । स हि "सन्ततकर्मा भवति" रात्रौ ग्रामे मुष्णाति दिवा अरण्ये, एवम् "अहोरात्रकर्मा वा" एतदेतत्सन्ततकर्मत्वम् । "राशनाभिर्दशभिरभ्यधीताम्" इत्येव "तत्र" बाह्वोः "ज्यायान्" "गुणोऽभिप्रेतः" तयोः प्रशस्तत्वात्, अप्रशस्तत्वाच्च तस्करयोः कनीयान् ॥ २ ॥

कुह स्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः । को वां शयुत्रा विधवेव देवरं मर्य्यं न योषा कृणुते सधस्थ आ । क्व स्विद्रातौ भवथः क्व दिवा क्वाभिप्रासिं कुरुथः क्व वसथः को वां शयने विधवेव देवरं

(देवरः कस्माद् द्वितीयो वर उच्यते) विधवा विधातृका भवति विधवनाद्वा विधावनाद्वेति चर्मशिरा अपि वा धव इति मनुष्यनाम तद्वियोगाद्विधवा देवरो दीव्यतिकर्मा मर्त्यो मनुष्यो मरणधर्मा योषा यौतेराकुरुते सहस्थानेऽथ निपाताः पुरस्तादेव व्याख्याता यथेति कर्मोपमा। यथा वातो यथा वनं यथा समुद्र एजति। आजन्तो अग्नयो यथा। आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा। आत्मानतेर्वाप्तेर्वापि वास इव स्याद् यावद्व्याप्तिभूत इति। अग्निर्न ये भ्राजसा रुक्मवक्षसः। अग्निरिव ये (मरुतो भ्राजमाना रोचिष्णूरस्का) भ्राजस्वन्तो रुक्मवक्षसः ॥३॥

द्वितीयमुदाहरणमेतस्मिन्नेवार्थे "अथापि कनीयसा ज्यायांसम्" इति,—"कुहस्विद्दोषा" (ऋ० सं० ७, ८, १८, २) इति। कक्षीवतो दुहिता घोषा नाम, तस्या इयमार्षम्। आश्विनी। जगती। प्रातरनुवाकाश्विनयोः शस्यते। हे अश्विनौ! 'कुह स्वित् दोषा' "क्व" नु युवां "रात्रौ" "भवथः? 'कुह वस्तोः' "क्व" वा "दिवा" भवथः" युवाम्? येन नापि रात्रौ अस्माकं दर्शनमुपगच्छथः, नापि दिवा। चिदिति परिदेवनायाम्, ईर्ष्यायां वा। 'कुह' "क्व" च 'अभिपित्वम्' "अभिप्राप्तिं" स्नानभोजनाद्यर्थं "कुरुथः"? 'कुह' "क्व" वा 'उषतु.' "वसथः"? सर्वथा न विज्ञायते वामागमनप्रवृत्तिः। किञ्च, 'को वां

शयुत्रा' कतमो युवां यजमानः शयुत्रा "शयने"? किं 'विधवा इव देवरम्' यथा विधवा मृतभर्तृका काचित् स्त्री शयने रहस्यतितरां यत्नवती देवरमुपचरति, स हि परकीयत्वात् नार्य्या दुराराध्यतरो भवति, यत्नेनोपचर्य्यते, न तथा निजो भर्त्ता। तस्मात् तेनोपमिमीते अश्विनौ। तथा 'मर्य्यं' मनुष्यं देवरम्। सैव मृतभर्तृका 'योषा' 'आ' 'कृणुते' आभिमुख्येन कुरुते। को वाम् एवम् आभिमुख्येन 'सधस्थे' "सहस्थाने" समाने सहयोगिना चात्मना कृत्वा परिचचार? येनेह नोपगतवन्तौ स्थोऽसम्हर्शनमिति। एवमस्यामृचि देवरेण कनीयसा ज्यायांसावश्विनावुपमीयेते, विधवया च यजमानः॥

अथैकपदनिरुक्तम्।—"विधवा विधातृका भवति"। धाता स तस्या विगत इति। "विधवनाद्वा" सा हि भर्तृमरणेन विधूता कम्पितेव भवति। "विधावनाद्वा" सा हि भर्तुरभावादनुरुध्यमाना तत्र तत्र विधावत्येव। "इति चर्मशिराः आचार्य्यो मन्यते। "अपि वा धव इति मनुष्यनाम तद्वियोगाद् विधवा। "देवरः"—इत्येष शब्दो "दीव्यतिकर्मा" दीव्यत्यर्थः, स हि भर्तुर्भ्राता, नित्यमेव तया भ्रातृभार्य्यया देवनार्थं म्रियत इति देवर इत्युच्यते। "मर्य्यः मनुष्यः" स हि "मरणधर्मा"। "योषा यौतेः" मिश्रणार्थस्य, सा हि मिश्रयत्यात्मानं पुरुषेण साकम्। "आ कुरुते सहस्थाने", आभिमुख्येन आत्मना कुरुते परिवरणाय॥

"अथ निपाताः" समाम्नाताः। यथा—"अग्निर्नये" इत्येव-

मादयः, ते चत्वारोऽवसरप्राप्ताः। ते च पुनः "पुरस्तादेव व्याख्याताः" सामान्यतः, विशेषत इदानीमुदाहरणतो व्याख्यायन्ते। तत्र "यथा इति" एषा "कर्मोपमा"। किमुदाहरणम्? "यथा वातो यथा वनं यथा समुद्र एजति। एवा त्वं दशमास्य सहावेहि जरायुणा॥" इति (ऋ० सं० ४, ४, २०, ४)। सप्तवध्रिरात्रेयोऽपश्यत्। एषा अनुष्टुप्। गर्भानुमन्त्रणे विनियुक्ता। यथा वातवनसमुद्राः एजन्ते कम्पन्ते, एवं 'त्वं' हे 'दशमास्य' दशमाससम्भूत! गर्भ! एतस्मात् मातुरुदरात् अदुःखयन् एनाम् एजत् चलन् 'अवेहि' अर्वाङ् एहि, 'सह' 'जरायुणा' उल्वेण प्रजायस्व, मा स्थाः त्वमेतस्मिन्नुदरे इत्यभिप्रायः॥

अपरमुदाहरणम्,—"अद्रुश्रमस्य केतवोः" विरश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा॥" इति (ऋ० सं० १, ४, ७, ३)। प्रस्कण्वस्यार्षम्। गायत्री। सौरी सा। अनयातिग्राह्यो गृह्यते पृष्ठस्य षष्ठेऽहनि। 'अद्रुश्रम्', 'अस्य' 'केतवः' रश्मयः 'वि' विविधाः दृश्यन्तेऽस्य भगवतः सूर्य्यस्य प्रज्ञानसतत्त्वाः, ते हि तमोऽपहत्य सर्वप्राणिनां प्रज्ञानमभिव्यञ्जयन्तीति त एव केतव इत्युच्यन्ते लक्षणया। अथवा प्रकाशसतत्त्वात्त इति साक्षादेव केतुशब्दस्तेषु स्यात्। केतुरिति विज्ञानमुच्यते, विज्ञानञ्च पुनः प्रकाशसतत्त्वाश्चैत इति केतव इत्युच्यन्ते। अथवा केतव इव सर्वतो दिशमुच्छ्रिता आदित्यमण्डले, ध्वजो हि केतुरुच्यते। के पुनस्ते? इति, 'रश्मयः'। किं कुर्वन्ति य एवमुच्छ्रिताः? इति, उच्यते,—'जनान् अनु' तिष्ठन्ति गच्छन्ति

नमांस्यपहन्तुमन्यांश्चौषधीपाकादीन्। कथं पुनरनुतिष्ठन्ति? 'भ्राजन्तः दीप्यमानाः। कथम्? 'अग्नयो यथा' येन प्रकारेण अग्नयो भ्राजन्ते, तथा भ्राजन्तोऽनुतिष्ठन्ति॥

अपरमुदाहरणम्,—"यदिमा वाजयन्नहमोषधीर्हस्त आदधे। आत्मा०—" इति (ऋ० सं० ८, ५, १०, १)। आथर्वणो भिषक्, तेनेयमोषधिसूक्ते दृष्टा। अनुष्टुप्। एतेन पुनरुपनतो दीक्षितो एकविंशतिभिर्दर्भपिञ्जूलीमिश्राभिरद्भिरभिषिच्यते। उपनापशान्त्यर्थमनेनैव सूक्तेनाग्निचयनार्थं क्षेत्रं शाम्यारण्याभिरोषधिभिरुप्यते। 'यत्' 'यदा' अहम् 'इमाः' 'ओषधीः' 'हस्ते' 'आदधे' आधाय च सन्निकर्षेऽपि तिष्ठामि रोगिणः एताः ओषधीः 'वाजयन्' पूजयन् स्तुवन्नित्यर्थः। अथ तदैव तदनन्तरमेव 'पुरा' एव तासामोषधीनां प्रयोगात् अस्मात् सुनीतम् ओषधिवीर्य्यम्, असह्यं मन्वानः 'आत्मा' 'यक्ष्मस्य' यक्ष्मणः 'नश्यति' रोगस्यापुनरागमनाय। कथं पुनर्नश्यति? 'जीवगृभः यथा' यथा जीवग्राहस्य, पुरैव हननात्, अहतस्यैव जीवो नश्येत् विपदो दैवात्, एवमात्मा रोगस्यापि पुरैवौषधिप्रयोगात् नश्यतीत्यभिप्रायः॥

निगमप्रसक्तमुच्यते,—"आत्मा अततेर्वा" सर्वमेव हि तेनाततं भवति सर्वगत्वात्। "आप्नेर्वा" सर्वमेव हि तेन व्याप्तं भवति सर्वगतत्वादेव। "अपि वास इव" सङ्गते, ह्यसौ कार्य्यकारणस्थः "यावद् व्याप्तिभूत इति' अपि चैवमन्यथा "स्यात्" आप्तो व्याप्त इव स्यात्। किञ्च सर्वगतत्वेऽपि सति यावन्मात्रमेव तस्य कार्य्यकारणसङ्गतेन व्याप्यते, तावन्मात्रभूत

एवासौ लक्ष्यते, तावन्मात्रे हि प्रदेशे तस्य चैतन्यशक्तिरभिव्यज्यते, तप्तायसि दर्भमुष्टिप्रक्षेपात् अग्न्यभिव्यक्तिवदिति। सूक्ष्मेण हि स्थूलं व्याप्यते, न स्थूलेन सूक्ष्मम्, स्थूलञ्च कार्य्यकारणम् सूक्ष्म आत्मा, तस्मादिवशब्दः॥

"इदं यथा (२)", "अग्निर्नये (३)", चतुरश्चिद् ददमानात् (४)"—इत्येषः समाम्नायानुक्रमः। अग्निर्नय इत्यस्य निघण्टु-तन्त्रस्य "दुर्मदासो न सुरायाम्"—इत्यनेनैव गतार्थतेति मन्य-माना. केचिदत्र निगमं नाधीयते, अपरे पुनः समाम्नायानुक्रमोऽ-यमिति मन्यमाना एवमेवं निगममधीयते। "अग्निर्नये भ्राजसा रुक्मवक्षसो वातासो न स्वयुजः सद्य ऊतयः। प्रज्ञातारो न ज्येष्ठाः सुनीतयः सुशर्माणो न सोमो ऋतं यते॥" (ऋ० सं० ८, ३, १२, २) भार्गवस्य त्रसदस्योरियमार्षम्। मारुती। जगती। अग्निरिव ये भ्राजिष्णुतया रोचनाः, यथा केनचित् प्रकर्षेण 'रुक्मवक्षसः' रोचिष्णूरस्काः, मरुतः। किञ्च, 'वातासो' न स्वयुजः सद्य ऊतयः' वाता इव स्वयुजः स्वेन स्वेनानुग्रहेणा-नुग्राह्याणां स्तोतॄणां योजयितारो ये ते 'स्वयुजः'। किं तेषाम्? 'सद्य ऊतयः' शीघ्रगतय इत्यर्थः। किञ्च, 'प्रज्ञातारो न ज्येष्ठाः सुनीतयः' यथा केचित् प्रकर्षेण ज्ञातारः 'सुनीतयः' स्युः, प्रशस्तया नीत्यान्विताः, एवमेतेऽपि मरुतः। बलप्रधाना हि ते इत्यतः प्रज्ञावद्भिरुपगीयन्ते। सुशर्माणो न सोमा ऋतं यते। सुखाः बन्धव इव सन्तु 'सोमाः' सोम्याः 'ऋतं यते' ऋतं यज्ञं कर्तु-मिच्छते यजमानाय। ये एवङ्गुणयुक्ता मरुतो भवन्त्विति,

तान् वयम् अभिप्रेतार्थसिद्धये स्तुम इति वाक्यशेषः ॥ ३ ॥

चतुरश्चिद्दमानाद्बिभीयादा निधातोः। न दुरुक्ताय स्पृहयेत्। चतुरोऽक्षान् धारयत इति तद्यथा कितवाद् बिभीयादेवमेव दुरुक्ताद् बिभीयान्न दुरुक्ताय स्पृहयेत् कदाचिदा इत्याकार उपसर्गः पुरस्तादेव व्याख्यातोऽथाप्युपमार्थे दृश्यते। जार आ भगम्। जार इव भगमादित्योऽत्र जार उच्यते रात्रेर्जरयिता स एव भासां तथापि निगमो भवति। स्वसुर्जारः शृणोतु न इत्युपसमस्य स्वसारमाह साहचर्य्याद्रसहरणाद्वापि त्वयं मनुष्यजार एवाभिप्रेतः स्यात् स्त्रीभगस्तथा स्याद् भजतेर्मेप इति भूतोपमा। मेपो भूतो ३ भियन्नयः। मेपो मिपतेस्तथा पशुः पश्यतेरग्निरिति रूपोपमा। हिरण्यरूपः स हिरण्यसन्दृगपान्नपात्सेदु हिरण्यवर्णः। हिरण्यवर्णस्येवास्य रूपं था इति च। तं प्रत्यथा पूर्वथा विश्वथेमथा। प्रत्न इव पूर्व इव विश्व इवेम इवेत्ययमेततरोऽमुष्मादसावस्ततरोऽस्मादेमुथा यथासाविति व्याख्यातं वदिति सिद्धोपमा। ब्राह्मणवद् वृषलवत्। ब्राह्मणा इव वृषला इवेति (वृषलो वृषशीलो भवति वृषाशीलो वा ॥ ४ ॥ (१६)

चिदित्ययमपरो निपात उपमार्थीयो भवति, पुरस्ताद्प्यय-मुक्तः "दाधचिदित्युपमार्थे" इदानीं समाम्नायविशेष व्याख्याना-वसरप्राप्तस्य छान्दसमुदाहरणमस्य प्रदर्श्यते। कतमत् पुनस्तत्? इति, उच्यते,—"चतुर स्पृहयेत्"। (ऋ० सं० १, ३, २३, ४)। मित्रावरुणार्य्यमॄणतृचे घोरपुत्र एतां गायत्रीमपश्यत्। चतुरोऽ-क्षान् धारयमाणात् "कितवात्" योऽन्यः कितवो "बिभीयात्" किमपि यतिष्यन्ते तदन्यद्वा किञ्चिद् येन मामयं जेष्यतीति। निहितेषु न तथा भयं भवति यथा कितवस्य प्राङ् निधानात्। "एवं" सर्वदा "एव" "दुरुक्तात्" "विभीयात्" उद्विजेदित्यर्थः। तथा तथा वर्त्तेत यथा यथा दुरुक्तं न शृणुयात्, न श्रूयते। दुरुक्ते हि वरुणो देवता, तस्मात् "न दुरुक्ताय स्पृहयेत्" "कदाचित्" अपि किन्तु सूक्तमेव हि शृणुयात्, तत्र हि मित्रो देवता अर्य्यमा च॥

"ब्राह्मणा व्रतचारिणः"—इत्येतदुपरिष्टाद् व्याख्यास्यते—"संवत्सरं शशयाना (ऋ० सं० ५, ७, ३, १)"—इत्येतस्मिन् मन्त्रे, चतुर्दशेऽध्याये॥

"वक्षस्य नु ते पुरुहूतवयाः"—इत्येतत् पुरस्ताद् व्याख्यातम्॥

"आ इत्याकार उपसर्गः" स पुनरेषः "पुरस्तादेव व्याख्यातः" —"आ इत्यर्वागर्थे" इति, "अथापि" अयमाकारः कदाचित् "उपमार्थे" अपि "दृश्यते"। तद्यथा,—"जार आ भगम्" इति। किमुक्तं भवति? जार इव भगम्"—इति। आह,—कोऽयमत्र जार उच्यते? "अरदित्योऽत्र" "जारः" इति "उच्यते" अस्मिन्

मन्त्रे। स हि "रात्रेर्जरयिता" तदुदये हि रात्रिर्जीर्य्यते विपरणमतीत्यर्थः। "स एव भासाम्" चन्द्रादीनां या भासः ता अपि स एव उद्यन् जरयति॥

"उदीरय पितरा जार आ भगमियक्षति हर्य्यतो हृत्त इष्यति। विवक्ति वह्निः स्वपस्यते मुखस्तविष्यते असुरो वेपते मती॥" (ऋ० स० ७, ६, १०, १)। अङ्गिरःपुत्रो हविर्धाने एतया जगत्या अग्निमस्तौत्। पितृमेधे विनियुक्ता। हे भगवन्नग्ने! सर्वगतं सन्तमशेषस्थमात्मानं विशेषात्मलाभाय 'उदीरय' उद्गमयैव। अरणी पितरौ प्रति, अथवा द्यावापृथिव्यौ पितरौ स्याताम्, "द्यौर्मे पिता माता पृथिवी॥" (ऋ० सं० २, ३, २०, ३)। अहोरात्रे वा, ते प्रति विशेषात्मलाभायोज्ज्वलय त्वमात्मानम्। कथञ्च पुनरुदीरय। 'जार आ भगम्' जार इव भगम्। जार आदित्यो यथा भगं भजनीयं भौममान्तरिक्षञ्च रसं स्वं वा ज्योतिरूर्द्ध्वमीरयति, एवं त्वमात्मानं पितरौ प्रत्युदीरय। कस्मात् पुनरेवमादरवान् ब्रवीमि। यस्मादेव यजमानः 'इयक्षति' यष्टुमिच्छति देवान्, 'हर्य्यतः' हवींषि प्रेप्स्यतः, न च त्वद्वृते शक्येज्येयम्, त्वमेव 'हि प्रतिविशिष्ट' यज्ञसाधनं सर्वमन्यत्र चैवङ्गुणभूतम्। किञ्च, अयं यजमानः 'हृत्तः' हृदयेन 'इष्यति' इच्छत्यात्मनोऽभिलषितान् कामान्, न च देवाननिष्ट्वा शक्यास्ते प्राप्तुमिति अतो ब्रवीमि,—देवयागाय यजमानकामप्राप्तये च उदीरय त्वमात्मानमिति। किंच, अयमपि 'वह्निः' यज्ञवोढा होता 'स्वपस्यते' यजमानाय अभीष्टकामोपपिपादयिषया

देवतितर्पयिषया च तृप्तये जगदनुग्रहाय च ऋत्विग्भिः कर्म क्रियमाणमिच्छति 'विवक्ति' च अतो ब्रवीमि,—आत्मानमभ्युदीरय पितरौ प्रति विशेषतमलाभाय। 'किञ्च' 'मखः' 'तविष्यते' परिसमाप्तिं यास्यति उपक्रमादारभ्यापवर्गात्, अतो ब्रवीमि,—उदीरय त्वमात्मानमिति। किञ्च, अयमप्यध्वर्युः 'असुरः' असुमान् प्रज्ञावान् अतिकुशलः अस्मिन् यज्ञकर्मणि 'वेपतेमती' मत्या वेपते प्रोत्कम्पमानहृदय आस्ते सादरः प्रह्वीभूतः, अपि नामायमुदीरयेदात्मानं ततोऽहमेनद्यज्ञकर्म तनुयामिति; अतो ब्रवीमि,—उदीरय त्वमात्मानमिति। अपि वा असुरो ब्रह्मा, स हि त्रयीविद्योपजनितप्रज्ञानः। अपि चोद्गाता असुरः, स हि प्राणेनासुना तद्वान्, उद्गातृत्वस्य प्राणवृत्त्यधीनत्वाद् विशेषणम्। अपि वा यज्ञाधिदैवतैवान्वादिश्यतेऽसुर इत्यनेन तस्या आनन्तर्य्यात्। अपि वा सर्व एवैते यजमानादयोऽन्वादिश्येरन्, सर्वेषां प्रकृतत्वात्। 'असुरः' असुराः 'वेपते' वेपन्त इति, सर्व एते यजमानादयोऽसमन्तः मतिभिर्वेपन्तो प्रोत्कम्प मानहृदया आसते, युष्मदात्मोदीरणप्रतीक्षाः। अपि नाम अयमग्निरुदीरयेदात्मानं ततो नोऽभिप्रेतार्थसाफल्यं स्यादिति, अतो ब्रवीमि,—उदीरयत्वमात्मानमरण्यादीनां पितृणामन्यतमौ पितरौ प्रति। अपि चैतावेव पितरौ दम्पती पत्नी यजमानौ अग्न्याधेयेन नवजननसम्बन्धेन पितरः। हे भगवन्! अग्ने! तावेतौ यज्ञविपरिणामकाले एतस्मिन् प्रत्युपस्थिते देवयानेन वा पितृयानेन वा मार्गेण उदीरय उद्गमय यथाप्रार्थितफलप्राप्तये। समानमन्यद्ऋक्छे(शे)षं पूर्वेणार्थेन॥

यथा आदित्यो जारशब्देनोच्यते "तथा अपि" अयं "निगमो भवति" (अथान्येऽपि बहवः इत्यपिशब्दः),—"मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः। भ्रातेन्द्रस्य सखा मम ॥" (ऋ० सं० ४, ८, २१, ५)। एषा गायत्री। भरद्वाजस्यार्षम्। "एहि वां विमुचो नपादाघृणेः (ऋ० सं० ६, ५, ६, १)"—इत्येतस्मिन् पौष्णे सूक्ते। 'मातुः दिधिषुम्' माता रात्रिरादित्यस्य, स हि भगवान् रात्र्या जघने प्रातरुदेति कुमार इव स्त्रियाः प्रसवकाले, तेन ज्ञायते रात्रेरेवासौ जायत इति, अतो रात्रिर्माता, तस्याः स एवं धारयिता रोद्धा, तम् 'मातुर्दिधिषु" धारयितारमहम् 'अब्रवम्' उक्तवानस्मि यन्मेऽभिप्रेतम्। स एव चादित्यः 'मम' 'सखा' समानख्यानः। यथैवाहमेतस्मिन् यज्ञे जगदनुग्राहके कर्मणि अभिप्रवृत्तः, एवमसावपि प्रकाशपाकरसादानवर्षादिलक्षणे कर्मणि जगदनुग्राहके अभिप्रवृत्तः, इत्येतस्मादावयोऽसमानख्यानत्वम्। यत एव मम समानख्यानः, अतो मध्यमस्य च 'इन्द्रस्य' 'भ्राता' उदकभागहर्त्ता अथ वा मध्यमस्यैवोदकेन भर्त्तव्यः, तेन ह्यसौ दीप्यते। स पुनः किं करोतु? यच्च पूर्वमहमब्रवं तच्च साधयतु, साम्प्रतञ्च यद्वयं ब्रूमः, तच्च 'शृणोतु' श्रुत्वा च तदपि साधयत्वित्यभिप्रायः। 'स्वसुर्जारः' इति। अस्मिन् मन्त्रे स्वसृशब्देन मन्त्रद्रुक् "उषसम्" "आह"। केन पुनः सामान्येनेति? उच्यते,—"साहचर्य्यात् रसहरणाद्वा", भ्राता स्वस्रा साकं बाल्ये नित्यमेव चरति, यथा चोषसा साकमादित्य इत्येतत् सामान्यम्। आदित्यो हि पूषा, "अथ

यद्रश्मिपोषं पुष्यति, तत् पूषा भवति"—इति हि वक्ष्यति। तस्मात् पूष्णः एतस्मिन् मन्त्रे जारत्वमेतत् आदित्यस्य दर्शितम्। रसहरणाद्वा उषाः स्वसादित्यस्य। भ्रातृस्वस्रोः सम्भोजनाभिप्रायसामान्यम्। "अपि त्वयं मनुष्यजार एवाभिप्रेतः स्यात्" अथादित्योऽपि मनुष्यजारः। अयमेवास्मिन् मन्त्रे "उदीरय पितरा जार आ भगम् (ऋ० सं० ७, ६, १०, १)" इत्यभिप्रेतो मन्त्रद्रशः, नैरुक्तानां वा स्यात्। "तथा" पुनः सति "स्त्रीभगः" एव "स्यात्"। भगः "भजतेः" सेवनार्थस्य, स हि सेव्यते मैथुनार्थिभिः पुरुषैः। जारो मनुष्यः, स हि परकीयां स्त्रियं भोगेन सार्वाङ्गिकेण निर्दयो भूत्वा जरयति विपरिणामयति, म्लानरूपां करोति, न तथा निजो भर्त्ता। तं च दृष्टान्तदर्शनेनैवोदीरय,—तथैव स्त्रियाः भग उपस्थः, पुरुषशिश्नसंयोगे आर्द्रीभवति, एवमरणियोक्त्रादिहस्तानस्मान् युष्मन्मिमन्थिषून् दृष्ट्वोदरीय त्वामात्मानं हे भगवन्नग्ने! इत्येवं योज्यं जारशब्दे मनुष्यविषये सति॥

"मेष इति भूतोपमा" मेष इत्येषा भूतशब्देनोपमा। "मेषो भूतोऽमि यन्नयः (ऋ० सं० ५, ७, २४, ५)"—इत्येष निगमः। निगमप्रसक्त उच्यते,—"मिषो मिषतेः" दर्शनार्थस्य। पर्य्यायप्रसक्तमुच्यते,—"तथा पशुः पश्यतेः" इति, पश्यति ह्यसौ। "इत्था धीवन्तमद्रिवः काण्वं मेध्यातिथिम्। मेषो भूतोऽमि यन्नयः॥" (ऋ० स० ५, ७, २४, ५)। काण्वस्यैव मेध्यातिथेरियमार्षम्। ऐन्द्री। गायत्री। हे 'अद्रिवः' अद्रिवन्! वज्रिन्!

'इत्था' अमुना प्रकारेण 'मेषो भूतः'। इत्थमनेन शब्देन अमुंनेत्येतच्छब्दपर्य्यायवाचिना अभिगमनप्रकारमेतस्मादेव मन्त्रदृग्दर्शनाद् विज्ञाय अभिनयेन मन्त्रदृग्वर्त्तमानः काण्वो मेधातिथिर्दर्शयति,—हे अद्रिवन्! एवमन्यकल्पान्तरीणमेव 'मेध्यातिथि' धीवन्त' कर्मवन्तं वा 'अमियन्' आहूतौ याक्षे कर्मणि आभिमुख्येनाभ्युद्यतेर्महद्भिर्दायैः 'यन्' गच्छन्, आह्वानसमनन्तरमेव अधिलम्बमानः 'मेषो भूतः' मेष इव किञ्चिदप्युत्तरमब्रुवन् तं गौरवावगतमित्था अनेन प्रकारेण अयस्त्वम् आप्तवानसि। न च तदस्माकमप्रत्यक्षम्। एतस्मादेव मन्त्रदर्शनादखिलं तद् विजानीमो वयं यतोऽतो ब्रूमः। अपवृत्ते तस्मिन् काण्वे मेध्यातिथौ सहान्यमन्वन्तरीणैरधिकारिभिरिदानीमस्य मनोरन्तरे मेधातिथिप्रापकेण कर्मणा मेधातिथिपदम्, तदहं प्राप्तवान्। सोऽहं ब्रवे,—याः ताः काण्वमेधातिथिद्वारेण स्तुतयः नित्याः प्रादुर्भवन्ति। एतासां प्रज्ञत्वमपि वर्त्तते। स त्वमेताः शुश्रूषुः, हवींषि चास्मत्प्रदत्तानि प्रतिजिघृक्षुः, पूर्वकाण्वमेधातिथिवदस्मानभ्येहि, किमर्थं वा नाभ्येषीत्यभिप्रायः॥

"अग्निरिति" एषा "रूपोपमा"। "हिरण्यरूपो हिरण्यवर्णः हिरण्यात् परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै॥" (ऋ० सं० २, ७, २३, ५)। गृत्समदस्येयमार्षम्। त्रिष्टुप्। अपान्नपात् देवता। कुम्भेष्टकोपाधानेऽग्निचयने विनियुक्ता। 'हिरण्यरूपः' हिरण्यसमानरूपः। अपि च, 'सः' 'अपान्नपात्' मध्यस्थानो वैद्युतोऽग्निरादित्यस्य पुत्रोऽपान्नपात्, प्रावृट्काले घर्मार्त्तानां प्रजानामन्नार्थि-

नीनां च 'हिरण्यसन्दृक्' हिरण्यमिव सन्दृश्यमानः मनःप्रीतिजनकः। अपि च, स एव 'हिरण्यवर्णः, हिरण्यमिव वरणीयः प्रार्थनीयो भूतानाम्। य एवङ्गुणयुक्तोऽपान्नपात्, स किं करोतु ? इति,—'हिरण्ययात्, तेजोमयात् 'योनेः' आदित्यात् विनिर्गत्य 'परिनिषद्य' सर्वतो निषद्य मध्यस्थाने अभ्रजालेनान्तरिक्षलोक व्याप्य ('हिरण्यदाः'—इत्येकं पदम् विसर्जनीयान्तम्) 'हिरण्यदाः' हिरण्यदाता। सोऽपान्नपात् परिषद्य 'ददति' ददतु 'अन्नम्' अन्नहेतूदकम् 'अस्मै' यजमानाय इति। "समुद्रादूर्मिर्मधुमाँ उदारत्" (ऋ० स० ३, ८, १०, १)—इत्यादित्यमुक्तं मन्यन्ते, इत्येतस्माद् दर्शनादपां पुत्र आदित्यः। "आदूतो अग्निमभरद् विवस्वतः" (ऋ० सं० ४, ५, १०, ४)—इत्यतश्चादित्यस्यापि वैद्युतोऽग्निः पुत्रः, इत्येवमसावपान्नपात् अपां नप्ता ॥

'था'—इत्ययं वोपमाशब्दः। आह,—किमुदाहरणम् ? उच्यते,—"तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम्। प्रतीचीनं वृजनं दोहसे गिराशुं जयन्तमनु यासु वर्द्धसे ॥" इति (ऋ० सं० ४, २, २३, १)। अवत्सारः पञ्चदशं सूक्तमपश्यद् वैश्वदेवम्, तस्मिन् वैश्वदेवे सूक्ते प्रथमामेवैतां जगतीमपश्यत्। वैश्वदेवेषु च सूक्तेषु एकदेवता अपि मन्त्रा भवन्त्येव। बाह्वृच्ये वाजपेये सप्तदशे शस्त्रे विनियुक्तोऽयम्। चरकाध्वर्यवः पुनरनया मन्थिनं गृह्णन्ति। तेषां पुनः श्रुतिः,—"प्रजापतेर्वा एते चक्षुषी यच्छुक्रामन्थिनौ, असावादित्यः शुक्रः, चन्द्रमा मन्थीत्येवं चन्द्रदैवतोऽयं मन्त्रः। अपि वा

"तस्मै सूर्य्याय हविराजुहोत"—इति हवनमन्त्रे सूर्य्यश्रवणात् सूर्य्यदेवतोऽयम्। शौनकस्तु दाशतये समाम्नाये मन्त्रदेवता अनुक्रममाणः "को नु वां मित्रावरुणौ (ऋ० सं० ५, ३, ६ सू०)"—इत्यत आरभ्य वैश्वदेवान्येकादशसूक्तान्यवोचत्, "तं प्रत्नथा (ऋ० सं० ५, ३, १२ सू०)"—इत्येतच्चतुर्थं सूक्तम्, तेन तन्मत्या वैश्वदेव एष मन्त्रः स्यात्। वाजसनेयिनां पुनरनया शुक्रो गृह्यते, स च सा प्रथमा संस्कृतिरित्यनेनैन्द्रेण हूयते, तेन तेषामप्ययमैन्द्र एव। त्रारके पुनराध्वर्य्यये श्रुतिः शुक्रामन्थिनोः, तस्मादेतावन्यदेवतौ गृह्येते। अथेन्द्राय हूयते इति तेन ज्ञायते। यद्यपि हवनमन्त्र ऐन्द्रो मन्थिनः, तथापि ग्रहणमन्त्रो नैन्द्र इति, स एव सर्वथाप्येवं दुरवधारदेवतो मन्त्रः, अनिरुक्तदेवतालिङ्गत्वात्। शण्डामर्कयोस्त्वसुरपुरोधसोः सम्मोहनार्थमनेनानिरुक्तदेवतालिङ्गेन मन्त्रेणान्यतरः शुक्रामन्थिनोर्गृह्यते। "शण्डामर्कौ वा असुराणां पुरोहितावास्ताम्"—इत्युपक्रम्य "तावेतौ शुक्रामन्थिनावावृणीथाम्"—इत्युक्त्वा "तावपनुद्याथेन्द्रायां जुहुयुः" —इत्युक्तम्। तस्मात्तावनेनानिरुक्तदेवतालिङ्गेन मन्त्रेण सम्मोह्यते। सौम्यो वा स्यादप्ययम्, सोमो ह्युच्यते मन्थिपात्रेण शुक्रपात्रेणःगृह्यमाणः, गृहीतो वा सप्तदशशस्त्रशंसनाभिप्रायेण। हे भगवन्! सोम! तमिन्द्रं वा, वैश्वदेवं गणं वा 'ज्येष्ठराजं' ज्येष्ठदीप्तिम्। अथ वा ज्येष्ठः श्रेष्ठः सर्वेषां देवानामिन्द्रः, स यस्य राजा, सोऽयं ज्येष्ठराट् वैश्वदेवगणः, तं ज्येष्ठराजम्। बर्हिष्याहूतो यज्वभिः यः सीदति, स बर्हिषत्, तं 'बर्हिषदम्'।

स्वरिवं यो दृश्यते, सः स्वर्दृक्, तं स्वर्दृशम्' सूर्य्यसमानदर्शनमित्यभिप्रायः। 'आशु' शीघ्रम्। 'जयन्ते' जेतव्यानसुरादीन्। तमेवङ्गुणसंयुक्तम् इन्द्रं' वैश्वदेवं सगणं हे सोम! 'यासु क्रियासु 'अनुवर्द्धसे' पुनः पुनः संस्क्रियसे। स त्वं क्रियासु तासु तथावस्थितस्त्वं 'गिरा' स्तुत्या सहितः त्वं 'प्रतीचीनं' यज्ञाभिमुखम् इन्द्रं वैश्वदेवं वा गणम् अवस्थाप्य स्ववीर्य्येण तर्पयित्वा अस्मै यजमानाय 'वृजनं' धनं 'दोहसे' धोक्षि प्रक्षारयसि। कथं पुनः धोक्षि इन्द्रं वैश्यदेवं वा गणम्? 'प्रत्नथा' चिरन्तना इव। ये महर्षयो भृग्वादयः, तेषां यथा दुग्धवानसि, तथा अस्माकमपि धोक्षि। अपि च 'विश्वथा' ऋषिपुत्रकाणामृषीणाञ्च सर्वेषां यथा' दुग्धवानसि, तथास्माकमपि धोक्षि। अपि च 'इमथा' यथा वर्त्तमानकालीनानां यजमानानां धोक्षि, तथैवास्माकमपीति। एवमेष यथाभिमतदेवतं योज्यः॥

इमथेत्येतस्मात् प्रसक्तमुच्यते,—"अयम्" इत्यस्य शब्दस्य का व्युत्पत्तिरिति? उच्यते,—"एततरः" हि आगततर आसन्नतरः "अमुष्मात्" दूरस्थात् भवति, सोऽयमित्युच्यते। "असावित्यस्य का व्युत्पत्तिरिति? उच्यते,—"असौ अस्ततरः" अस्मात् क्षिप्ततर इव विप्रकृष्टत्वाद्व भवति। आह,—कुतः क्षिप्ततरः? उच्यते,—"अस्मात्" एततरात्। असावित्येतस्मात् प्रसक्तमुच्यते,—"अमुथा, यथा असौ इति" असावित्यनेन शब्देनोक्तो भवति, स एवार्थः अमुथेत्यनेनाप्युक्तो भवति॥

"यदिति" एषा "सिद्धोपमा" सिद्धैवैषोपमा लोके। आह,—

कथं कृत्वा ? उच्यते,—"ब्राह्मणवत्, वृषलवत्" । ब्राह्मणवदधीते, वृषलवच्चाक्रोशतीति ॥ ४ ॥

प्रियमेधवदत्रिवज्जातवेदोविरूपवत् । अङ्गिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवम् । प्रियमेधः प्रिया अस्य मेधा यथैतेषामृषीणामेवं प्रस्कण्वस्य शृणु ह्वानं प्रस्कण्वः-कण्वस्य पुत्रः कण्वप्रभवो यथा प्राग्रमर्चिषि भृगुः सम्बभूव भृगुर्भृज्यमानो न देहेऽङ्गारेष्वङ्गिरा अङ्गारा अङ्कना (अञ्चना) अत्रैव तृतीयमृच्छतेत्यूचुस्तस्मादत्रिर्न त्रय इति विखननाद्वैखानसो भरणाद्भारद्वाजो विरूपो नानारूपो महिव्रतो महाव्रत इति ॥ ५ ॥ (१७)

इति तृतीयाध्यायस्य तृतीयः पादः ॥ ३, ३ ॥

छान्दसमुदाहरणं ब्रवीति,—"प्रियमेधवत्"—इति । एषा प्रस्कण्वस्यार्षम् । अनुष्टुप् । आग्नेयी प्रातरनुवाकाश्विनयोः शस्यते । हे 'जातवेदः !' 'महिव्रत' महाव्रत ! महाकर्मन् ! महद्ध्यस्य भगवतो जातवेदसः कर्म, हविर्वहणा(ना)दिलक्षणम्, तेनैवामन्त्र्यते महिव्रत ! इति । यथैतेषामृषीणां प्रियमेधादीनां श्रुतवानसि पूर्वमाह्वानम्, शृणोषि वा, एवं ममापि 'प्रस्कण्वस्य' शृणु आह्वानम् । इत्याशीः ॥ एष समस्तार्थः ॥

अथैकपदनिरुक्तम् ।—"प्रियमेधः, प्रिया अस्य मेधाः" यज्ञाः इत्यर्थः । यष्टुमिति वाक्यशेषः । "प्रस्कण्वः, कण्वस्य पुत्रः" प्रपदस्य

तद्धितार्थत्वं निराह, कण्वस्यापत्यमित्यर्थः। "यथा" प्रगतमग्रं "प्राग्रम्" इत्युच्यते, गतशब्दलोपं कृत्वा, एवमिहापि "कण्व-प्रभवः" इति वक्तव्ये भवशब्दलोपं कृत्वा व्यत्ययेन च प्रस्कण्व इत्युक्तम्। "भृगुः, भृज्यमानो न देहे" प्रजापतिना किल शुक्रमात्मीयमादाय अग्नौ हुतम्, ततः "अर्चिषि" ज्वालायां "भृगुः" नाम महर्षिः "सम्बभूव" व्यपगतेऽर्चिषि योऽङ्गारेषु सम्बभूव सोऽङ्गिरा नाम अभवत्। विग्रहप्रसक्तमुच्यते,—"अङ्गारा अङ्कनाः" ते हि यत्र निधीयन्ते तदङ्कितं भवति। तस्मिन्नुत्पन्ने द्वितीये "अत्रैव तृतीयमृच्छत"—"इत्यूचुः" ये पूर्वोत्पन्नाः ते। "तस्मात्" अत्रैव तृतीय इत्येतस्मादनुव्याहारात् "अत्रिः" अभवत्। अथवैवमन्यथा स्यात्,—अत्रिः प्रतिषेधार्थोऽकारः। कथम्? "न त्रयः" एवात्र, किन्तर्हि? खन्यतामेतदग्निस्थानं चतुर्थोऽप्यत्र भविष्यतीत्येवमनुव्याहारादत्रिरभवत्। व्युदुह्यार्ग्नि तस्मिन्नग्निस्थाने य उत्पन्नः सः "विखननाद् वैखानसः" एव नाम्ना अभूत्, "बभूवार्चिःषु अङ्गारेषु तत्रैव तृतीयं विखननाद् वैखानसः" इति। अनयैवानुपूर्व्येणैतानि निर्वचनान्युपपादयितुं शक्यन्ते, तस्मान्मन्त्रपाठविपर्य्यासेनैतानि निरुक्तानि। "विरूपो नाना-रूपः" इति ऋज्वेव। व्रतमिति कर्मनाम। "महिव्रतो महा-व्रतः" "इति" अर्थः ॥ ५ ॥

इति निरुक्तवृत्तौ अष्टमाध्यायस्य (तृतीयाध्यायस्य)

तृतीयः पादः ॥ ३, ३ ॥

चतुर्थः पादः

अथ लुप्तोपमान्यर्थोपमानीत्याचक्षते सिंहो व्याघ्र इति पूजायां श्वा काक इति कुत्सायां काक इति शब्दानुकृतिस्तदिदं शकुनिषु बहुलं न शब्दानुकृतिर्विद्यत इत्यौपमन्यवः काकोऽपकालयितव्यो भवति तित्तिरिस्तरणात्तिलमात्रचित्र इति वा कपिञ्जलः कपिरिव जीर्णः कपिरिव जवत ईषत्पिङ्गलो वा कमनीयं शब्दं पिञ्जयतीति वा श्वाशुयायी शवतेर्वा स्याद्गतिकर्मणः श्वसितेर्वा सिंहः सहनाद्धिंसेर्वा (स्यात्) विपरीतस्य सम्पूर्वस्य वा हन्तेः संहाय हन्तीति वा व्याघ्रो व्याघ्राणाद् व्यादाय हन्तीति वा ॥ १ ॥ (१८)

"अथ लुप्तोपमान्यर्थोपमानीत्याचक्षते"। उपमाधिकारो वर्त्तते। "यदेतत् तत्सदृशमिति"—एतदुपक्रान्तम्। तत्र शब्दवत्यश्चोपमा भवन्ति, लुप्तोपमाशब्दाश्च। तत्र "अग्निर्न यै" इत्येवमादिभिः शब्दैरुपमितिप्सितानामर्थानां समानरूपैरर्थस्य मानं क्रियत इत्येदनुक्रान्तम्। अथ इदानीं यैषु पदेषु लुप्यन्ते उपमाशब्दा इवादयः, तान्यवसरप्राप्तानि व्याख्यास्यामः, तानि पुनरिमानि अथोपमानीत्येवमाचक्षते आचार्य्याः, निरूढा क्रियते

सञ्ज्ञेत्यभिप्रायः। तानि च पुनरसमाम्नातान्येव निघण्टुसमाम्नाये, तेषु वक्तुरभिप्रायगता एत एवोपमाशब्दा अर्थत उपमीयन्त इत्यर्थोपमा इत्युच्यन्ते। तान्येतानि भाष्यस्य विस्तरविषयत्वात् समाम्नातान्यपि सन्ति अवसरप्राप्तानि प्रदर्श्यन्ते। तद्यथा, —"सिंहो व्याघ्र इति पूजायाम्"। यो हि पूज्यो भवति स उच्यते 'सिंहो देवदत्तः' इति। अत्र न सिंह एव देवदत्तः किन्तर्हि? सिंहगुणस्तत्र कश्चिदस्ति शौर्य्यादिः, अतस्तदभिधानेनोपमार्थं कृत्वोपमाशब्दानामिवादीनामन्यतममनुच्चारयन्नेव ब्रवीति 'सिंहो देवदत्त.' इति। यत्तदनुच्चारणमुपमाशब्दस्य स एव लोप इत्युच्यते॥

"श्वा काक इति कुत्सायाम्"। यो हि लौल्यादिदोषसमन्वयेन कुत्सनीयो भवति, स एवमुच्यते,—'श्वा अयम्' इति। अत्रापि श्वेवायमिति इवशब्दस्य लोपो द्रष्टव्यः। धार्ष्ट्यादिदोषसमुच्चयेन यः कुत्स्यते, सः 'काकोऽयम्' इत्युच्यते। काकादिशब्दान् उदाहरणप्रसक्तान् निर्ब्रवीति,—"काक इति शब्दानुकृतिः"। अनुकरणमनुकृतिः, शब्दस्यानुकृतिः, यादृशमेवासौ शब्दं करोति तथैवानुकृत्या तस्य नामापि भवति शब्दस्यानुकृतिः। स हि काकु इति वोच्यते, तस्मात् स काक इत्युच्यते। "तदिदम्" एवं शब्दानुकृतिहेतुकं नाम "शकुनिषु" एव तान्येषु सत्वविशेषेषु "बहुलं" प्रायेणेत्यर्थः। "न शब्दानुकृतिर्विद्यत इत्यौपमन्यवः" शकुनिष्वपि न शब्दानुकृतिहेतुकं नाम विद्यते, इत्यौपमन्यव आचार्य्यो मन्यते। किं कारणम्? व्यभिचारित्वात्।

श्यामा, दर्वी, पुच्छप्लवः, हंसः, इत्येवमादिष शब्दानुकरणहेतुको नामधेयप्रतिलम्भो नास्ति। शकुनिपक्षेऽपि शब्दानुकारो न विद्यते। बहवोऽप्येवंप्रकारा अन्यक्रियार्थैर्नामभिरन्विताः शकुनयः। तत्र, यदुक्तं "तदिदं शकुनिषु बहुलम्" इति। एतदयुक्तम्। आह,—कथन्तर्हि काकस्यान्यक्रियाहेतुको नामधेयप्रतिलम्भ इति? उच्यते, —स हि "काकः अपकालयितव्यो भवति उपघातभयात्, स हि यद्यत् स्पृशति तत्तदुपहन्तीति अपकाल्यते तस्मात् काक इत्युच्यते। शकुनित्वसामान्यप्रसक्तमुच्यते,—"तित्तिरिस्तरणात्"। 'तॄ प्लवने (भू० प०)'। उत्प्लुत्यासौ गच्छति। "तिलमात्रचित्र इति वा"। अथ वा तिलमात्रचित्रः स भवतीति तित्तिरिः। "कपिञ्जलः कपिरिव जीर्णः" यादृशो हि कपिः मर्कटः, जीर्णः सवर्णतो भवति, तादृशोऽसावपि कपिञ्जल इत्युच्यते। अथ "वा" "कपिरिव जवते" कपिञ्जलः "ईषत्पिङ्गलः" इत्यर्थः। अथ "वा" "कमनीयं" प्रार्थनीयं मङ्गल्यं मधुरं वा "शब्दं" "पिञ्जयति" अभिव्यनक्तीति कपिञ्जलः। "एवमादीनि शकुनिनामधेयानि" एवमादिना प्रकारेण अशब्दानुकृतिपूर्वकत्वे सति निर्वक्तव्यानि। "श्वाशुयायी"। शु इति क्षिप्रनाम। क्षिप्रमसौ शीघ्रत्वादेतीति श्वा। "शवतेर्वा गतिकर्मणः" स हि नित्यमेव गच्छति। "श्वसितेर्वा" वधकर्मणः। "सिंहः सहनात्" अभिभवति ह्यसौ अन्यान् प्राणिविशेषान्। "सम्पूर्वस्य वा हन्तेः" उपसर्गस्येत्वेन। "संहाय हन्तीति वा" वैयाकरणानामेषा व्युत्पत्तिः। "व्याघ्रोव्याघ्राणात्" विविधमसौ जिघ्रतीति व्याघ्रः। तस्य हि घ्राणेन्द्रियं

पट भवतीति स हि घ्रन् आघ्राय हन्ति, घ्राणेन्द्रिये हि तस्य विशिष्टं ज्ञानम्। व्यादाय हन्तीति वा" स किल व्यादाय वक्त्रं विवृतं कृत्वा ततो हन्ति। अथवा "व्यादाय हन्तीति" यः किल प्रथमे ग्रहे शङ्कितः, तेन हन्तुं भवति मृगोऽन्यो वा कश्चित्, तमसावमर्षाद् विकृष्य तस्मिन्नेव प्रदेशे प्रथमग्रहस्थाने आनीय ततो हन्ति। सिंहो व्याघ्रः श्वा काक इत्येवमनुक्रम्यार्वाचीनान्येतानि पदानि निरुक्तानि, अयमपि निर्वचनप्रकारोऽस्तीति प्रदर्शनार्थम्। सिंहव्याघ्रशब्दयोस्तु अनुलोममेव निर्वचनमनुलोमव्याख्योपप्रदर्शनार्थम्, एवं हि उभे अपि प्राप्ती दर्शिते भवति(तः)॥१॥

अर्चतिकर्माण उत्तरे धातवश्चतुश्चत्वारिंशन्मेधाविनामान्युत्तराणि चतुर्विंशतिर्मेधावी कस्मान्मेधया तद्वान् भवति मेधा मतौ धीयते स्तोतृनामान्युत्तराणि त्रयोदश यज्ञनामान्युत्तराणि पञ्चदश यज्ञः कस्मात् प्रख्यातं यजतिकर्मेति नैरुक्ता याच्ञ्यो भवतीति वा यजुरुन्नो भवतीति वा बहुकृष्णाजिन इत्यौपमन्यवो यजूंष्येनं नयन्तीति वर्त्विङ्नामान्युत्तराण्यष्टावृत्विक् कस्मादीरण ऋग्यष्टा भवतीति शाकपूणिर्ऋतुयाजी भवतीति वा याच्ञाकर्माण उत्तरे धातवः सप्तदश दानकर्माण उत्तरे धातवो दशाध्येषणाकर्माण उत्तरे धातवश्चत्वारः स्वपितिसस्तीति द्वौ स्वपि-

तिकर्माणौ कूपनामान्युत्तराणि चतुर्दश कूपः कस्मात् कुंपानं भवति कुप्यतेर्वा स्तेननामान्युत्तराणि चतुर्दशैव स्तेनः कस्मात् संस्त्यानमस्मिन् पापकमिति नैरुक्ता निर्णींतान्त-र्हितनामधेयान्युत्तराणि षट् (निर्णींतं कस्मान्निर्णिक्तं भवति) दूरनामान्युत्तराणि पञ्च दूरं कस्माद् द्रुतं भवति दुरयं वा पुराणनामान्युत्तराणि षट् पुराणं कस्मात् पुरा नवं भवति नवनामान्युत्तराणि षडेव नवं कस्मादानीतं भवति ॥ २ ॥ (१६)

"अर्चतिकर्माण उत्तरे धातवश्चतुश्चत्वारिंशत्"। 'अर्चतिक-र्माणः' अर्चत्यर्थाः, पूजयत्यर्थाः पूजायामवश्यं भवितुं युज्यते उपमेति उपमाशब्देभ्योऽनन्तरम् अर्चतिकर्माणः समाम्नाताः। कियन्तः पुनस्ते? 'चतुश्चत्वारिंशत्' (४४)। कतमे पुनस्ते? "अर्चति, गायति"—इत्येवमादयः। य एतेऽर्चतिकर्माणः, एतैर्हि मेधाविन एवार्चंति, एत एव हि स्तोतुं शक्नुवन्ति, नेतरे अमेधसः॥

तस्मात् "मेधाविनामान्युत्तराणि चतुर्विंशतिः"। अर्चति-कर्मभ्यः 'उत्तराणि' 'मेधाविनामानि'। कियन्ति पुनस्तानि? 'चतुर्विंशतिः' (२४)। कतमानि पुनस्तानि? "विप्रः, धीरः, विप्रः"।—इत्येवमादीनि। विविधानर्थान्नस्य प्राप्तुं प्रातीति विप्रः। धीः प्रज्ञा, तद्वान् धीरः, रो मत्वर्थे। विगृह्य संदसि

कथयतीति विग्रः। इत्येवमादि। आह,—"मेधावी कस्मात्? उच्यते,—सहि "मेधया तद्वान् भवति"। आह,—"मेधाः"। कस्मात्? सा हि "मतौ धीयते"। मतिर्बुद्धिः, तस्यां या पुरुषशक्तिरभिव्यज्यते, सा मेधा इत्युच्यते॥

य एव मेधाविनः, त एव स्तोतुं शक्नुवन्तीति मेधाविनामभ्यः "उत्तराणि" "स्तोतृनामानि"। कियन्ति पुनस्तानि? "त्रयोदश" (१३)। कतमानि पुनस्तानि? "रैभः, जरिता, कारुः"—इत्येवमादीनि। रैभो रैभतेः स्तुत्यर्थस्य। जरिता जरतेः स्तुत्यर्थस्यैव। कारुः कर्ता स्तोमानाम्। इत्येवमादि योज्यम्। प्रत्यक्षवृत्तित्वादस्य शब्दस्य नोक्तं स्तोता कस्मादिति॥

यज्ञेष्वेव हि अतिशयेन देवतानां स्तुतयः प्रयुज्यन्त इति स्तोतृनामभ्यः "उत्तराणि" "यज्ञनामानि"। कियन्ति पुनस्तानि? "पञ्चदश" (१५)। कतमानि पुनस्तानि? "यज्ञः, वेनः, अध्वरः, मेधः,"—इत्येवमादीनि। आह,—"यज्ञः कस्मात्? उच्यते,—यदेतत् "प्रख्यातं यजति कर्म" लोकवेदयोः। एतदेव भावसाधनेन शब्देनोच्यते यजनं यज्ञ इति। अथ "वा" "याच्ञ्यो भवतीति" यज्ञः, याच्यते ह्यत्र, यतो वै देवानामन्नं सम्भृतम् समभावयन्निति ह विज्ञायते, तस्माद् याचनाद् यज्ञः। अथ "वा" "यजुर्भिः" अयम् "उन्नः" संक्लिन्न इव "भवति", बहुत्वादत्र यजुषाम्। "बहु कृष्णाजिन इत्यौपमन्यवः" यद् यदत्र दृश्यते प्रतिविशिष्टं साधनं किञ्चित्, तत् तत् कृष्णाजिनमिति यज्ञः, सोमे तावदजिनद्वयम्, यजमानेऽ-

प्यजिनद्वयम्, अवहन्यमानेषु हि हविःषु अजिनं धर्मोपार्जितं धर्मपात्रेष्वप्यजिनम्, एवं वहुकृष्णाजिनः। अथ "वा" "यज्ञं-ष्येनम्" उपक्रमादारभ्यान्तं "नयन्तीति" यज्ञः। वनतिः कान्त्यर्थः, काम्यन्ते हि यज्ञाद्व होमपशुस्वर्गादयः तस्मात् स वेनः यज्ञ इत्युच्यते। ममेदं दास्यतीति एवं यज्वभिः अस्मात् फलं प्रार्थ्यत इति मेधः। इत्येवमादि॥

यज्ञसम्बन्धेनैव "ऋत्विङ्नामानि उत्तराणि अष्टौ"। ऋत्विजां नामानि ऋत्विङ्नामानि। कियन्ति पुनस्तानि? 'अष्टौ' (८)। कतमानि पुनस्तानि? "भरताः, कुरवः"—इत्येवमादीनि। भ्रियन्ते दक्षिणाभिरिति भरताः। कुर्वन्ति कर्माणीति कुरवः। इत्येवमादि। आह,—"ऋत्विक् कस्मात्"? उच्यते,—"ईरणः" ईरयिता हि संस्तुतीनां भवतीति ऋत्विक्। 'ऋग्यष्टा भवतीति शाकपूणिः" ऋग्भिर्ह्यसौ यागकारी भवतीति ऋत्विक्। "ऋतुयाजी भवतीति वा" स हि काले देवता यजतीति वा। ऋतौ याजयतीति वा, स हि काले एव याजयते, नाकाले॥

ऋत्विक्सम्बन्धेनैव "याच्ञाकर्माण उत्तरे धातवः सप्तदश" (१७)। कतमे पुनस्ते? इति। "ईमहे, यामि, मन्महे"—इत्येवमादयः॥

याच्ञासम्बन्धेनैव "दानकर्माण उत्तरे धातवो दश" (१०)। कतमे पुनस्ते? इति। "दाति, दाशति, दासति"—इत्येवमादयः॥

दानसम्बन्धेनैव "अध्येषणाकर्माण उत्तरे धातवश्चत्वारः (४)। कतमे पुनस्ते? इति। "परिस्रव, पवस्व"—इत्येव-

मादयः। सत्कृत्य दातृभिर्दातुं प्रतिग्रहीतृणां प्रार्थना, अध्येषणेत्युच्यते॥

याच्यमानो हि सर्वोऽपि स्वपितीति अध्येषणाकर्मभ्य उत्तरौ "स्वपितिकर्माणौ"। कतमौ पुनस्तौ? "स्वपिति, सस्ति"—"इति"। स्वशब्देनैवोच्चार्य्य द्विग्रहणमवधारणार्थम्,—एतौ एव "द्वौ" निगमे न पुनस्तृतीयोऽस्तीति, अल्पत्वाद्वा द्विग्रहणम्॥

"कूपनामान्युत्तराणि चतुर्दश" कूपमेव हि आश्रित्य मरौ सुप्यते, सुप्तः कूप इव पतितो भवतीति वा, स्वपितिकर्मस्यामनन्तराणि कूपनामान्युच्यन्ते। कियन्ति पुनस्तानि? 'चतुर्दश' (१४)। कतमानि पुनस्तानि? "वव्रः, कातुः, खातः"—इत्येवमादीनि। व्रियते ह्यसावुदकार्थमिति वव्रः। कमुदकमत्रेति कातुः। इत्येवमादि। आह,—"कूपः कस्मात्"? उच्यते,—"कु पानं भवति" यत्र ह्यसौ भवति, तत्र कुत्सितं पानं भवति, साधनापेक्षत्वात्। "कुप्यतेर्वा" यत्सम्बन्धादुदकार्थिनः कुप्यन्ति॥

"स्तेननामान्युत्तराणि चतुर्दशैव"। कूपमाश्रित्य सुप्यन्ति स्तेना इत्यतः कूपनामभ्यः 'उत्तराणि' 'स्तेननामानि'। कियन्ति पुनस्तानि? 'चतुर्दशैव' (१४)। कतमानि पुनस्तानि? "तृपुः, रिपुः"—इत्येवमादीनि। परेभ्यो धनान्याहृत्यातिशयेनासावात्मानं भृत्यांश्च तर्पयतीति त्रिपुः। लिम्पत्यसावात्मानं पापेनेति रिपुः। इत्येवमादि। आह,—"स्तेनः कस्मात्"? उच्यते,—"संस्त्यानम्" संहतम् "अस्मिन्" "पापकम्" कर्म भवति "इति" एवं "नैरुक्ताः" मन्यन्ते। वैयाकरणानामन्यथापि स्यादित्यभिप्रायः॥

"निर्णीतान्तर्हितनामधेयान्युत्तराणि षट्"। निर्णीतस्य च अन्तर्हितस्य नामधेयानि 'निर्णीतान्तर्हितनामधेयानि'। 'उत्तराणि' प्रकृतेभ्यः स्तेननामभ्यः, स्तेना एव ह्यन्तर्हिता भवन्तीत्येष सम्बन्धः स्तेननाम्नामन्तर्हितनाम्नां च। कियन्ति पुनस्तानि? 'षट्' (६)। कतमानि पुनस्तानि? "निण्यम्, सस्वः, सनुतः" —इत्येवमादीनि। निर्णीतमिव निण्यम्। सुप्तमिव सस्वः। सन्ततमिव सनुतः। इत्येवमादीनि॥

"दूरनामान्युत्तराणि पञ्च" (५)। अन्तर्हितं यद् भवति, दूरवत्तद् भवतीत्येष सम्बन्धः। कतमानि पुनस्तानि। "आके, पराके, परावैः"—इत्येवमादीनि। आ, कियतो देशात् एतद् वर्त्तते इति विज्ञातव्यमेतद् भवतीत्याके। पराके पराक्रान्ते। पराङ्मुखमञ्चितं परावैरित्येवमादि। यथैव श्रुतानि छन्दसि, तथैवैतानि समाम्नातानि। आह,—"दूरं कस्मात्"? "द्रुतं" हि तत् "भवति" अध्वनो महत्त्वात्। "दूरयं वा" दुःखं हि तद् गम्यते प्राप्यत इत्यर्थः॥

दूरसम्बन्धेनैव "पुराणनामान्युत्तराणि षट्" (६)। समानं हि 'कालाध्वनोर्महत्त्वं दूरपुराणयोः। कतमानि पुनस्तानि? "प्रत्नम्, प्रदिवः, प्रवयाः"—इत्येवमादीनि। प्राक्तनं प्रत्नम्। 'प्राग् द्युतिमदासीदिति प्रदिवः। प्रकृष्टवयाः प्रवयाः। इत्येवमादि। आह,—पुराणं कस्मात्"? उच्यते,—तद्धि "पुरा नवं भवति" न वर्त्तमानकाले॥

"नवनामान्युत्तराणि षडेव" (६)। पुराणसम्बन्धनैव। कतमानि पुनस्तानि? "नवम्, नूलं, नूतनम्"—इत्येवमादीनि।

आह,—"नवं कस्मात्"? उच्यते,—तद्धि सद्य एव कुतश्चित् "आनीतं भवति" ॥ २ ॥

द्विश उत्तराणि नामानि प्रपित्वेऽभीक इत्यासन्नस्य अपित्वे प्राप्तेऽभीकेऽभ्यक्ते। आपित्वे नः प्रपित्वे तूय मा गहि। अभीके चिदु लोककृदित्यपि निगमौ भवतः। दभ्रमर्भकमित्यल्पस्य। दभ्रं दम्नोतेः सुदम्भं भवत्यर्भकमवहृतं भवति। उपोप मे परा मृश मा मे दभ्राणि मन्यथाः। नमो महद्भ्यो नमो अर्भकेभ्य इत्यपि निगमौ भवतः। तिरः सत इति प्रासस्य तिरस्तीर्णं भवति सतः संसृतं भवति। तिरश्चिदर्यया परिवर्त्तिर्यातमदाभ्या। पात्रेव भिन्दन् सत एति रक्षस इत्यपि निगमौ भवतः। त्वो नेम इत्यर्द्धस्य त्वोऽपततो नेमोऽपनीतोऽर्द्धं हरतेर्विपरीताद्धारयतेर्वा स्याद्दृधृतं भवत्यृधोतेर्वा स्याद्ध्रुतमो विभागः। पीयति त्वो अनु त्वो गृणाति। नेमे देवा नेमेऽसुरा इत्यपि निगमौ भवतः। ऋक्षाः स्तृभिरिति नक्षत्राणां नक्षत्राणि नक्षतेर्गतिकर्मणो नेमानि क्षत्राणीति च ब्राह्मणमृक्षा उदीर्णानीव ख्यायन्ते स्तृभिस्तीर्णानीव ख्यायन्ते। अमी य ऋक्षा निहितास उच्चा। पक्षयन्तो यामिव स्तृभि-

रित्यपि निगमौ भवतः वम्रीभिरुपजिह्विका इति सीमिकानां वम्र्यो वमनात् सीमिका स्यमनादुपजिह्विका उपजिघ्र्यः। यदक्युपजिह्विका यद्वम्रो अतिसर्पतीत्यपि निगमौ भवत्यूर्दरं कुदरमित्यावपनस्योर्दरमुदीर्णं भवत्यूर्जं दीर्णं वा। तमूर्दरं न पृणता यवेनेत्यपि निगमो भवति। तमूर्दरमिव पूरयति यवेन कुदरं कुतदरं भवति। समिद्धो अञ्जन् कुदरं मतीनामित्यपि निगमो भवति ॥ ३ ॥ (२०)

"द्विश उत्तराणि नामानि"। द्वे द्वे द्विश उत्तराणीति। "प्रपित्वे, अभीके"—इत्येवमादीनि। व्याख्यातानि पृथिवीनामस्य आरभ्य एकैकार्थस्य बहूनि नामधेयानि, इदानीमेकैकस्य द्वे द्वे नामनी वाचके समाम्नायेते,—प्रपित्वे, अभीके इत्येवमादीनि, आद्यावापृथिवीनामभ्यो यावत् ॥

अधुनैवमुक्त्वा सामान्यतो विशेषेण एकैकं व्युत्पाद्य उदाहरणैरेव दर्शयति। तद्यथा,—"प्रपित्वे, अभीके"—"इति" एते नामनी "आसन्नस्य" भवतः। इत्येवमादि। "प्रपित्वे प्राप्ते" इत्यर्थः। "अभीके अभ्यक्ते" आभिमुख्येनाञ्चिते। अभ्यागते। इदानीमुदाहरणे ब्रवीति,—"आपित्वे नः" "अभीके चित्"—इति निगमौ (ऋ० सं० ५, ७, ३०, ३—७, २१, १) भवतः" ॥

"यथा गौरोऽपाकृतं तृष्यन्नेत्यवेरिणम्। आपित्वे नः

प्रपित्वे तूयमागहि कण्वेषु सुसचा पिव ॥" (ऋ० सं० ५, ७, ३, ३)। ऐन्द्र्येषा। बृहती। देवातिथेः काण्वस्यार्षम्। महाव्रते बृहतीसहस्रे शस्यते। हे 'इन्द्र!' 'यथा' येन प्रकारेण 'गौरः' गौरमृगः, 'अवेरिणम्' अपगतार्णम् अपगतोदकं मरुदेशं गत्वा 'तृष्यन्' तृषावाध्यमानः 'अपाकृतम्' अपानीयम्, (पानयोग्यं यत्र नास्ति, स्वल्पोदकत्वात्, तत्र कृतम्, उदकेन वा कृतम् जलाशय-स्थानम्) तडागमन्यद्वा वा शीघ्रम् 'एति', एवं त्वमप्येतस्मिन् 'आपित्वे' आपानकाले 'प्रपित्वे' प्राप्ते 'तूयं' क्षिप्रम् 'आगहि' आगच्छ। आगत्य च य एष सोमः 'कण्वेषु' वर्त्तते, तमेभिरेव ऋत्विग्भिः 'सचा' साकं 'सु सुष्ठु सह स्थित्वा 'पिव' इति ॥

"प्रोष्वस्मै पुरोरथमिन्द्राय शूषमर्चत। अभीकेचिदु लोककृत सङ्गे समत्सु वृत्रहास्माकं बोधि चोदिता नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥" (ऋ० स० ८, ७, २१, १)। सुदासः पैजवन-स्येयमार्षम्। अतिच्छन्दाः। सर्वपृष्ठायां मैत्रावरुणीयके देवता-व्यत्यये यागे शाक्करस्यैन्द्रस्य चरोर्याज्यैषा, रैवतस्य पुरोऽनुवाक्या, वाच्छच्ये पुनरियमेव षोड़शिशस्त्रे शस्यते। हे स्तोतारः! 'प्रो' प्रकर्षेण 'सु' प्रशस्ताभिः स्तुतिभिः 'अस्मै' 'इन्द्राय' तुष्ट्यर्थं 'पुरोरथम्' अग्रतो रथम् एतत् 'शुषम्' बलम् 'अर्चत' स्तुत। कञ्च पुनरर्थमभिसन्धायार्चत? इति। 'अभीकेचित् उ लोककृत्'। 'अभीके' अभ्यागते एतस्मिन् 'सङ्गे' सङ्ग्रामकाले प्राप्तेऽप्येषु 'समत्सु' सम्भक्षयितृषु उद्यतायुधेषु शत्रुषु 'लोककृत्' स्थानकृत्। एषु 'वृत्रहा' शत्रुहन्ता इन्द्रो भविष्यतीति

एतमर्थमभिसन्धाय प्रार्चत अस्मै यूयमिन्द्राय पुरोरथं शूषमिति। एव मन्यान् स्तोतॄन् सम्बोध्य आत्मनापि प्रवर्तते वक्तुम्,—हे भगवन्निन्द्र! 'अस्माकं' बोधि बुध्यस्व एताः स्तुतीः, मा परेषाम्, बुद्ध्वा चैताः 'चोदिता' अनुज्ञाता जनस्य भव। 'अन्यकेषाम्' अन्येषां 'ज्याकाः' ज्याः 'अधिधन्वसु' धनुःष्वधिरोपिताः 'नभन्ताम्' हिंस्यन्ताम्, अवततज्याधनुषो हतसर्वोद्यमाः एते अस्मद्द्विषो युष्मदनुग्रहाद् भवन्त्वित्यभिप्रायः॥

"दभ्रम्, अर्भकम्"—"इति" एते "अल्पस्य" नामनी। "दभ्रं दम्भेतेः" वधार्थस्य। तद्धि "सुदम्भं भवति" सुच्छेदं भवति, अल्पत्वात्। "अर्भकमबहृतं भवति' ह्रस्वमित्यर्थः। "उपोपमे-परामृश" "नमोमहद्भ्यो नमो"—"इत्यपि निगमौ (ऋ० सं० २, १, ११, ७—१, २, २४, ३) भवतः" ॥

"उपोपमे परामृश मा मे दभ्राणि मन्यथाः। सर्वाहमस्मि रोमशा गन्धारीणामिवाविका॥" (ऋ० सं० २, १; ११, ७)। भावयव्यस्येयमार्षम्। अनुष्टुप्। भावयव्यमेव सा भर्त्तारं तेनानुपेयमाना ब्रवीति। हे राजन्! 'उप' गम्य 'उप' श्लिष्य च 'मे' मम 'परामृश' यः प्रदेशः पुरुषेण स्त्रियाः परामर्शनीयः। किञ्च, 'मा मे दभ्राणि मन्यथाः' अल्पकानि लोमानि मा मन्यथाः। जानेऽहमेतत्, यथा अलोमिकाया उपगमः प्रतिषिद्धः स्मृतौ,—"नाजातलोम्न्योपहासमिच्छेत्" इति। यतस्ते वेदयामि 'सर्वाहमस्मि रोमशा' सर्वेष्वेवावयवेषु ममोत्पन्नानि रोमाणि (येषु स्त्रीणामुत्पद्यन्ते?)। कथञ्च पुनरहमस्मि रोमशा? 'गन्धारी

णामिवाविका' गन्धारदेशजातानामविकानां मध्ये या सुष्ठु रोमशा भवेत्, तथाहमस्मि रोमशा, निःशङ्को मामुपगच्छेत्यभिप्रायः॥ "नमो महद्भ्यो नमोऽअर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः। यजाम देवान् यदि शक्नवाम मा ज्यायसः शंस मा वृक्षि देवाः॥" (ऋ० सं० १, २, २४, ३)। त्रिष्टुप्। शुनःशेपस्यार्षम्। होतृजपे विनियुक्ता। 'नमो महद्भ्यः' नमो महत्परिमाणेभ्यो देवेभ्यः। 'नमो अर्भकेभ्यः' अल्पपरिमाणेभ्यः। 'नमो युवभ्यः' यौवनवद्भ्यः। 'नम आशिनेभ्यः' व्यापिभ्यः। 'यजाम' 'देवान्' एतस्मिन्नुपस्थिते यागकाले। 'यदि' शक्नवाम'। अल्पश्रुतविज्ञाना वयम् अतएव ब्रूमो यदि शक्नवामेति। वयमीदृशाः सन्तो युष्मान् ब्रूमहे,—हे 'ज्यायसः' ज्यायांसः! देवाः! युष्माकमेव 'शस'. शंसितारं सन्तमल्पे वा महति वा कस्मिंश्चिद् दुःशस्ते 'मा वृक्षि' मा अस्मान् छिन्धि यज्ञफलात्, को हि नाम नापराध्यति? इत्यभिप्रायः॥

"तिरः, सतः"—"इति" एते "प्रासस्य" नामनी भवतः। अप्रासस्यैके अधीयते, यथापि योज्यम्। "तिरः तीर्णं" हि तत् "भवति" दूरमध्वानम्। "सतः संसृतं भवति" एकीभूय सृतं भवति। "तिरश्चिदर्य्यया" "पात्रेव भिन्दन् सतः"—"इत्यपि निगमौ (ऋ० सं० ४, ४, १६, २—५, ७, ६, १) भवतः"॥

"अश्विनावेह गच्छतं नासत्या मा वि वेनतम्। तिरश्चिदर्य्यया परिवर्त्तिर्यात मदाभ्या माध्वी मम श्रुतं हवम्॥" (ऋ० सं० ४, ४, १६, २)। पङ्क्तिराश्विनी। अवस्योरात्रेयस्यार्षम्।

प्रातरनुवाकाश्विनयोः शस्यते। हे 'अश्विनौ!' 'नासत्या!' वां 'गच्छतम्' युवाम् 'इह' अस्मिन् यज्ञे सोमं पातुम्। किञ्च, 'मा वि वेनतम्, मा विगतकामौ भूतम्, युवामाह्वयमानौ मया। किञ्च, 'तिरश्चिदर्य्यया' तिरोऽपि अप्राप्ते एव स्थाने यद्यवस्थितौ स्थः, तथापि 'अर्य्यया' ईश्वरस्यापि रथगत्या दैवगत्या शीघ्रया 'आयातम्' (द्विवचनं वा सावग्रहत्वात् पदस्य) किञ्च, 'परिवर्त्तिः यातम्' यद्यपि क्वचिदनिवृत्तौ स्थः, तथापि परिवर्त्तनं कृत्वा आयातम्। हे 'अदाभ्या' अहिंस्यौ! अनुपहिंसितौ! अथवा अदाभ्यया अनुपहिंसितया गत्या आयातम्। हे 'माध्वी!' मधुसोममिश्रं पेयं ययोस्तौ। 'मम' 'श्रुतं' शृणुतम् 'हवम्' आह्वानम्। श्रुत्वा अविलम्बमानौ शीघ्रमायातमित्यभिप्रायः॥ "इन्द्रो यातनामभवत् पराशरो हविर्मथी नाम्भ्याऽ विवासताम। अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन् सत एति रक्षसः॥" (ऋ० सं० ५, ७, ६, १)। वसिष्ठस्यार्षम्। जगती। 'इन्द्रः' 'यातूनां' यातुधानानाम् 'अभवत्' 'पराशरः' पराशातयिता। कीदृशानां पुनर्यातूनामभवत् पराशातयिता? इति। उच्यते,— 'हविर्मथीनाम्' हवींषि ये मन्थन्ति, तेषाम्। 'अभ्याविवासताम्' अभ्युद्वासयतां, यज्ञोत्सादकानामित्यर्थः। अथवा परिचर्य्यायां स्यात्, ये तमिन्द्रं परिचरन्ति यातवः, तेषामेव पराशातयितेति। योऽयमेवंलक्षण इन्द्रः, सोऽस्माभिराराधितः परिचर्य्यया 'अभि एति' अभ्येतु, अस्मान् प्रति। 'शक्रः' शक्तः, सर्वयातूनां यातने। 'परशुः' परशुहस्तः 'यथा' कश्चित् वन-

मिच्छत् अभ्येयात्, यथा, 'पात्रा' पात्राणि कौलालानि लकुटेनाप्रतिकट्यमानः 'भिन्दन्' कश्चिदभ्येयात्, एवमभ्येति 'रक्षसः' रक्षांसि भिन्दन्। 'सतः' प्रदेशात्, दूरादित्यर्थः॥

"त्वः' नेमः"—"इति" एते नामनी "अर्द्धस्य"। "त्वः अपततः" अपेत्य ततः। "नेमः अपनीतः" अपभज्य नीतः, पृथक् कृत इत्यर्थः। "अर्द्ध हरतेर्विपरीताद्धारयतेर्वा स्यात्" "उद्धृतं" हि तत् "भवति"। "ऋध्नोतेर्वा स्यात्" "ऋद्धतमः" अभिसम्पन्नतमः "विभागः" भवति। "पीयति त्वो अनुत्वो गृणाति"—"नेमे देवा नेमेऽसुरा"—"इत्यपि निगमौ (ऋ० सं० २, २, १६, २—य० मै० ब्रा०) भवतः॥

"बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः। पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तन्वं वन्दे अग्ने॥" इति (ऋ० सं० २, २, १६, २)। त्रिष्टुप्। दीर्घतमस आर्षम्। आग्नेयी। प्रातरनुवाकाश्विनयोः शस्यते। हे भगवन्! 'अग्ने!' 'यविष्ठ' युवतम्! 'बोध' बुध्यस्व 'मे' मम 'अस्य' 'वचसः' "मंहिष्ठस्य, दातृतमस्य, पूजयितृतमस्य वा, महत्तमस्य वा 'प्रभृतस्य' प्रकृष्टैर्भगवद्गुणैः, सम्भृतस्यः हे 'स्वधावः' अन्नवन्! ये गुणा अस्य वचसः, तान् बोध। किञ्च, इदमपरं शृणु,—उभयेषां प्रजापत्यानां देवासुराणां द्विधा विभक्तानां "पीयति त्वः" हिनस्ति एकमर्द्धमसुराख्यम्, "अनु त्वः" अनु गृणात्येकमर्द्धं देवाख्यमनुगृह्णातीत्यर्थः। तत्रैवं सत्युभयथा विप्रतिपन्नेषु प्राजापत्येषु 'वन्दारुः' वन्दनशीलः अहं, दैवं पक्षमाश्रितः, हित्वा

आसुरं, तयैतां 'तन्वं' तनूं ज्वलनदहनप्रकाशीकरणसमर्थां नित्यकालमेव प्रातर्मध्यन्दिने, सायं च 'वन्दे' स्तौमीत्यर्थः ॥ "नेमे देवा नेमेऽसुराः"—इति ब्राह्मणवाक्यमेवेदं वाजपेये मैत्रायणीयानाम् । अर्द्धतो देवा अर्द्धतोऽसुरा आसन्नित्यर्थः ॥

"ऋक्षाः, स्तृभिः"—"इति" एते "नक्षत्राणाम्" नामनी । नक्षत्रशब्दं पर्य्यायाभिधानप्रसक्तं निर्ब्रवीति,—"नक्षत्राणि नक्षतेर्गतिकर्मणः" गत्यर्थे वर्त्तमानस्य, तानि हि नित्यमेवागच्छन्ति । "नेमानि क्षत्राणीति च ब्राह्मणम्" । नेमानि, क्षत्राणि धनानि । क्षत्रमिति धननाम । किन्तर्हि ? धनसरूपाण्येतानि, सूर्य्यरश्म्यनुवेधात् दीप्यमानानि सन्ति हिरण्ययानीव भ्राजन्ते इति तु ब्राह्मणम्, तुशब्दार्थे चशब्दः । "ऋक्षाः" "उदीर्णानीव" उदीरितानीव, केनचिदर्द्धं गमितानीव "ख्यायन्ते" दृश्यन्त इत्यर्थः । "स्तृभिः स्तीर्णानीव" "ख्यायन्ते" दृश्यन्ते । "अमी य ऋक्षाः"—"पश्यन्तो द्यामिव स्तृभिः"—"इत्यपि निगमौ (ऋ० स० १, २, १४, ५,—३, ५, ६, ३) भवतः" ॥

"अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुहचिद् दिवेयुः ।
अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति ॥" (ऋ० सं० १, २, १४, ५) । शुनःशेपस्यार्षम् । त्रिष्टुप् । वारुणी ।

वरुणश्चास्यां सूर्य्य उच्यते । 'अमी ये ऋक्षाः' अमूनि यानि नक्षत्राणि 'निहितासः' निहितानि 'उच्चा' उच्चैरित्यर्थः । किञ्च, तानि 'नक्तं ददृश्रे' रात्रावेवैतानि दृश्यन्ते । 'कुहचिद्दिवेयुः' न विज्ञायन्ते हि क्वचिद् दिवैतानि गच्छन्ति ? किमेतत् स्यात् ?

'अदब्धानि अनुपहिंसितानि 'वरुणस्य' आदित्यस्य एतानि 'व्रतानि' कर्माणि आश्चर्य्यभूतानि स्युः। किमन्यद् भविष्यति ? स हि भगवानादित्यः, तानि कुतश्चिदानयन्निवास्तं गच्छति, पुनश्चैतानि अपनयन्निवोदेति ? तदेव दर्शनं वा तेषां सूर्यकृतमेव। यदपि चैतत् 'विचाकशत्' दीप्यमानः 'चन्द्रमा' 'नक्तम् एति' तदप्येतदेव भगवतः सूर्य्यस्य कर्म, अयमेव हि चन्द्रमसि दीप्तिमादधान इवास्तं याति, पुनश्चाक्षिपन्निव चन्द्रमसो दीप्तिमुदेति। योऽयमेवंस्वभावो वरुणः तं वयमभिप्रेतार्थसिद्धये स्तुमः, स इदं नामास्माकं करोत्विति॥ "ऋतावानं विचेतसं पश्यन्तो द्यामिव स्तृभिः। विश्वेषामध्वराणा हस्कर्त्तारं दमे-दमे॥" (ऋ० सं० ३, ५, ६, ३)। गोतमपुत्रस्य वामदेवस्यार्षम्। अनुष्टुप्। आग्नेयी। 'ऋतावानं' यज्ञवन्तं 'विचेतसं' विभूत-प्रज्ञानं 'विश्वेषां' सर्वेषाम् 'अध्वराणाम्' यज्ञानां 'हस्कर्त्तारं' स्पर्द्धाकर्त्तारम्, उपज्वलिते हि तस्मिन् भ्रातृयज्ञैः स्पर्द्धन्त इव यज्ञः, तमेवङ्गुणविशिष्टम् अग्निं 'पश्यन्तः' वयमनेकधा विहृतं 'दमेदमे' यज्ञगृहे तासु तासु क्रियासु व्यापृतं स्तुमः। किञ्च, योऽनेकधा दीप्यमानः 'द्याम् इव स्तृभिः' नक्षत्रैः पृथिवीं चित्र-रूपां, वेदीं वा करोति, स नोऽभिष्टुतोऽभिप्रेतानर्थान् साधयत्वित्यभिप्रायः॥

"वज्रीभिः, उपजिह्विका"—"इति" एते "सीमिकानाम्" नामनी भवतः। या एताः पिपीलिका इत्युच्यन्ते लोके ता इमाः सीमिकाः "वज्र्योघमनात्" ता हि वमन्त्युदकं येन मृदार्द्रीं-

भवति। "सीमिकाः स्यमनात्" स्यमन्ति हि ता नित्यमेव गच्छन्ति इत्यभिप्रायः। "उपजिह्विकाः उपजिघ्र्याः" उपजिघ्रन्ति हि ताः, षट्टु ह्यासां घ्राणेन्द्रियं भवति। द्वयोरपि नाम्नोरेक एव "निगमः" —"यदत्त्युपजिह्विका (ऋ० सं० ६, ७, १२, ६)"—"इति" "भवति" ॥

"यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति। सर्वं तदस्तु ते घृतम् ॥" (ऋ० सं० ६, ७, १२, ६)। भार्गवस्य प्रयोगस्येयमार्षम्। उक्थेऽग्नौ समिदनया हूयते। 'यत्' 'अत्ति' भक्षयति 'उपजिह्विका' अन्तरनुप्रविश्य, 'यत्' च 'अतिसर्पति' आर्द्रया मृदा परिवेष्टयन्, 'वम्रः' वह्निर्न शक्नोत्यत्तुं खदिरसारादि, 'सर्वं' तदुभयजातीयमपि 'ते' तव हे भगवन्! अग्ने! 'घृतम्' अस्तु, 'ता' तत् घृतीभूतं, त्वं 'जुषस्व, संसेवस्व हे 'यविष्ठ्य' युवतम! ॥

"ऊर्दरम्, कृदरम्"—"इति" एते "आवपनस्य" नामनी भवतः। उप्यते यस्मिन् यवादि धान्यं कुशूलेऽन्यत्र वा वैणवादौ कस्मिंश्चित्, तदुर्दरमिति कृदरमिति च, यदावपनमाहुः, प्राकृतेन लौकिकास्तदावपनमित्युच्यते। "ऊर्दरम् "उद्दीर्णम्" ऊर्ध्वं हि तद् दीर्णं "भवति"। अथ "वा" "ऊर्जे" तदर्थाय "दीर्णं" भवति। ऊर्गित्यन्ननाम, तदुतये हि तच्छुषिरीभूतं भवति। "तमूर्दरं न पृणता"—"समिद्धो अञ्जन्"—इति निगमौ (ऋ० सं० २, ६, १४, ५—य० वा० सं० २६, १) भवतः ॥

"अध्वर्य्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा। तमूर्दरं न पृणता यवेनेन्द्रं सोमेभिस्तदपो वो अस्तु॥" (ऋ० सं० २, ६, १४, ५)। गृत्समदस्येयमार्षम्। त्रिष्टुप्। ऐन्द्री। हे 'अध्वर्य्यवः'! 'यः' इन्द्रः 'दिव्यस्य' द्युलोकाश्रयस्य, 'वस्वः' वसुनः धनस्य, 'यः' च 'पार्थिवस्य' अन्तरिक्षलोकाश्रयस्य (पृथिवीत्यन्तरिक्षनामसु पठितम्), यश्च 'क्षम्यस्य' भूम्याश्रयस्य, 'राजा' अधिपतिः, 'तम्' एवङ्गुणयुक्तम् 'इन्द्रम्' 'ऊर्दरं न' ऊर्दरमिव 'पृणत'पूरयत 'यवेन'। यथा कश्चिन्मनुष्यः ऊर्दरं पूरयेत्, तथा यूयमिन्द्रं 'सोमेभिः' सोमैः पूरयत। 'तद् अपः वः अस्तु' तद् वः कर्मास्तु, सर्वमन्यन्मुक्त्वेत्यभिप्रायः॥ "समिद्धो अञ्जन् कृदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः वाजी वहन् वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम्॥" (य० वा० सं०२९,१)। आप्रीसूक्तम् आध्वर्य्यवेऽश्वमेधे। तत्रेयं प्रथमा आप्री। हे "अग्ने!' भगवन्!' 'समिद्धः' सन्दीप्तः, त्वम् 'अञ्जन्' गमयन्नात्मानं प्रति। 'कृदरम्' आवपनं 'मतीनां' देवानां हि सर्वेषां 'घृतम्' आवपनं मतीनाम्, ते हि तत्र सर्वा मतीः प्रक्षिपन्ति ममेदं स्यादिति। तदेवङ्गुणयुक्तं घृतं 'मधुमत्' मधुस्वादयुक्तम् 'पिन्वमानः' पिबन्नित्यर्थः। अथवा देवान् प्रति 'वहन्' 'वाजी' आत्मना वेजनवान् बलवान्, परेभ्यो वा भयदाता। हे 'जातवेदः!' वहन्नेनमाश्वमेधिकं वाजिनमुच्यसे,—अस्माभिः 'प्रियम्' एनं 'वाजिनं' 'देवानां' 'सधस्थम् स्थानम् समान 'आ' आभिमुख्येन, शीघ्रतरं 'वक्षि' वह प्रापयेत्यर्थः॥ ३॥

रम्भः पिनाकमिति दण्डस्य। रम्भ आरभन्त एनम्। आ त्वा रम्भं न जिघ्रयो ररम्भेत्यपि निगमो भवति। आरभामहे त्वा जीर्णा इव दण्डं पिनाकं प्रतिपिनष्ट्येनेन। कृत्तिवासाः पिनाकहस्तोऽवततधन्वेत्यपि निगमो भवति। मेना ग्रा इति स्त्रीणां स्त्रियस्त्यायतेरपत्रपणकर्मणो मेना मानयन्त्येना ग्रा गच्छन्त्येनाः। अमे नांश्चिज्जनिवतश्चकर्थ। ग्नास्त्वाकृतन्तन्नपसोऽतन्वतेत्यपि निगमौ भवतः। शेपो वैतस इति पुंस्प्रजननस्य। शेपः शपतेः स्पृशतिकर्मणो वैतसो वितस्तं भवति। यस्यामुशन्तः ग्रहराम शेपम्। त्रिः स्म माह्नः श्नथया वैतसेनेत्यपि निगमौ भवतः। अयैनेत्युपदेशस्य। अया ते अग्ने समिधा विधेमेति स्त्रियाः। एनावो अग्निमिति नपुंसकस्य। एना पत्या तन्वं १ संसृजस्वेति पुंसः। सिपक्तु सचत इति सेवमानस्य सनःसिपक्तुं यस्तुरः सनः सेवतां यस्तुरः। सचस्वा नः स्वस्तये। सेवस्व नः स्वस्तये। स्वस्तीत्यविनाशिनामास्तिरभिपूजितः सु अस्तीति भ्यसते रेजत इपि भयवेपनयोः। यस्य शुष्माद्रोदसी अभ्यसेतां। रेजते अग्ने पृथिवी मखेभ्य इत्यपि निगमौ भवतः।

द्यावापृथिवीनामधेयान्युत्तराणि चतुर्विंशतिस्तयोरेषाभवति ॥ ४ ॥ (२१)

"रम्भः, पिनाकम्"—"इति" एते "दण्डस्य" नामनी। "रम्भ आरम्भत एनम्" अस्खलनार्थम्। "आ त्वा रम्भं न"—"कृत्तिवासाः पिनाकहस्तः"—इति निगमौ (ऋ० सं० ६, ३, ४५, ५—य० वा० सं० ३, ६१) ॥

"आ त्वा रम्भं न जिव्रयो रभ्भा शवसस्पते। उश्मसि त्वा सधस्थ आ ॥" (ऋ० सं० ६, ३, ४५, ५)। काण्वस्य त्रिशोकस्यार्षम्। ऐन्द्री। गायत्री। अतिरात्रे महाव्रते च शस्यते। हे भगवन्निन्द्र! "आरभामहे" वयं "त्वा" त्वां 'रम्भं न' "दण्डमिव" 'जिव्रयः' "जीर्णाः" इत्यर्थः। यथा वृद्धाः केचित् दण्डमारभेरन्नवष्टम्भार्थमेवमारभामहे त्वाम्। हे भगवन्! 'शवसस्पते' बलस्य पते! त्वं न आश्रय इत्यभिप्रायः। किञ्च, 'उश्मसि त्वा' कामयामहे त्वां नित्यमेव 'सधस्थे' समाने एव कस्मिन् स्थाने यज्ञायतनेऽवस्थितं त्वामाभिमुख्येन प्रष्टुं स्तोतुं वेत्यभिप्रायः॥ "पिनाकं" "प्रति पिनष्ट्यनेन" हन्तीत्यर्थः। "एष ते रुद्र भागस्तेनावसेन परो मूजवतोऽतीहि। अवततधन्वा पिनाकहस्तः कृत्तिवासाः"। 'एषं ते रुद्र भागस्तेन'—इति, त्रैयम्बकाः पुरोडाशा अनेन मन्त्रेण वृक्षे आसज्यन्ते। हे भगवन्! 'रुद्र!' 'एषः' 'ते' तव 'भागः' 'तेन' अवसेन पथ्यदनेन 'परः' परस्तात् 'मूजवतः' पर्वतात् 'अतीहि' अतिगच्छ, मा अत्रैव स्थाः। कथम्पुनरतीहि?

'पिनाकहस्तः' भूत्वा, 'कृत्तिवासाः' चर्मवासाः' 'अवततधन्वा' चैवमतीहि ॥

"मेनाः, गनाः"—"इति" एते "स्त्रीणां" नामनी। पर्य्यायाभिधानप्रसक्तमुच्यते,—"स्त्रियः स्त्यायतेरपत्रपणकर्मणः लज्जार्थस्य, लज्जन्त्यपि हि ताः। "मेनाः" "मानयन्त्येनाः" पुरुषा। "गनाः" "गच्छन्ति" हि "एनाः" मैथुनेन धर्मेण। "अमेनांश्चित्" —"गनास्त्वा कृन्तन्"—"इति" "निगमौ (ऋ० सं० ४, १, २६, २—सा० वे० कौ० शा० ता० ब्रा० १, १, ८) भवतः" ॥ "आ प्रद्रव हरिवोमा विवेनः पिशङ्गरूपते अभि नः सचस्व। नहि त्वदिन्द्र वस्योऽअन्यदस्त्यमेनांश्चिज्जनिवतश्चकर्थ ॥" (ऋ० सं० ४, १, २६, २)। अवस्योरात्रेयस्यार्षम्। त्रिष्टुप्। ऐन्द्री। हे 'हरिवः!' 'आ' आभिमुख्येनास्मान् 'प्र' प्रकर्षेण 'द्रव'। किञ्च, 'मा विवेनः' मा विगतकामो भूरस्मत्तः। हे 'पिशङ्गरूपते' शोभनदान! 'अभि सचस्व' 'नः'। किञ्च, 'नहि' 'अन्यत्' देवतान्तरं 'त्वत्' त्वत्तः प्रतिविशिष्टम् 'अस्ति' यत् प्रतिपद्येमहि। हे भगवन्! 'इन्द्र!' 'वस्यो' वसुमन्! किं कारणम्? 'अमेनांश्चित्' अस्त्रीकानपि स्तोतॄन् 'जनिवतः' एव स्त्रीम्, अत एव 'चकर्थ' करोषीत्यर्थः। यस्मात् त्वमेवङ्गुणविशिष्टः, तस्मात् त्वमेव स्तुम इत्यभिप्रायः ॥ "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि ०—०। गनास्त्वा कृन्तन्नपसोऽतन्वत वयित्र्योऽवयन् वरुणस्त्वा नयतु देवि दक्षिणे बृहस्पतये वाससस्तेनामृतत्वमशीय वयोदात्रे भूयान्मयो मह्यं

प्रतिग्रहीत्रे ०—० । क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामः समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत्ते ॥" वासःप्रतिग्रहणमन्त्रेऽनुषङ्ग एषः, मैत्रायणीयके, ताण्ड्यब्राह्मणे (सा० कौ० शा० १, १, ८) च, अन्यास्वपि शाखासु च । तद्वास उच्यते,—हे 'वासः !' 'सवितुः' आदित्यस्य 'प्रसवे' अभ्यनुज्ञातः अहं त्वां "प्रतिगृह्णामि" । 'अश्विनोः' देवयोः बाहुभ्यां प्रतिगृह्णामि । नैताभ्यामेव 'बाहुभ्याम्' अपिच 'पूष्णः' देवस्य 'हस्ताभ्याम्' प्रतिगृह्णामि । किञ्च, 'ग्नास्त्वा कृन्तन्' स्त्रीभिस्त्वं कर्त्तितः, तन्तुकरणाभिप्रायेण । 'अपसः' अल्पकाः, अनुपजातपुंस्त्वाः, जननायासमर्थाः, कुविन्दपुत्रकाः त्वाम् 'अतन्वत' । ते हि कुविन्दानां परिकर्म 'धियः' धीमत्यः, बुद्धिमत्यः, कुशलाः, वयित्र्यः त्वाम् 'अवयन्' कुविन्दस्त्रियः कृतवत्यः । तदेवमभिनिष्पन्नं त्वां 'मह्यं' 'बृहस्पतये' वार्हस्पत्य आत्मव्यवस्थिताय 'वरुणः' देवताविशेषः 'ददाति' उदकपूर्वकं त्वं दीयसे । सोऽहम् एवङ्गुणयुक्तः त्वां प्रतिगृह्य 'अमृतत्वम्' अमृतभाव यथाभिलषितमेव 'अशीय' अश्नुयाम् । त्वं प्रतिगृह्यमाणं वासः, तव प्रसादात् मैवमेतत् स्यात्,—अमृतभावान्मम मा खण्डनं कार्षीरित्यभिप्रायः । किञ्च, 'मयः' सुखं 'दात्रे' 'भूयात्' भवतु । 'मयः' सुखं 'मह्य' 'प्रतिग्रहीत्रे' च । किञ्च, 'कः' प्रजापतिरयं 'कस्मै' प्रजापतये एव 'अदात्' ददाति । योऽप्ययं ददाति सोऽप्ययं दाता, अयमपि प्रजापतिरेवेत्यभिप्रायः । वक्ष्यति हि,—"क ईषते तुज्यते कः"—इति (ऋ० सं०

१, ६, ८, २) किञ्च, कामः कामायैव अदात् तद्ददाति। पुण्यं भविष्यतीत्यनेन कामेन दाता ददाति, आच्छादनं भविष्यति इति इतरः प्रतिगृह्णाति। एवं कामो दाता, कामः प्रतिग्रहीता। स एव काम उच्यते,—हे काम! 'एतत् ते वासः' सकामो सव इति ॥

"शेपः, वैतसः"—"इति" एते नामनी "पुंस्प्रजननस्य"। "शेपः शपतेः" "स्पृशतिकर्मणः" स्पृशत्यर्थस्य, स्पृश्यते हि तेन स्त्री। "वैतसो वितस्तं भवति"। उपक्षीणं तद् भवति प्रागनुस्मरणात् स्त्रियाः। "यस्यामुशन्तः"—"त्रिः स्म माह्नः"—"इति" "निगमौ (ऋ० सं० ८, ३, २७, २—८, ५, १, ५) भवतः ॥"

"तां पूषञ्छिव तमा मेरयस्वयस्यां बीजं मनुष्या३ वपन्ति। या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपम् ॥" (ऋ० सं० ८, ३, २७, २)। सूर्यायाः आर्षम्। कन्याप्रथमोपगमे विनियोगः। हे भगवन्! 'पूषन्!' 'ईरयस्व' तां योनिम्, 'यस्यां' योनौ 'बीजं' शुक्रम् 'मनुष्याः वपन्ति'। त्वत्कृतयोनिपोषे बीजमेतस्यामर्थवत् स्यात्, त्वदधीनो हि योनिपोष इत्यभिप्रायः। 'या' इयम् 'नः' अस्माकम् 'ऊरू' 'उशती' कामयमाना स्त्री 'विश्रयाते' नानाप्रकारमाश्रयते। तस्या या योनिः, ताम् 'ईरयस्व' 'उद्गमय' बीजग्रहणाय सुपुष्टां कुरुष्व। 'यस्यां' योनौ 'उशन्तः' पुत्रजन्मकामयमानाः 'प्रहराम' प्रक्षिपेम इमं 'शेपम्' ॥ "त्रिः स्म माह्नः श्रथयो वैतसेनोत स्म मेऽश्यत्यै पृणासि। पुरूरवोऽनु ते केतमायं राजा मे वीर तन्व १

स्तदासीः ॥" (ऋ० सं० ८, ५, १, ५)। उर्वश्या आर्षम्। त्रिष्टुप्। सा पुरूरवसामागास्तिष्ठेत्युक्ता सती अनयर्चा पुरूरवसं प्रत्यब्रवीत्। हे 'पुरूरवः!' 'त्रिः स्म माह.' त्रिरह्नो माम् 'अथयः' अताड़यः त्वम् 'वैतसेन' शिश्नदण्डेन पूर्वम्। 'उत स्म मे' अपि च यावान् कश्चिदभिलापो मम मनस्यासीत् तं सर्वमेव त्वम् 'अव्यत्यै' 'पृणासि' व्यतिपूरितवानेवासि। अतस्त्वाहम् 'अनु आयम्' अनुगतवती। 'केतम्' चेतसा अनुकूला तवाहमभवमित्यर्थः। किञ्च, हे 'वीर!' तदा तथानुकूलायाः सत्याः 'राजा' ईश्वरः त्वम्, अस्याः 'तन्वः' मच्छरीरस्य 'तदा आसीः' तदानीं त्वम्, सम्प्रति न तथा वर्त्तसे, यथा पूर्वम्, अतस्त्वयेदानीं नाह समेप्ये इत्यभिप्रायः॥

"अया, एना"—"इति" एते नामनी "उपदेशस्य"। स पुनरुपदेशः स्त्रीपुन्नपुंसकेषु भिन्नो भवति, अतस्त्रिष्वपि प्रदर्श्यते॥

तत्र, 'अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय। दहाशसो रक्षसः पाह्यस्मान् द्रुहो निदो मित्रमहो अवद्यात्॥" इति (ऋ० सं० ३, ४, २५, ५)। "स्त्रियाः" उपदेशः। वामदेवस्यार्षम्। त्रिष्टुप्। रक्षोघ्ने कर्मणि विनियोगः। भगवन्! 'अग्ने!' 'अया' अनया 'समिधा' 'ते' तव 'विधेम' परिचर्य्यां कुर्मः। स त्वमेवमस्माभिः परिचर्य्यमाणः शृणु यत् कुरुष्व 'प्रतिगृभाय' प्रतिगृह्याण इमं 'स्तोमं' स्तोत्रम्, अस्माभिः 'शस्यमानम्' उच्चार्य्यमाणम्। 'दह' एतान् 'अशसः' अशस्तान् अस्तोतॄन्, आत्मनः 'द्रुहः' च दोग्धॄन्, अस्मा-

कम्। एतान् 'रक्षसः' राक्षसान् 'निदः' निन्दितॄंश्च। किञ्च, 'पाहि' रक्ष अस्मान्, हे 'मित्रमहः' मित्राणां पूजयितः! 'अघघात्' अवन्दनीयात् कर्मणः, पापादित्यर्थः॥ "एना वो अग्निं नमसोर्जोनपातमाहुवे। प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम्॥" (ऋ० सं० ५, २, २१, १)। इति "नपुंसकस्य" उपदेशः। वसिष्ठस्यार्षम्। बृहती। प्रातरनुवाकाश्विनयोः शस्यते। 'एना वः' अनेन युष्माकं 'नमसा' अन्नेन अभ्युद्यतेन 'ऊर्जोनपातम्' अपां पौत्रम्, अथवा अन्नानां पौत्रम्, आहुतिभ्यः आपः, अद्भ्यः अग्निः, एनया प्रणालिकया अन्नस्य पौत्रोऽग्निः। तम्, ऊर्जोनपातम् 'अग्निम्' 'आहुवे'। किंलक्षणम्, 'प्रियम्' इष्टम्, देवानाञ्च 'चेतिष्ठम्' अतिशयेन चेतनावन्तम्, 'अरतिम्' अलमतिं पर्य्याप्तमतिम्, 'स्वध्वरं' शोभनयज्ञम्, 'विश्वस्य' यजमानगणस्य, एष योऽधिकृतः कर्मणि, तस्य 'दूतम्' 'अमृतम्' अमरणधर्माणम्। हे ऋत्विग्यजमानाः! तं वः आशासमृद्धये अहमाह्वये। स चाहुतो देवान् प्रति दौत्यं करिष्यतीत्यभिप्रायः॥ "एना पत्या तन्वं १ संसृजस्व (ऋ० सं० ८, ३, २५, २)"—"इति" "पुंसः" उपदेशः। "इह प्रियं प्रजया ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि। एना पत्या तन्वं १ सं सृजस्वाधा जिव्री विदथ्र मा वदाथः॥" (ऋ० सं० ८, ३, २५, २)। इति सूर्य्याया आषम्। जगती। वधूरनया गृहान् प्रवेश्यते, सोच्यते। हे वधु! 'इह' एव 'अस्मिन् गृहे' 'प्रजया' युक्तायाः सत्याः 'ते' तव यत् 'प्रियं' तत् 'समृध्य-

न्ताम्'। किञ्च, अस्मिन् गृहे त्वं 'गार्हपत्याय जागृहि' गृहपतिभावाय अवहिता भवेत्यर्थः। किञ्च, 'एना पत्या' अनेन भर्त्रा सह 'तन्वं' तनुं 'संसृजस्व' मिश्रीकुरु। अथैवं सौमनस्ये वर्त्तमानौ 'जिघ्री' जर्णौ यावत् तावत् अवियुज्यमानौ परस्परेण 'विदथं' यज्ञम् 'आ' आभिमुख्येनावस्थितौ सन्तौ यज्ञसम्बन्धीनि वचांसि वदतम् इत्याशीः॥

"ए ना वो अग्निं तमसा" "एना पत्या"—इति समानेऽप्येनाशब्दे स्वरान्ते एकस्मिन्नुपपदविशेषादेकस्य नपुंसकविषयत्वमेकस्य पुरुषविषयत्वम्। एकत्र नम इत्युपपदम्, एकत्र पतिशब्दः॥

"सिषक्तु, सचते"—"इति" एते नामनी "सेवमानस्य"। "सनः सिषक्तु"—"सचस्वा नः"—इति निगमौ (ऋ० सं० १, १, ३४, २—१, १, २, ४) भवतः॥

"यो रेवान् यो अमीवहा वसुवित् पुष्टिवर्द्धनः। स नः सिषक्तु यस्तुरः॥" (१, १, ३४, २)। मेधातिथिरार्षम्। अग्न्युपस्थाने विनियुक्ता। "सोमानं स्वरणम् (ऋ० सं० १, १, ३४, १)"—इत्यस्या ब्राह्मणस्पत्याया इयमनन्तरा, तेनेयमपि ब्राह्मणस्पत्यैवस्यात्। उक्तञ्चाह्वरकाणां ब्राह्मणस्पत्याभिरग्निमुपतिष्ठेतेति। हे भगवन्! ब्रह्मणस्पते! 'यः' 'रेवान्' रयिमान्, धनवान्, 'अमीवहा' रोगहा, 'वसुवित्' च वसुनो धनस्य अपूर्वस्यापि लम्भा, यश्च 'पुष्टिवर्द्धनः' धनपोषस्य वर्द्धयिता, 'सः' "नः" अस्मान् 'सिषक्तु' "सेवताम्"। पुनः युष्मत्प्रसादात् 'यः'

'तुरः' तूर्णकारी पटुरित्यर्थः ॥ "स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये ॥" (ऋ० सं० १, १, २, ४) ऽ मधुच्छन्दस आर्षम्। अग्न्युपस्थाने विनियोगः। हे भगवन्! 'अग्ने!' यं त्वां वयं परिचराम, 'सः' 'नः' अस्माकं 'सूनवे' पुत्राय 'सूपायनः' सूपगमनः सूपचारः 'भव' सूपचीर्णश्च 'सचस्व' 'नः' 'स्वस्तये' स्वस्त्ययनाय। निगमप्रसक्तमुच्यते,—"स्वस्तीति" एतत् "अविनाशिनाम" अविनाशिनः अर्थस्य नाम। अन्ये त्वधीयते,—"अविनाशनाम" इति। तेषाम् अविनाशस्यैव नाम। तत्त्वमुक्तम्, अधुना व्युत्पत्तिं ब्रवीति—"अस्तिः" अयम् "अभिपूजितः" सुपूर्वः सन्नुच्यते "सु अस्ति"—"इति" ॥

"भ्यसते, रेजते"—"इति" एते नामनी "भयवेपनयोः। "यस्य शुष्माद्रोदसी"—"रेजते अग्ने पृथिवी"—"इति" "निगमौ (ऋ० सं० २, ६, ७, ३—५, १, ८, ४) भवतः" ॥

"यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्य्यभूषत्। यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥" (ऋ० सं० २, ६, ७, १)। उपरिष्टाद् व्याख्येयः ॥ "प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम्। ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवीमखेभ्यः ॥" (ऋ० सं० ५, १, ८, ४)। भरद्वाजस्येयमार्षम्। त्रिष्टुप्। चातुर्मास्ये वैश्वदेवे पर्वणि याज्या। "अग्निमारुती पृश्निमालभेत वृष्टिकामः" —इत्यस्य पशोः षडर्चं चेयम्। हे स्तोतारः! 'चित्रम् अर्कम्' चायनीयं स्तोमं 'गृणते' स्तुवते, स्तनयित्नुशब्देन कृत्स्नं जगत्

उपशब्दायते। 'तुराय' त्वरमाणाय 'स्वतवसे' स्वात्मबलावष्टम्भिने 'मारुताय' गणाय। कीदृशानां पुनर्मरुतां गणाय 'प्रभरध्वम्'? इति,—ये मरुतः 'सहसा' स्वेन बलेन 'सहांसि' परेषां बलानि 'सहन्ते' अभिभवन्ति, 'रेजते' बिभेति, कम्पते वा। केभ्यः मरुद्भ्यः? 'पृथिवीमखेभ्यः' महद्भ्य इत्यर्थः। य एवङ्गुणयुक्ता मरुतः, तेषां यो गणः, तस्मै प्रभरध्वम् चित्रमर्कम्। अग्नये मारुताय च गणायेति स्तोतॄन् सम्बोध्य ततोऽग्निं ब्रवीति,—हे भगवन्नग्ने! शृणु त्वमप्येतमर्कमेवङ्गुणयुक्तैर्मरुद्भिः सह॥

"द्यावापृथिवीनामधेयानि" एभ्यः "उत्तराणि" द्विसम्बन्धेनैवोच्यन्ते। कियन्ति पुनस्तानि? "चतुर्विंशतिः" (२४)। कतमानि पुनस्तानि? "सधे, पुरन्धी"—इत्येवमादीनि। सर्वस्यास्य भूतग्रामस्य धारयित्र्यौ स्वधे। पुरन्धी, पुरु बहूनि धारयित्र्यौ। इत्येवमादि योज्यम्॥

द्विवचनेन युक्तानि द्यावापृथिव्योर्नामानि, "तयोः" साहचर्य्याख्यायिका "एषा" ऋक् "भवति" (साहचर्य्ये हि सति द्विवचनयोग उपपन्नरूपो भवति नाम्नाम्),—॥ ४॥

कतरा पूर्वा कतरापरायोः कथा जाते कवयः को विवेद। विश्वं त्मना बिभृतो यद्ध नाम विवर्तेते अहनी चक्रियेव॥ कतरा पूर्वा कतरापरैनयोः कथं जाते कवयः क एने विजानाति सर्वमात्मना बिभृतो यद्धैनयोः कर्म

विवर्त्तेते चैनयोरहनी अहोरात्रे चक्रयुक्ते इवेति द्यावापृथिव्योर्महिमानमाचष्ट आचष्टे ॥ ५ (२२) ॥

इति तृतीयाध्यायस्य चतुर्थः पादः ॥ ३, ४ ॥

"कतरा पूर्वा कतरा" ०—इति (ऋ० सं० २, ५, २, १)। अगस्त्यस्यार्षम्। त्रिष्टुप्। पृष्ठ्याभिप्लवयोः षष्ठेऽहनि महाव्रते च तृतीय सवने वैश्वदेवे शस्त्रे शस्यते। स्वयमेव तावद्वितर्कयन्नुत्पन्नसंशयो मन्त्रद्रग् ब्रवीति,—'कतरा' अनयोः द्यावापृथिव्योः 'पूर्वा'? 'कतरा' तु 'अपरा'? न हि पौर्वापर्य्यमनयोः स्फुटं लक्षयितुं शक्यते। 'कथा' केन प्रकारेण एते 'जाते' स्याताम्? किं पौर्वापर्य्येण, उत युगपद् भवेताम्? अपि तावत् हे 'कवयः!' 'कः विवेद' कश्चिदपि विस्पष्टं जानाति? अहं त्वेतावच्छक्नुयादागमाद् वक्तुम्,—तस्मादुद्भूतस्य हिरण्मयस्याण्डस्यैते शकले इति। एवं ह्याह ते,—"अण्डकपाले रजतञ्च सुवर्णं चाभवताम्, तद्यत् रजतं, सेयं पृथिवी, यत् सुवर्णं, सा द्यौ." —इति। तेन ज्ञायते युगपदेवैते स्यातामिति। किञ्च, 'विश्व' सर्व 'त्मना' आत्मनैव 'बिभृतः' धारयतः। 'यद्ध नाम' यदर्थमनयोर्नाम नमनम्, यस्माद् भूतग्रामधारणार्थम् एतेन विपरिणामत्वेन, तत् सर्वमेते बिभृतः। किञ्च, 'विवर्त्तेते' 'च' विपर्य्ययेण वर्त्तेते च 'एनयोः' एव अन्तर्भूते अहनी "अहोरात्रे" 'चक्रियेव' "चक्रयुक्ते इव" चक्रयुगलमिव अवियोगेन संयुक्ते, सम्बद्धे इत्यर्थः ॥

मन्त्रव्याख्यानेन गतार्थमेतद्भाष्यमिति ॥

"द्यावापृथिव्योर्महिमानमाचष्टे"—इति। एतदनेन मन्त्रेण द्यावापृथिव्योर्महिमानं महाभाग्यं मन्त्रद्वगाचष्टे ॥ ५ ॥

एवमेतन्नैघण्टुकं प्रकरणं समाप्तम्, अतःपरमैकपदिकं भवति। यस्यायमादिः,—"एकार्थमनेकशब्दमिति"—इति ॥

इति निरुक्तवृत्तौ अष्टमाध्यायस्य चतुर्थः पादः ॥ ३, ४ ॥

ऋज्वर्थायां निरुक्तवृत्तौ जम्बूमार्गाश्रमवासिन आचार्य्य-
भगवद्दुर्गस्य कृतौ अष्टमोऽध्यायः (तृतीयोऽध्यायः)
समाप्तः ॥ ३ ॥

---

१ २ ३ ४ ५ ६

(कमनामानिपरिपद्यन्नहिग्रभायशासद्बह्विरभ्रातेवनजा-

७ ८ ९ १० ११ १२

मयेमनुष्यनामानितदद्यदशावनिभ्योऽभीदन्त्वयावयंयत्रासुप-

१३ १४ १५ १६ १७ १८

र्णाग्द्रुनामानितन्नूत्यजेकुहश्चिच्चतुरश्चित्प्रियमेधवदथलुप्तोप -

१९२० २१ २२

मान्यर्चतिद्विषोरम्भःकतरापूर्वा द्वाविंशतिः ॥)

इति निरुक्ते पूर्वषट्के तृतीयोऽध्यायः ॥ ३ ॥

(नैघण्टुकं काण्डं समाप्तम्।)
